THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE,
MADRAS.

# A DESCRIPTIVE CATALOGUE

OF THE

# ANSKRIT MANUSCRIPTS

IN THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGĀCARYA, M.A., RAO BAHADUR,
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND
REGISTRAR OF BOOKS, MADRAS.

*Prepared under the orders of the Government of Madras.*

VOL. IX.—SYSTEMS OF INDIAN PHILOSOPHY: VAIŚĒṢIKA, YŌGA, MĪMĀṀSĀ AND VĒDĀNTA—ADVAITA PHILOSOPHY.

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1910.

# CONTENTS.

## CLASS VII.

### SYSTEMS OF INDIAN PHILOSOPHY—(*continued*).

#### 2. Vaiśēṣika.


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Kaṇādanayabhūṣaṇa ... ... ... ... ... | 4335 | 3215 |


#### 3. Yōga.


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Amanaska ... ... ... ... ... ... ... | 4336, 4337 | 3217 to 3219 |
| Amanaskagurukalpa ... ... ... ... ... | 4338 | 3219 |
| Amaraughaprabōdha ... ... ... ... ... | 4339, 4340 | 3220 to 3222 |
| Amṛtasiddhiyōga ... ... ... ... ... ... | 4341, 4342 | 3222 to 3224 |
| Kapilagītā ... ... ... ... ... ... ... | 4343 | 3224 |
| Candrāvalōkana ... ... ... ... ... ... | 4344, 4345 | 3225 to 3227 |
| Dattātrēyabōdha ... ... ... ... ... ... | 4346, 4347 | 3227, 3228 |
| Nādānusandhānapañcaka ... ... ... ... ... | 4348 | 3229 |
| Pātañjalayōgasūtra ... ... ... ... ... | 4349, 4350 | 3229 to 3231 |
| Pātañjalayōgasūtra : Vyākhyāsahita ... ... ... | 4351 | 3231, 3232 |
| Pātañjalayōgasūtravṛtti ... ... ... ... ... | 4352 | 3233, 3234 |
| Mārkaṇḍēyayōga ... ... ... ... ... ... | 4353, 4354 | 3235, 3236 |
| Yōgatattvadīpikā ... ... ... ... ... ... | 4355 | 3237 |
| Yōgatārāvali ... ... ... ... ... ... | 4356 to 4359 | 3238 to 3241 |
| Yōgabīja ... ... ... ... ... ... .. | 4360, 4361 | 3242, 3243 |
| Yōgayājñavalkyagītā ... ... ... ... ... | 4362 | 3243 to 3245 |
| Yōgayājñavalkya ... ... ... ... ... ... | 4363, 4364 | 3246 |
| Yōgaratnapradīpikā ... ... ... ... ... | 4365 | 3246, 3247 |
| Yōgarahasya ... ... ... ... ... ... | 4366 | 3248 |
| Yōgaviṣaya .. ... ... ... ... ... ... | 4367, 4368 | 3249, 3250 |
| Yōgaśāstra ... ... ... ... ... ... ... | 4369, 4370 | 3250 to 3253 |
| Yōgasaṅgraha ... ... ... ... ... ... | 4371 | 3254, 3255 |
| Yōgasāra ... ... ... ... ... ... ... | 4372 | 3256 |
| Yōgasārasaṅgraha ... ... ... ... ... | 4373 | 3257, 3258 |
| Rājayōga ... ... ... ... ... ... ... | 4374 | 3259 |
| Rājayōgabhāṣya ... ... ... ... ... ... | 4375 | 3260, 3261 |
| Rājayōgasāra ... ... ... ... ... ... | 4376 | 3262 |
| Rājayōgasiddhāntarahasya ... ... ... ... | 4377 | 3263, 3264 |
| Rājayōgāmṛta ... ... ... ... ... ... | 4378, 4379 | 3265 to 3267 |
| Vāsudēvamanana ... ... ... ... ... ... | 4380 | 3267, 3268 |
| Vijṛmbhitayōgaśāstra ... ... ... ... ... | 4381 | 3268, 3269 |
| Śāmbhavīmudrā ... ... ... ... ... ... | 4382 | 3269, 3270 |

## SYSTEMS OF INDIAN PHILOSOPHY—(*continued*).

### 3. YŌGA—(*continued*).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Śivatattvōpalabdhi ... ... ... .. ... | 4388 | 3270, 3271 |
| Śivayōgapradīpikā ... ... ... ... ... ... | 4384, 4385 | 3272, 3273 |
| Samādhikrama ... ... ... .. ... ... | 4386, 4387 | 3274, 3275 |
| Svaraśāstrasaṅgraha .. .. ... ... .. | 4388, 4389 | 3275 to 3277 |
| Svarūpadarśanasiddhāñjana ... .. .. ... | 4390 | 3278 |
| Haṭhapradīpika ... ... ... .. .. . | 4391, 4392 | 3279, 3280 |
| Haṭhayōgapradīpikā ... ... ... ... .. | 4393 to 4396 | 3280 to 3283 |


### 4. MĪMĀṀSĀ.


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Aṁśatrayīvicāra .. ... ... ... ... ... | 4397 | 3284 |
| Adhvaramīmāṁsākutūhalavṛtti ... ... ... | 4398 to 4404 | 3285 to 3288 |
| Āpadēvīya ... ... ... . . ... .. | 4405 to 4408 | 3288 to 3290 |
| Upakramaparākrama ... ... . .. ... | 4409 to 4411 | 3290 to 3292 |
| Jaiminīyanyāyamālāvistara ... ... ... ... | 4412 to 4414 | 3292 to 3296 |
| Tantravārtikaṭīkā : Nyāyasudhā . . ... ... | 4415 | 3296 |
| Tantravilāsa ... ... ... ... ... | 4416 | 3297, 3298 |
| Tantraśikhāmaṇi ... . ... ... ... ... | 4417 to 4420 | 3298 to 3300 |
| Nyāyaratnamālā .. ... ... ... ... | 4421 | 3301 |
| Bhāṭṭacintāmaṇi ... ... ... ... .. ... | 4422 | 3302 |
| Bhāṭṭadīpikā ... .. . ... | 4423 to 4437 | 3303 to 3309 |
| Bhāṭṭadīpikāvyākhyā : Candrikā ... .. .. | 4438 | 3309 to 3311 |
| Bhāṭṭaparibhāṣā ... .. ... ... ... | 4439 | 3311 |
| Bhāṭṭarahasya ... ... ... ... ... ... | 4440 to 4443 | 3312, 3313 |
| Bhāṭṭasaṅgraha ... ... ... ... ... .. | 4444 | 3314 |
| Mīmāṁsākaustubha .. ... .. ... ... | 4445 to 4455 | 3315 to 3319 |
| Mīmāṁsādhikaraṇanyāyavicāra .. ... ... | 4456 | 3319, 3320 |
| Mīmāṁsānayavivēka ... ... ... ... ... | 4457 | 3320, 3321 |
| Mīmāṁsāparibhāṣā ... ... ... ... ... | 4458 | 3322 |
| Mīmāṁsāpādukā ... ... ... ... ... ... | 4459, 4460 | 3323 to 3326 |
| Mīmāṁsāmakaranda ... ... ... .. ... | 4461, 4462 | 3326 to 3328 |
| Mīmāṁsāviṣaya ... ... .. ... .. ... | 4463, 4464 | 3329 |
| Mīmāṁsāślōkavārtikavyākhyā : Kāśikā ... ... | 4465 | 3330 |
| Mīmāṁsāsūtra ... ... ... ... .. ... | 4466, 4467 | 3331, 3332 |
| Vādakutūhala .. ... ... ... ... ... | 4468 | 3332 |
| Vidhicamatkāracandrikā ... ... ... .. | 4469 | 3333 |
| Vidhitrayaparitrāṇa ... ... ... ... ... | 4470 | 3334, 3335 |
| Vidhidarpaṇa ... ... ... ... ... ... | 4471 to 4473 | 3336 to 3338 |
| Vidhirasāyanavyākhyā : Vidhirasāyanasukhōpajīvinī... | 4474 to 4476 | 3338 to 3341 |
| Vidhisudhākara ... ... ... ... ... ... | 4477 | 3341 |

CONTENTS.

## SYSTEMS OF INDIAN PHILOSOPHY—(*continued*).

### 4. MĪMĀṂSĀ—(*continued*).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Śāstradīpikā ... ... ... ... ... ... | 4478 to 4496 | 3342 to 3348 |
| Śāstradīpikāvyākhyā : Nyāyakarpūravartikā ... ... | 4497 to 4499 | 3348 to 3350 |
| Do. Prabhāmaṇḍala ... ... | 4500 | 335[illegible] |
| Do. Mayukhamālikā ... ... | 4501 to 4509 | 3351 to 3355 |
| Do. Mayūkhāvali ... ... ... | 4510 | 3355, 3356 |
| Saṅkarṣaṇabhāṭṭadīpikā ... ... ... ... ... | 4511 | 3357 |
| Sēśvaramīmāṃsā ... ... ... ... ... ... | 4512 | 3358 to 3360 |


### 5. VĒDĀNTA.

#### A.—*Advaita Philosophy.*


| | | |
|---|---|---|
| Ajñānadhvantacaṇḍabhāskara ... ... ... ... | 4513 | 3361, 3362 |
| Advaitadīpikā ... .. ... ... ... ... | 4514 to 4518 | 3363 to 3366 |
| Advaitadīpikāvivaraṇa ... ... ... ... ... | 4519, 4520 | 3366 to 3368 |
| Advaitamakaranda ... ... ... ... ... | 4521 | 3368 |
| Do. Rasābhivyañjikāsahita ... ... | 4522, 4523 | 3369 to 3371 |
| Advaitaratna ... ... ... ... ... ... | 4524 | 3371, 3372 |
| Advaitaratnavyākhyāna : Tattvadīpana ... ... | 4525 | 3373 |
| Advaitarasamañjarī ... ... ... ... ... | 4526 | 3374 |
| Advaitasiddhi ... ... ... ... ... ... | 4527 to 4530 | 3375 to 3377 |
| Advaitasiddhivyākhyā : Laghucandrikā ... .. | 4531 to 4535 | 3377 to 3380 |
| Advaitasiddhivyākhyā : Advaitacandrikā ... ... | 4536 | 3380 |
| Adhyārōpaprakaraṇa ... ... .. ... ... | 4537 | 3381 |
| Anubhavavēdāntaprakaraṇa ... ... ... ... | 4538 | 3381, 3382 |
| Anubhūtiprakāśikā .. ... ... ... ... | 4539 | 3382, 3383 |
| Aparōkṣānubhūti ... ... ... ... ... ... | 4540 to 4542 | 3383 to 3385 |
| Avadhūtagītā ... .. ... ... ... .. | 4543, 4544 | 3385 to 3387 |
| Aṣṭāvakradīpikā : Savyākhyā ... ... ... ... | 4545 | 3387 |
| Asaṅgātmavivaraṇa ... ... ... ... ... | 4546 | [illegible] |
| Ātmabōdha ... ... ... ... ... ... | 4547 to 4553 | 3389 to [illegible] |
| Do. Savyākhya ... ... ... ... ... | 4554 to 4557 | 3391 to 3393 |
| Do. Vyākhyāsahita ... ... ... ... | 4558 | 3394 |
| Ātmānātmavivēka ... ... .. ... ... | 4559 to 4563 | 3394 to 3397 |
| Ānandadīpaṭīkā : Viśuddhadṛṣṭi ... ... ... | 4564 | 3397 to 3399 |
| Upadēśasāhasrī-Savyākhyā ... ... .. ... | 4565, 4566 | 3400 to 3402 |
| Ṛbhugītā ... ... ... ... ... ... ... | 4567, 4568 | 3402 to 3404 |
| Ēkaślōka ... ... ... ... ... ... ... | 4569 | 3404, 3405 |
| Do. Tattvadīpanasahita ... ... ... ... | 4570 | 3405, 3406 |
| Ēkādaśōttaraśatavākyagrantha ... ... ... | 4571 | 3407 |
| Karmākarmavivēkanaukā ... ... ... ... | 4572 | 3408 |

SYSTEMS OF INDIAN PHILOSOPHY—(*continued*).

5. VĒDĀNTA—(*continued*).

A.—*Advaita Philosophy*—(continued).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Kutarkakhaṇḍana ... ... ... ... ... | 4573 | 3409 |
| Gītārahasyārthadarpaṇa ... ... ... ... | 4574 | 3409, 3410 |
| Guṇatrayavivēka .. ... ... ... ... ... | 4575 | 3410, 3411 |
| Jaganmithyātvadīpikā ... ... ... ... ... | 4576, 4577 | 3412, 3413 |
| Jīvanmuktasañcāra ... ... ... ... ... | 4578 | 3413, 3414 |
| Jīvanmuktivivēka ... ... ... ... ... ... | 4579, 4580 | 3414, 3415 |
| Jñānatārāvalī ... ... ... ... .. ... | 4581 | 3415 |
| Jñānānuṣṭhānaprakaraṇa .. ... ... ... ... | 4582 | 3416 |
| Tattvakaustubha ... ... ... ... ... ... | 4583, 4584 | 3417, 3418 |
| Tattvabōdha ... ... ... ... ... ... | 4585 | 3419 |
| Tattvampadārthalakṣyaikyaśataka ... .. ... | 4586 | 3420 |
| Tattvavīvēka ... ... ... ... ... ... | 4587, 4588 | 3421, 3422 |
| Tattvavivēkadīpana ... ... .. ... ... | 4589, 4590 | 3423, 3424 |
| Tattvavivēcanī ... ... ... ... .. .. | 4591, 4592 | 3424 to 3426 |
| Tattvaviṣayaka ... ... ... ... ... ... | 4593 | 3426 |
| Daśaślōkī ... ... ... ... ... | 4594 to 4598 | 3427, 3428 |
| Do. Siddhāntatattvabindusahitā .. ... .. | 4599 to 4604 | 3428 to 3431 |
| Dṛgdṛśyavivēka ... ... ... . ... | 4605, 4606 | 3431, 3432 |
| Do. Savyākhya ... ... ... ... | 4607 to 4609 | 3432 to 3435 |
| Naiṣkarmyasiddhi ... ... . ... ... | 4610 | 3435, 3436 |
| Naiṣkarmyasiddhivyākhyā : Candrikā ... ... ... | 4611 | 3437, 3438 |
| Pañcakōśavivēka ... ... ... ... .. ... | 4612 | 3439 |
| Pañcadaśī ... ... ... ... ... ... ... | 4613, 4614 | 3440 to 3442 |
| Do. Savyākhyā ... ... ... ... .. | 4615 to 4627 | 3442 to 3446 |
| Pañcabhūtavikāra ... ... .. ... .. | 4628 | 3447 |
| Pañcabrahmanirūpaṇa ... ... ... ... ... | 4629 | 3447, 3448 |
| Pañcaratna ... ... ... . ... ... | 4630, 4631 | 3448, 3449 |
| Pañcaratnamālikāvyākhyā : Kalpavallī ... ... | 4632 | 3449 |
| Pañcaratna Dīdhitisahita ... ... .. ... | 4633 | 3450 |
| Pañcaratnavyākhyāna ... ... ... ... ... | 4634 | 3451 |
| Pañcīkaraṇa ... ... ... ... ... ... | 4635, 4636 | 3451, 3452 |
| Pañcīkaraṇavivaraṇa ... ... ... ... ... | 4637 | 3453 |
| Pañcīkaraṇavārtika ... ... ... ... ... | 4638 to 4640 | 3454, 3455 |
| Pañcīkaraṇavārtikavyākhyāna : Vārtikābharaṇa ... | 4641 | 3455, 3456 |
| Pañcīkaraṇavārtikavyākhyā ... ... ... ... | 4642 | 3456, 3457 |
| Paramasiddhāntasāra ... ... ... ... ... | 4643 | 3457 |
| Paramārthasārasaṅgraha ... ... ... ... | 4644 | 3458, 3459 |
| Bōdhāryā ... ... ... ... ... ... ... | 4645 | 3459 |
| Brahmajñānavicāra ... ... ... ... ... | 4646 | 3460 |
| Brahmapraṇavadīpikā ... ... ... ... ... | 4647 | 3461 |

SYSTEMS OF INDIAN PHILOSOPHY—(*continued*).

5. VĒDĀNTA—(*continued*).

A.—*Advaita Philosophy*—(continued).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Brahmavinmahiman ... ... ... ... ... | 4648 | 3462 |
| Brahmasūtra ... ... ... ... ... ... | 4649 to 4657 | 3463 to 3465 |
| Brahmasūtracandrikā ... ... ... . ... | 4658 | 3465, 4466 |
| Brahmasūtrabhāṣya ... ... ... ... ... | 4659 to 4665 | 3466 to 3469 |
| Brahmasūtrabhāṣyavyākhyā : Pañcapādikā ... ... | 4666 | 3469, 3470 |
| Pañcapādikāvivaraṇa ... ... ... ... ... | 4667, 4668 | 3471, 3472 |
| Do. Bhāvaprakāśikā ... ... | 4669 | 3473 |
| Pañcapādikāvivaraṇavyākhyāna : Tattvadīpana ... | 4670 | 3474 |
| Brahmasūtrabhāṣyavyākhyāna : Brahmavidyābharaṇa | 4671 | 3475, 3476 |
| Brahmasūtrabhāṣyavyākhyā : Bhāmatī ... ... | 4672 to 4676 | 3476 to 3479 |
| Bhāmatīvyākhyā : Vēdāntakalpataru ... ... ... | 4677 | 3479, 3480 |
| Vēdāntakalpataruvyākhyā : Parimala ... . ... | 4678 | 3481 |
| Brahmasūtrabhāṣyavyākhyā : Bhāṣyaratnaprabhā ... | 4679 to 4682 | 3182 to 3485 |
| Do. Śārīrakanyāyanirṇaya. | 4683 to 4685 | 3485 to 3487 |
| Do. Śārīrakanyāyarakṣāmaṇi. | 4686 | 3488, 3489 |
| Brahmasūtrabhāṣya ... ... .. ... ... | 4687, 4688 | 3490, 3491 |
| Brahmasūtravṛtti ... ... ... ... ... ... | 4689 | 3492 |
| Do. Brahmatattvaprakāśika ... ... | 4690, 4691 | 3493 to 3495 |
| Brahmasūtrabhāṣyavyākhyā ... ... .. ... | 4692 | 3495, 3496 |
| Brahmasūtrōpanyāsa ... ... ... ... ... | 4693, 4694 | 3497, 3498 |
| Bhēdakhaṇḍana ... ... ... ... ... ... | 4695 | 3499 |
| Bhēdadhikkāra ... ... ... ... ... ... | 4696 to 4698 | 3500 to 3502 |
| Bhēdadhikkārasatkriyā ... ... ... ... ... | 4699 to 4701 | 3501 to 3504 |
| Bhēdadhikkārasatkriyōjjvalā ... ... ... ... | 4702, 4703 | 3504, 3505 |
| Madhvatantramukhamardanavyākhyā : Vyadhvavidhvaṁsana ... ... ... ... ... ... | 4704 | 3506, 3507 |
| Manīṣāpañcaka ... ... ... ... ... ... | 4705 | 3508 |
| Do. Madhumañjarīsahita ... ... ... | 4706 | 3509 |
| Do. Savyākhyāna ... ... ... ... | 4707 | 3510 |
| Mahāvākyaratnāvalī ... ... ... ... .. | 4708, 4709 | 3511 to 3514 |
| Mahāvākyavivaraṇa ... ... ... ... ... | 4710 to 4712 | 3514, 3515 |
| Mahāvākyārthavivaraṇa ... ... ... ... ... | 4713, 4714 | 3516 |
| Mahāvākyārthapañcīkaraṇa ... ... ... | 4715 | 3517 |
| Māyāpañcaka ... ... ... ... ... ... | 4716 | 3518 |
| Māyāvivaraṇa ... ... ... ... ... ... | 4717 | 3518, 3519 |
| Laukikanyāyaratnākara ... ... ... ... .. | 4718 | 3520, 3521 |
| Vākyavṛtti ... ... ... ... ... ... ... | 4719 to 4721 | 3522 to 3524 |
| Do. Vākyavṛttiprakāśikāsahitā ... ... | 4722 | 3524, 3525 |

SYSTEMS OF INDIAN PHILOSOPHY—(*continued*).

5. VĒDĀNTA—(*continued*).

A.—*Advaita Philosophy*—(continued).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Vivēkacūḍāmaṇi ... ... ... ... ... ... | 4723, 4724 | 3526, 3527 |
| Vivēkasāra ... ... ... ... ... ... | 4725 | 3528 |
| Vēdāntaḍiṇḍima ... ... ... ... ... ... | 4726 | 3529 |
| Vēdāntaparibhāṣā ... ... ... ... ... ... | 4727 to 4736 | 3530 to 3534 |
| Vēdāntaparibhāṣāprakāśikā ... ... ... ... | 4737, 4738 | 3534, 3535 |
| Vēdāntaparibhāṣāvyākhyā : Vēdāntaśikhāmaṇi ... | 4739 to 4742 | 3535 to 3538 |
| Vēdāntaviṣaya ... ... ... ... ... ... | 4743 | 3538, 3539 |
| Vēdāntaviṣaya Savyākhya ... ... ... ... | 4744 | 3540 |
| Vēdāntasaṅgraha ... ... ... ... ... ... | 4745 | 3541 |
| Vēdāntasāra ... ... ... ... ... ... | 4746, 4747 | 3542, 3543 |
| Vēdāntasārasaṅgraha ... ... ... ... ... | 4748 | 3543, 3544 |
| Vēdāntasārasaṅgrahavyākhyāna : Ātmabōdhāmṛta ... | 4749 | 3545 |
| Vaidikasiddhāntasaṅgraha ... ... ... ... | 4750 | 3546 |
| Vaiyāsikanyāyamālā ... ... ... ... ... | 4751, 4752 | 3547, 3548 |
| Vaiyāsikanyāyamālā : Savyākhyā ... ... ... | 4753 to 4756 | 3548 to 3550 |
| Śrutisārasamuccaya ... ... ... ... ... | 4757 | 3551 |
| Saṅkṣēpaśārīrakavyākhyā Tattvabōdhinī ... ... | 4758 | 3552 |
| Saccidānandasvarūpavicāra ... ... ... ... | 4759 | 3553 |
| Sarvasiddhāntasaṅgraha ... ... ... ... | 4760 to 4762 | 3553 to 3555 |
| Siddhāntabindutīkā : Nyāyaratnāvalī ... ... ... | 4763 | 3555 |
| Siddhāntalēśasaṅgraha ... ... ... ... ... | 4764 to 4767 | 3556 to 3558 |
| Siddhāntalēśasaṅgrahavyākhyā ... ... ... ... | 4768 | 3559 |
| Siddhāntaślōkatraya ... ... ... ... ... | 4769 | 3560 |
| Siddhāntasaṅgraha ... ... ... ... ... | 4770 | 3561 |
| Siddhāntasiddhāñjana ... ... ... ... | 4771 to 4773 | 3561 to 3564 |
| Svātmaprakāśikā ... ... ... ... ... | 4774, 4775 | 3565, 3566 |
| Svānubhavaprakaraṇa ... ... ... ... ... | 4776, 4777 | 3566, 3567 |
| Svānubhūti ... ... ... ... ... ... | 4778 | 3568 |
| Hastāmalakaślōka ... ... ... ... ... | 4779 | 3569 |
| Hastāmalakavyākhyā ... ... ... ... ... | 4780 | 3569, 3570 |

INDEX ... ... ... ... ... ... ... ... ... ... ... i to x

A

# DESCRIPTIVE CATALOGUE

OF THE

# SANSKRIT MANUSCRIPTS.

## VOLUME IX.

## CLASS VII.—SYSTEMS OF INDIAN PHILOSOPHY—(*Continued*).

### (2) VAIŚĒṢIKA.

### No. 4335. काणादनयभूषणम्.

KĀṆĀDANAYABHŪṢAṆAM.

Substance, paper. Size, $11\frac{1}{4} \times 8\frac{7}{8}$ inches. Pages, 141. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

This is a well-known treatise on Kaṇāda's system of logic written by a Cayani, son of Śrī-Vīrabhadra-Vājapēyin.

**Beginning:**

प्रणम्य शिरसा देवीमिष्टदेवं च लिख्यते ।
चलन् (?) वंश्येन महता काणादनयभूषणम् ॥
जानकीकुचसौवर्णकलशद्वयसंश्रितम् ।
इन्द्रनीलमणिश्यामं नमामि रघुनायकम् ॥
श्रीवीरभद्रयज्वानं सर्वविद्याविशारदम् ।
प्रणम्य पितरं कुर्वे काणादनयभूषणम् ॥
नूतनेन प्रकारेण बालव्युत्पत्तिसिद्धये ।
वैशेषिकमते तत्त्वं ज्ञाप्यते नातिविस्तरम् ॥

ननु निष्प्रयोजनं पदार्थव्युत्पादनम्; पदार्थज्ञानेन सुखरूपस्य दुःखाभावस्य ता(वा) पुरुषार्थस्यासिद्धेः । न च मोक्ष एव दुःखाभावः

पुरुषार्थः पदार्थज्ञानेन साध्यत इति वाच्यम् ; पदार्थज्ञानस्य मोक्षोपयोगित्वे प्रमाणाभावादिति चेदुच्यते—तरति शोकमात्मविदिति श्रुत्या स्वात्मज्ञानस्य शोकनिवृत्तिलक्षणमोक्षोपयोगित्वं सिद्धम् ; तच्चात्मज्ञानं साक्षात्काररूपम् ; आत्मा वारे द्रष्टव्य इति वाक्यस्वारस्यात् । तच्च मननसाध्यम् ; मन्तव्य इति वाक्यात् । मननं चात्मविशेष्यकेन(र)भिन्नत्वप्रकारकानुमितिरूपं ज्ञानम् । इतरभिन्नत्वं च इतरप्रतियोगिकान्योन्याभावरूपमितरलक्षणप्रतियोगिज्ञानाधीनम् ; अभावज्ञानस्य प्रतियोगिज्ञानसाध्यत्वनियमात् । तथाच पृथिवीजलादीनां सर्वेषां प्रतियोगिकोटिनिविष्टतया सकलपदार्थज्ञानं मोक्षोपयोगीति सिद्धम् । इयांस्तु विशेषः—

आत्मज्ञानं साक्षादेव मोक्षोपयोगि, पृथिव्यादिज्ञानं त्वात्मज्ञानद्वारेति ।

**End:**

अथवा ध्वंसप्रागभावात्यन्ताभावा इति बुद्धिविशेष्यत्वे सति अभावत्वमत्यन्ताभावलक्षणम् ; स्फुटमत्र विशेषणफलम् । ननु सर्वाणीमानि लक्षणानि दिक्कालयोरतिव्याप्तानि ; तयोः सिन्द्धान्ते सर्वाधारताभ्युपगमादिति चेन्न ; सर्वाधारताप्रयोजकस्वरूपविशेषभिन्नसंबन्धेन सर्वेषामुक्तानां लक्षणत्वाभिधानादिति संक्षेपः ॥

लोके भूपतयः प्रियाणि मधुरद्रव्याण्यमी (पूर्वतः)
भुक्त्वात्यन्ततदेकभोगविरतिप्राप्तालसत्वापहम् ।
पश्चादाम्लमदन्ति तिक्तमथ वा वस्त्वन्यदेवं बुधाः
स्वीकुर्वन्त्यखिलार(ग)मार्थनिरता अप्येतदस्मद्वचः ॥

**Colophon:**

इतिश्रीमद्भुलुसुकुलदुग्धासिन्धुपूर्णसुधाकरश्रीवीरभद्रवाजपेय(यि)तनयेन चयनिना विरचिते काणादनयभूषणे अभावपरिच्छेदः ॥

*For* YŌGA, *read* 3. YŌGA.

## AMANASKAM.

Substance, paper. Size, 13⅝ × 8⅝ inches. Pages, 16. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 222*b*. The other works herein are :—Lakṣmītantra 1*a*, Ātmānātmavivēka 181*a*, Pañcikaraṇa 185*b*, Yōgabīja 186*b*, Navaśaktiśataka 195*b*, Yōgaviṣaya 196*b*, Amṛtasiddhiyōga 198*a*, Ṣaṭcakranirūpaṇa 212, Amaraughaprabōdha 216*b*, Candrāvalōkana 220*a*, Dattātrēyabōdha 230*a*, Yōgatārāvali 236*a*, Haṭhapradīpikā 238*a*, Samādhikrama 240*b*, Mārkaṇḍēyayōga 251*b*.

A treatise on Yōga dealing with Tārakayōga and Rājayōga.

Complete.

**Beginning :**

श्रीकैलास इ(गु)हावासं सर्वज्ञं सर्वगं शिवम् ।
वामदेवो मुनिश्रेष्ठः प्रणम्य परिपृच्छति ॥
देवदेव महादेव सर्वानुग्रहकारक ।
जीवन्मुक्तिपदोपायं कथयस्व मम प्रभो ॥

ईश्वरः—

शृणु वत्स महाप्राज्ञ संसारार्णवतारकम् ।
अगम्यं सर्वदेवानां गोपितं सकलागमे ॥
तथापि तव वक्ष्यामि त्वयि संवीक्ष्य वासनाम् ।
अद्वैतपरमां चापि मयि भक्तिमहेतुकाम् ॥
अस्यैव तारको योगः सर्वयोगोत्तमोत्तमः ।
स एव द्विविधः प्रोक्तः पूर्वापरविभागतः ॥
पूर्वस्तु तारकस्तत्र राजयोगस्तथापरः ।
प्रथमं ते प्रवक्ष्यामि सर्वयोगं समासतः ॥

सर्वमूर्तिमयं रूपं गुणमिन्द्रियमान्तरे ।
द्विधाकृतं मनोयुक्तं तारकं भवतारकम् ॥
तारं ज्योतिषि संयोज्य किञ्चिदुन्नमयेद्भ्रुवौ ।
पूर्वयोगस्य मार्गोऽयमुन्मनाकाशकर्षणात् ॥
एष योगो मया प्रोक्तः सर्वज्ञत्वाय वेधसः ।
सर्वमाङ्गळ्यसिद्ध्यर्थं देव्यै नान्यस्य कस्यचित् ॥
मन्त्रयोगरताः केचित् ध्यानयोगविमोहिताः ।
हठेन केचित् क्लिश्यन्ति नैव जानाति(नन्ति)तारकम् ॥
तारकोऽयं भवाम्भोधितारणात् गुरुशिष्ययोः ।
तारकोन्मेषयुक्तत्वादपि तारक उच्यते ॥
पन्थानस्तारकादन्ये परं भान्ति वितारकाः ।
अस्यानुग्र(ा)हको सो(यो)ऽसौ गुरुरन्य(:)प्रतारकः ॥
। मीमांसातर्कग्रहगणितसिद्धान्तपठनैः
न वेदैर्वेदान्तैः स्मृतिभिरभिधानैरपि न च ।
न चापिच्छन्दोव्याकरणकवितालङ्कृतिगणैः
मुने तत्त्वावाप्तिर्निजगुरुमुखादेव हि(भवेत्) ॥
स एव योगी स गुरुस्स सेव्यः . . . . ॥
एवंविधं गुरुं लब्ध्वा मनोऽवस्थाभिरात्मनः ।
घटं युक्तोन्मनीभावं योगमेतत्सदाभ्यसेत् ॥

**End:**

पुष्पात्प्रकाशते यद्वत् फलं पुष्पविनाशतः ।
देहात् प्रकाशते तद्वत् तत्त्वं देहविनाशतः ॥
राजयोगस्य माहात्म्यं को वा जानाति तत्त्वतः ।
ज्ञानान्मुक्तिस्थिते(तिः) सिद्धिः गुरुवाक्येन लभ्यते ॥

अन्यजन्मकृताभ्यासात् स्वयं तत्त्वं प्रकाशते ।
सुप्तोत्थितप्रत्ययः स्यादुपदेशादिकान्विना ॥
शुद्धतत्त्वस्य शान्तस्य सदैव गुरुसेविनः ।
गुरुप्रसादादथवा तत्त्वज्ञानं प्रजायते ॥

**Colophon :**

इत्यमनस्कं सम्पूर्णम् ।

No. **4337.** अमनस्कम्.

AMANASKAM.

Substance, palm-leaf. Size, 8⅞ × 1¼ inches. Pages, 19. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 49*a*. The other works herein are :—Ātmānātmavivēka 1*a*, Pañcīkaraṇa 7*a*, Yōgabīja 9*a*, Navaśaktiśataka 19*a*, Yōgaviṣaya 19*b*, Amṛtasiddhiyōga 21*b*, Amaraughaprabōdha 41*a*, Candrāvalōkana 46*a*, Dattātrēyabōdha 59*a*, Yōgatārāvali 65*a*, Haṭhapradīpikā 68*a*, Samādhikrama 71*a*, Mārkaṇḍēyayōga 85*a*, Dṛgdṛśyavivēka 104*a*, Ātmabōdha 106*b*.

Same work as the above.

No. **4338.** अमनस्कगुरुकल्पम्.

AMANASKAGURUKALPAM.

Substance, palm-leaf (Śrītāla). Size, 9⅜ × 1⅜ inches. Pages, 5. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 118*a*. The other works herein are :—Bālāmantra 1*a*, Ātmapararakṣāmālāmantra 1*b*, Dūṣyādūṣirasītirca 2*a*, Pratyaṅgirāsūkta 3*a*, Pratyaṅgirākavaca 14*a*, Pratyaṅgirāstōtra 18*a* and 33*a*, Pratyaṅgirāmālāmantra 19*b* and 58, Pratyaṅgirāyantra 24*b* and 57*b*, Pratyaṅgirāpūjā 25*b*, Pratyaṅgirāsammēlanastōtra 36*a*, Pratyaṅgirākalpa 37*a*, Hayagrīvasahasranāmastōtra 61*a*, Caraṇavyūha 67*a*, Pañcāstra 69*a*, Yōgasaṅgraha 70*a*, Sau-

bhāgyalakṣmyupaniṣad 89*a*, Bhāgavata 91*a*, Yōgarahasya 93 Yōgaviṣaya (Telugu) 98*a*, Sthūlasūkṣmakāraṇacakranirṇaya 114 Yōgayājñavalkya 122*a*, Saṁprōkṣaṇavidhi 141*a*, Jyōtiṣmatīkalp 142*a*, Svapnādhyāya 144*a*.

A treatise on the chief means and methods of attaining the stat of undifferentiated meditation in the practice of Yōga.

**Beginning:**

योगी निमिष . . . . लभते ध्रुवम् ।
स्पर्शनं परतत्त्वं च व्युत्थानं च पुनः पुनः ॥
धर्मशान्ति(न्ती) प्रजायेत(ते)मु . . . मूर्च्छिता ।
निमिषे(मेष) षट्कमात्रेण लयेनान्तस्स्थयोगिनः ॥
श्वासमात्रलयेनापि तेन प्राणाविवायवः ।
श्वासप्रवाहसम्बन्धात् स्वस्वस्थानं वहन्ति ते ॥
श्वासद्वयलयेनापि कूर्मनागादिवायवः ।
न वर्तन्ते च धातूनां बन्धं कुर्वन्ति धातुगाः ॥

**End:**

कामस्थो दृश्यते लोके तत्त्वचर्यान्(र्यां)समाचरन् ।
तत्त्वचर्यां करोत्येव शक्तितत्त्वजयाय च ॥
इदं क्रमविवृद्धेन लयाख्यानेन योगिनः ।
भुञ्जते परमानन्दं भू(भु)सुण्डादिमहात्मवत् ॥

**Colophon:**

इति अमनस्के गुरुकल्पखण्डे राजयोगो नाम प्रथमोऽध्यायः ॥

## No. **4339.** अमरौघप्रबोधः.
## AMARAUGHAPRABŌDHAḤ.

Pages, 9. Lines, 20 on a page.

Begins on fol. 216*b* of the MS. described under No. 4336.

A short treatise on Laya-yōga, Haṭha-yōga, Mantra-yōga and Rāja-yōga: by Gōrakṣanātha. Its aim is to fit a man for the practice of the last of these, which is held to be the highest kind of Yōga.

**Beginning :**

ओं नमोऽस्त्वादिनाथाय मीननाथाय वै नमः ।
नमश्चारंङ्गि(श्च रङ्ग)नाथाय सिद्धबुद्धाय धीमते ॥
लयादिप्रतिपन्नानां कलहोत्सुकचेतसाम् ।
गोरक्षकेण कथितः प्रबोधः प्रत्ययात्मकः ॥
लययोगो हठश्चैव मन्त्रयोगस्तृतीयग(क): ।
चतुर्थो राजयोगश्च द्विधाभवविवर्जितः ॥
यच्चि(श्चि)त्तसन्ततलयस्स लय(:)प्रदिष्टो
यस्तु प्रभञ्जनविधानरतो हठस्सः ।
यो मन्त्रमूर्तिवशगस्स तु मन्त्रयोगो
यच्चि(श्चि)त्तवृत्तिरहितस्स तु राजयोगः ॥

**End :**

राजयोगपदं प्राप्य सर्वसत्त्ववशङ्करम् ।
सर्वं कुर्यान्न कुर्याद्वा यथारुचि विचेष्टितम् ॥
नग्नः कोऽपि गुहासु दिव्यवसनः कौपीनवासाः कचित्
दिव्यस्त्रीसुरतान्वितोऽपि कुहचित् स ब्रह्मचारी कचित् ।
भिक्षाहाररतः कचित् कचिदपि प्राप्नोति भोगास्पदं
सर्वत्राप्रतिबद्धवृत्तिरखिलक्लेशापहो योगिराट् ॥
श्रीमद्गोरक्षनाथेन सदामरौघवार्तिना ।
लयमन्त्रहठाः प्रोक्ता राजयोगाय केवलम् ॥
कायेनैव परीक्षेत वाक्पठः किं करिष्यति ।
चिकित्सापाठमात्रेण रोगिणः किं करिष्याति ॥

**Colophon :**

इति श्रीमद्गोरक्षनाथविरचितः अमरौघप्रबोधस्सम्पूर्णः ।

## No. 4340. अमरौघप्रबोधः.

## AMARAUGHAPRABŌDHAḤ.

Pages, 10. Lines, 8 on a page.

Begins on fol. 41*a* of the MS. described under No. 4337.

Same work as the above.

Complete.

## No. 4341. अमृतसिद्धियोगः.

## AMṚTASIDDHIYŌGAḤ.

Pages, 28. Lines, 20 on a page.

Begins on fol. 198*a* of the MS. described under No. 4336.

A treatise on how to attain self-realisation and salvatio through the practice of Yōga : by Virūpākṣasiddha.

**Beginning:**

अज्ञानविषनिद्रात्मा ज्ञानपीयूषधारया ।
निहता येन वैद्येन तस्मै श्रीगुरवे नमः ॥
सुशिष्याणां प्रबोधायामृतसिद्धिरिहोच्यते ।
प्रोत्साहायात्मनश्शान्त्यै सभ्यानां मदशान्तये ॥
श्लाघ्यं ज्ञानवतां सर्वं प्रोक्तं तु यदिदं मया ।
ज्ञानिनो यत्परानन्दं नन्दन्ते वीतरागिणः ॥
अज्ञानान्नैव वक्तव्यं दूषणं मम भाषणे ।
अज्ञानामात्मनश्चैव वक्तव्यं सत्यभाषणे ॥
क्षीरसारं यथा सर्पः यत्तत्सारं समुद्धृतम् ।
इदं गुरुप्रसादेन विधिवत्तन्मया कृतम् ॥
ज्ञानमेकं सविस्तारमुक्तं सिद्ध्यै प्रवर्तते ।
अधर्मसंस्थितैर्मूढैः सर्वं तद्व्याकुलीकृतम् ॥

ज्ञात्वा च सर्वशास्त्राणि भ्रान्त्वा पृथ्वीं ससागराम् ।
मुह्यन्ति ज्ञानमार्गे च सूर्यरश्मौ ग्रहा यथा ॥

गुरोस्सिद्धमुखाल्लब्ध्वा सोपायं तत्त्वमुत्तमम् ।
मन्त्राणामेव गुह्यार्थं समासेन वदाम्यहम् ॥

शरीरे यानि साराणि साध्यानि विविधानि च ।
कथयामि समासेन परिपाट्या न पूर्वधीः ॥

**End:**

महोदयो महाकायो अ(ह्य)व्ययो निष्कळो विभुः ।
व्यापी निरञ्जनो देवो योगी सर्वगतो विभुः ॥

इति महानिर्वाणविवेकः ॥

निर्यासं सर्वतत्त्वानां सर्वदर्शनसम्मतम् ।
बहुक्षीरे घृतं चै[व] तदुद्धृतं यत्नतो मया ॥

द्विनाम्नामृतसिद्धिस्तु सिद्धसोपानपद्धतिः ।
श्रीविरूपाक्षनाथेन कृते सद्योगिनां कृत(ते) ॥

यावत्सांसारिकं चक्रं भ्रमते भ्रमविभ्रमः ।
तावज्जीवतु लोकेषु श्रीविरूपाक्षसन्ततिः ॥

कृतमात्मप्रबोधाय प्रमोदाय च योगिनाम् ।
मुखं ज्ञानवतां पुंसां चमत्काराय केवलम् ॥

अज्ञानानां प्रबोधाय तथा विमृशशालिनाम् ।
कुतर्ककुमतीनां च कृतश्चे(तिश्चे)यं गळर्त(ग्र)हः ॥

शुभशौचामृतं वाच्यं तथा जीवितमोक्षयोः ।
त्रयाणां कथिता सिद्धिम(र)मृतसिद्धिरिहोच्यते ॥

स्वर्गे मर्त्ये च पाताळं(ले) ये च तिष्ठन्ति योगिनः
तेषां सुखमविच्छिन्नं प्रवर्तेत नभस्थमः(ले) ॥
त्रिभिर्ग्रन्थशतैस्सार्धं योगोपायस्सलक्षणः ।
प्रोक्तो गुणवतां पुंसां चक्षुर्भूतं सुनिर्मलम् ॥

**Colophon:**

इति श्रीविरूपाक्षसिद्धविरचितामृतसिद्धियोगस्समाप्तः ॥

## No. 4342. अमृतसिद्धियोगः.
## AMṚTASIDDHIYŌGAḤ.

Pages, 30. Lines, 8 on a page.

Begins on fol. 21*b* of the MS. described under No. 4337.

Same work as the above.

Complete.

---

## No. 4343. कपिलगीता.
## KAPILAGĪTĀ.

Substance, palm-leaf. Size, 16⅜ × 1½ inches. Pages, 42. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 13*a*. The other works herein are Adhyārōpaprakaraṇa 1*a*, Kāmakalāsūtra 9*a*, Vivēkacūḍāmaṇi 34*a*, Mudrāprakaraṇa 36*a*, Ajapāgāyatrīstōtra 44*a*.

Deals with the realisation of Sāṅkhya principles through the practice of Yōga.

Incomplete.

**Beginning:**

कपिलगीतायां योगशास्त्रे—

स्मृत्वा श्रीगुरुपादाब्जं नत्वा मोक्षार्थसिद्धिदम् ।
तारकाभ्यन्तरे पञ्च ब्रह्म(तत्त्व)न्त[त्व]दुच्यते ॥
पञ्चब्रह्म पञ्च देवाः पञ्चस्थानेषु सप्तधा ।
पञ्चमात्राः पञ्च वाचाः पञ्चशून्यास्तथैव च ॥
पञ्चावस्थाः पञ्चदेहाः पञ्चमात्रानुसंस्मृताः ।

**End :**

अन्तस्त्रिपुरक्रीडेतिव्यापकं सर्वदेहिनाम ।
एवमात्मा स्थितस्तत्र जात्यजस्य च लक्षणम् ॥
दृष्टिवाक्यादिव्यापारं लत(ा)वृक्षेषु वर्तते ।
जलमध्ये स्थितं पद्ममाकाशे भानु(ख)ती मतिः ॥

---

No. **4344.** चन्द्रावलोकनम्.

CANDRĀVALŌKANAM.

**Pages, 6.** Lines, 20 on a page.

Begins on fol. 220*a* of the MS. described under No. 4336.

A short treatise on the value of Yōga : supposed to have been taught by the great Lord Śiva.

Complete.

**Beginning :**

महेश्वर उवाच—

अन्तर्लक्ष्यं बहिर्दृष्टिः निमेषोन्मेषवर्जिता ।
इयं सा शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥
अन्तर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः पश्यन् न पश्येत्सदा ।
मुद्रेयं खलु खेचरी भवति सा युक्तप्रसादाद्गुरोः
शून्याशून्यविवर्जितं स्फुरति यत् तत्त्वं पदं शाम्भवम् ॥
अर्धोद्घाटितलोचनास्थिरमना नासाग्रदत्तेक्षणः
चन्द्रार्कावपि लीनतामुपगतौ निष्पन्दरूपं वपुः ।
ज्योतीरूपमशेषबाह्यरहितं देदीप्यमानं परं
तत्त्वं तत्पदमेति यत्तु परमं वाच्यं किमत्राधिकम् ॥
यस्मिन् लयेऽतिगर्भस्थे अ(ह्य)न्तेऽन्तर्लयवेदिने ।
लयस्सोऽपि च विज्ञेयः तुष्टेन गुरुणा युतः ॥

या चितिस्ससभूतानामुदयव्ययसाक्षिणी ।
तां चितिं पश्य कायस्थां पूर्णानन्दघनामृताम् ॥
शिवोऽन्यत्र मनोऽन्यत्र शक्तिरन्यत्र मारुतः ।
न सिध्यति वरारोहे कल्पकोटिशतैरपि ॥
ज्ञानं कुतो मनसि जीवति देवि यावत्
प्राणेऽपि जीवति मनो म्रियते न यावत् ।
प्राणो मनो द्वयमिदं विलयं प्रयाति
मोक्षं स गच्छति नरो न कथञ्चिदन्यः ॥

**End:**

एवं समभ्यसेत्तावत् यो ब्रह्माण्डमयो भवेत् ।
वायुर्बिन्दुस्तथा चक्रं चित्ते युक्तं समभ्यसेत् ॥
समाभिनैकेन सममृतं यान्ति योगिनः ।
यथाग्निर्दारुमध्यस्थो नोत्तिष्ठेन्मथनं विना ॥
विना चाभ्यासयोगेन ज्ञानदीप्तिर्न चैव हि ।
घटमध्ये यथा दीपो बाह्ये नैव प्रकाशयेत् ॥
भिन्ने तस्मिन् गते चैव दीपज्वालावभासते ।
स्वभावं घटमित्युक्तं दीपमेव हि तत्पदम् ॥
गुरुवाक्यात्समाभिन्ने ब्रह्मज्ञानं स्फुटीभवेत् ।
कर्णधारं गुरुं प्राप्य कृत्वा सूक्ष्मान्तराणि च ॥
अभ्यासवाह(स)नासक्तास्तरन्ति भवसागरम् ।

मत्स्येन्द्र उवाच—

तव पादप्रसादेन मुक्तोऽहं भवबन्धनात् ।
त्वं गतिर्देवदेवेश नान्यथा मेऽस्ति शङ्कर ॥
श्रुत्वा मत्स्येन्द्रवाक्यन्तु प्रविष्टो भगवान् शिवः ।
गच्छ पुत्र पृथिव्यां त्वं त्रैलोक्यं चोद्धरिष्यसि ॥

**Colophon:**

इति महेश्वरेण विरचितं चन्द्रावलोकनं सम्पूर्णम् ॥

## No. 4345. चन्द्रावलोकनम्.
## CANDRĀVALŌKANAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 46*a* of the MS. described under No. 4337.

Same work as the above.

Complete.

---

## No. 4346. दत्तात्रेयबोधः.
## DATTĀTRĒYABŌDHAḤ.

Pages, 13. Lines, 20 on a page.

Begins on fol. 230*a* of the MS. described under No. 4336.

Complete.

A short treatise on the practice Yōga as described by Dattātrēya.

Author unknown.

**Beginning :**

. . . . . त्मा न स्थिरो देहजीवकः ।
बहुकालसमाभ्यासात् स्थिरो भवति शाश्वते ॥
पश्चान्नास्ति रुजो(जा)देहे वार्धक्यं नैव दृश्यते ।
सिद्धस्सर्वगुणोपेतो नानाचिह्नैरुपस्थितः ॥
गुप्तलिङ्गी सदा काले वर्तते वनमध्यतः ।
सुतनुर्वितनुः क्वापि प्राणिनां प्रविभासते ॥
अतर्क्यमहिमा यस्मात् तस्मात्तं नावमानयेत् ।
अश्रद्दधानः पापात्मा नास्तिके(को) भिन्नसंशयः ॥
हेतुको बकवृत्तिश्च तेषां योगी न गोचरः ।
तस्य लीलां न जानन्ति निन्दां कुर्वन्ति येऽधमाः ॥
योगीश्वरस्य पापिष्ठाः पतन्ति नरके ध्रुवम् ।
जनोऽपि योगिनां देहे वितर्कं नैव कारयेत् ॥
क्रीडन्ति लोकमध्ये तु यथा वै प्राकृतो नरः ।
योगीश्वरस्य योगस्य योगशास्त्रस्य पार्वति ॥

निन्दां च ये प्रकुर्वन्ति राक्षसास्ते न राक्षसाः ।
पाषण्डिनः पापरताः स्वधर्मविमुखास्तु ते ॥
यैश्चावमानितो योगी तेषां त्राता न भूतले ।
आयुः कान्तिर्यशः पुण्यं नश्यन्ते(न्त्ये)तस्य सुव्रते ॥
यस्य योगे मतिर्दृष्टा जायते मोक्षरूपिणी ।
स्वधर्मप्रतिकूलो यो योगस्तस्य न रोचते ॥

**End:**

तदावस्थादिनिष्पन्ना उन्मन्यानन्दरूपिणी ।
संसिद्धा योगिनश्चास्य भुक्तिं मुक्तिं प्रदापयेत् ॥
सर्वं तु कलितं ब्रह्मन् संस्तुतं योगमाचरेत् ।
सर्वसिद्धिमवाप्यास्मद्दत्तात्रेयप्रसादतः ॥
यस्तदित्थं पठेन्नित्यं साधुभ्यः कथयेदिति ।
तस्य योग(ः)क्रमेणैव स्निग्ध(सिध्य)त्येव न संशयः ।
योगिनोऽभ्याससंसक्ता अरण्येषु गृहेषु वा ।
बहुकालं रमन्त्येव जनसङ्गविवर्जिताः ॥
तस्मात्सर्वप्रयत्नेन साङ्गमेव समभ्यसेत् ।
योगाभ्यासो जन्मफलं निष्फला इतराः क्रियाः ॥
महामायाप्रभावेण सर्वेषामस्तु चित्सुखम् ।
यत्र(त)स्सर्वरसद्मा यत्तत्(त्तः) तामेवाराधयेत्ततः ॥

**Colophon:**

इति दत्तात्रेयबोधस्समाप्तः ॥

No **4347.** **दत्तात्रेयबोधः.**

DATTĀTRĒYABŌDHAḤ.

**Pages**, 15. Lines, 8 on a page.

Begins on fol. 59*a* of the MS. described under No. 4337.

Same work as the above.

Complete.

## No 4348. नादानुसन्धानपञ्चकम्.

## NĀDĀNUSANDHĀNAPAÑCAKAM.

Pages, 1. Lines, 15 on a page.

Begins on fol. 5*a* of the MS. described under No. 1021.

On certain sounds that are heard during certain stages in the practice of Yōga.

Complete.

**Beginning**:

यावत्क्षणं क्षणार्धं [वा] स्वरूपपरिचिन्तनं क्रियते ।
तावद्दक्षिणकर्णे त्वनाहतश्श्रूयते नादः ॥
सिद्ध्यारम्भस्थितयो विश्रमविश्वासबुद्धीनाम् ।
उपलक्षणं हि मनसः परमं नादानुसन्धानम् ॥

**End**:

नादाभ्यन्तरवृत्तिर्ज्योतिर्यद्दृश्यते स(सु)चिरम् ।
तत्र मनो लीनं चेन्न पुनस्संसारबन्धाय ॥

**Colophon**:

इति नादानुसन्धानपञ्चकं सम्पूर्णम् ॥

## No 4349. पातञ्जलयोगसूत्रम्.

## PĀTAÑJALAYŌGASŪTRAM.

Substance, paper. Size, $4\frac{5}{8} \times 3\frac{1}{2}$ inches. Pages, 14. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, not new.

The aphorisms explaining the Yōga system of philosophy: by Patañjali.

Complete.

**Beginning**:

अथ योगानुशासनम् । योगश्चित्तवृत्तिनिरोधः । [ताश्च क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः] तदा द्रष्टुः स्वरूपेऽवस्थानम् । वृत्तिसारूप्यमितरत्र । वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाः । प्रमाण-

विपर्ययविकल्पनिद्रास्मृतयः । प्रत्यक्षानुमानागमाः प्रमाणानि । विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् । शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः । अभावप्रत्ययालम्बना वृत्तिर्निद्रा । अनुभूतविषयासम्प्रमोह(ष): स्मृतिः । अभ्यासवैराग्याभ्यां तन्निरोधः । तत्र स्थितौ यत्नोऽभ्यासः ।

स तु दीर्घकाल(लादर)नैरन्तर्यसत्कारसेवितो दृढभूमिः ।

**End:**

क्षणप्रतियोगी परिणामोऽपरान्तनिर्ग्राह्यः क्रमः । पुरुषार्थशून्यानां प्रतिप्रसवः कैवल्यम् । स्वरूपप्रतिष्ठा वा चितिशक्तिरिति ॥

इति कैवल्यपादश्चतुर्थः ॥

Contains—

| | | |
|---|---|---|
| प्रथमे योगपादे सूत्राणि | ... | ५२ |
| द्वितीये साधनपादे सूत्राणि | ... | ५५ |
| तृतीये विभूतिपादे सूत्राणि | ... | ५५ |
| चतुर्थे कैवल्यपादे सूत्राणि | ... | ३४ |

**Colophon:**

श्रीमत्पातञ्जलं योगसूत्रपादचतुष्ककम् ।
आन्ध्रलिप्या व्यलिलिखता(त्क)नकाम्बातनूभवः ॥

चन्द्रार्क(ङ्क)रागभू १७९१ शाके विभवे श्रावणे सिते ।
दशमीगुरुवारे श्रीकृष्णेन लिखितं त्विदम् ॥

शब्दानामनुशासनं विदधता पातञ्जले[:]कुर्वता
वृत्तिं राजमृगाङ्कसंज्ञिकमपि व्यातन्वता वैद्यके ।

वाक्चेतोवपुषां मलः फणभृतां भर्त्रेव येनोद्धृत-
स्तस्य श्रीरणरङ्गमल्लनृपतेर्वाचो जयन्त्युज्ज्वलाः ॥

## No. 4350. पातञ्जलयोगसूत्रम्.

## PĀTAÑJALAYŌGASŪTRAM.

Pages, 8. Lines, 6 on a page.

Begins on fol. 91*a* of the MS. described under No. 3472.

Incomplete.

Same work as the above.

Breaks off in Vibhūti-pāda.

## No. 4351. पातञ्जलयोगसूत्रम्–व्याख्यासहितम्.

## PĀTAÑJALAYŌGASŪTRAM : WITH COMMENTARY.

Substance, paper. Size, $9\frac{3}{4} \times 4\frac{7}{8}$ inches. Pages, 102. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Advaitacandrikā 52*a*.

Complete.

Same work as the above with the commentary of Nārāyaṇatīrthasvāmin, a disciple of Rāmagōvinda-tīrtha.

**Beginning:**

श्रीकृष्णं सच्चिदानन्दं नत्वाथ क्रियते मया ।
योगसूत्रेषु व्याख्यानं सङ्क्षेपेण न विस्तरात् ॥

इह खलु श्रुतिस्मृतीतिहासाद्यखिलवाङ्मयप्रसिद्धधर्मार्थकाममोक्षपुरुषार्थचतुष्टयेषु तावत् मोक्षः परमपुरुषार्थः ; स च श्रवणमनननिदिध्यासनसाध्यः ; तत्रापि अखिलाकृतस्यासाधारणकारणीभूतस्याष्टाङ्गयोगेन प्रायेण कबलीकृतस्य एतन्मताभिमतस्य च यथायथं मोक्षाणिमादिसिद्धये च भगवान्पतञ्जलिः समाधितत्साधनविभूतिकैवल्याख्यपादचतुष्टयात्मकैरध्याय(यैः)परिमितानि सूत्राणि चकार । तेषु च सूत्रेषु भगवान्बादरायणिर्भाष्यं चकार । तदुपरि च सर्वतन्त्रस्वतन्त्रा वाचस्पतिमिश्राः टीकां

चक्रुः । तत्र भाष्यतट्टीकायां चातिगम्भीरत्वात् न सहसा सूत्रार्थमीष-द्युत्पन्नैर्मुमुक्षुभिरन्यैर्वा सूत्रार्थजिज्ञासुभिर्लब्धुं शक्यते; तथा च तदनुग्रहाय तानेवाश्रित्य सूत्रार्थबोधिनी वृत्तिरारभ्यते । तत्रेदमाद्यं सूत्रमथेति—

अथ योगानुशासनम् । अथशब्द आरम्भार्थः, श्रुतमात्रेण मङ्गल-प्रयोजनकश्च । शस्यते अनेनेति शासनं शास्त्रं योगानामनुशासनं योगानुशासनम्; तथाच योगशास्त्रमारभ्यत इत्यर्थः । तत्र संप्रज्ञाता-संप्रज्ञातभेदेन वक्ष्यमाणेन द्विविधयोगस्य साधारणं लक्षणमाह योग इति—योगश्चित्तवृत्तिनिरोधः ।

End:

पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यम् । स्वरूपं स्वरूपप्र-तिष्ठा वा चि(ति) शक्तिरिति ॥

Colophon:

इति पातञ्जले साङ्ख्यप्रवचने योगशास्त्रे कैवल्यपादः चतुर्थः समाप्तः ॥

कृतकर्तव्यतमा(नां)पुरुषार्थशून्यानां गुणानां लिङ्गशरीराद्यात्मकानां यः प्रसवः स्वकारणेऽत्यन्तविलापः अनागतावस्थं शून्यत्वमिति यावत् । सा बुद्धेः कैवल्यम् । एतदेव प्रधानस्याज्ञानिपुरुषं प्रति कैवल्यमुच्यते । तेन सह पुरुषेण सहासंयोगात् । एवं चितिशक्तिः स्वरूपप्रतिष्ठा वा बुद्धिसत्त्वो(द)यादिधीस्वरूपशून्यता वा कैवल्यम्; स्वरूपतोऽस्वच्छन्द-स्यापि स्फटिकस्य जपाकुसुमाद्यपाये स्वरूपप्रतिष्ठावत् । तथाच निरुपा-धिकतया सार्वदिकी स्थितिरेव कैवल्यम्; साम्यता चोपाधिनिवृत्तेरेवेति भावः ॥

तीर्थराजे प्रयोगेऽस्मिन् योगसूत्रार्थवर्णनम् ।
नारायणो भिक्षुवर्यो व्यासे(ते)ने हरितुष्टये ॥

**Colophon** :

इति श्रीपरमहंसपरिव्राजकाचार्यरामगोविन्दतीर्थभगवत्पूज्यपादशिष्य नारायणतीर्थस्वामिविरचिता पातञ्जलसूत्रव्याख्या [न] समाप्ता ॥

---

No. 4352. पातञ्जलयोगसूत्रविवृतिः.

PĀTAÑJALAYŌGASŪTRAVIVṚTIḤ.

Substance, paper. Size, $8\frac{3}{8} \times 6$ inches. Pages, 76. Lines, 30 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A well-known commentary on the Pātañjala-yōgasūtras by Bhōjarāja.

**Beginning** :

प्रणम्य नागनायकातपत्रधारिणं हरिम् ।
कृतिं पतञ्जलेरिमां करोमि योगिमोदिनीम् ॥
देहार्धयोगाश्शिवयोः सः श्रेयांसि तनोतु वः ।
दुष्प्रापमपि यत्स्मृत्या जनः कैवल्यमश्नुते ॥
त्रिविधान्यपि दुःखानि यदनुस्मरणान्नृणाम् ।
प्रयान्ति विलयं सद्यः तं नुमश्शिवमव्ययम् ॥
पतञ्जलिमुनेरुक्तिः काप्यपूर्वा जयत्यसौ ।
पुंस्प्रकृत्योर्वियोगोऽपि योग इत्युदितो यया ॥

जयन्ति वाचः फणिभर्तुरान्तरस्फुरत्तमस्स्तोमनिशाकरत्विषः ।
विभाव्यमानास्सततं मनांसि यास्सतां सदानन्दमयानि कुर्वते ॥

शब्दानामनुशासनं विदधता पातञ्जले[ः]कुर्वता
वृत्तिं राजमृगाङ्कसंज्ञिकमपि व्यातन्वता वैद्यके ।
वाक्चेतोवपुषां मलः फणभृतां भर्त्रेव येनोद्धृतः
तस्य श्रीरणरङ्गमल्लनृपतेर्वाचो जयन्त्युज्ज्वलाः ॥

दुर्बोधं यदतीव तद्विजहति स्पष्टार्थमित्युक्तिभिः
स्पष्टार्थेष्वतिविस्तृतिं विदधति व्यर्थैस्समासादिकैः ।
अस्थानेऽनुपयोगिभिश्च बहुभिर्जल्पैर्भ्रमं तन्वते
श्रोतृणां मतिवस्तुविप्लवकृतस्सर्वेऽपि टीकाकृतः ॥

उत्सृज्य विस्तरमुदस्य विकल्पजालं फल्गुप्रकारमवधार्य च सम्यगर्थान् ।
अन्तः पतञ्जलिमते विवृतिर्मतोऽयमातन्व(न्य)ते बुधजनप्रतिबोधहेतुः ॥

अथ योगानुशासनम् ।

अनेन सूत्रेण शास्त्रस्य सम्बन्धाभिधेयप्रयोजनान्याख्यायन्ते । अथशब्दोऽधिकारद्योतको मङ्गळार्थकश्च । युक्तिर्योगः समाधानमनुशिष्यते व्याख्यायते लक्षणभेदोपायफलैर्येन तदनुशासनं योगस्यानुशासनम्; तथा (चा)शास्त्रपरिसमाप्तेरधिकृतं बोद्धव्यमित्यर्थः । तत्र शास्त्रस्य व्युत्पादकतया योगस्ससाधनः सफलोऽभिधेयः तद्व्युत्पादनं च फलम् । व्युत्पादितस्य योगस्य च कैवल्यं फलम् । शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभावलक्षणस्संबन्धः, अभिधेयस्य योगस्य तत्फलस्य च कैवल्यस्य साध्यसाधनभावः । एतदुक्तं भवति—व्युत्पादितस्य योगस्य साधनानि शास्त्रेण प्रदश्य(दर्श्य)न्ते । तत्साधनसिद्धो योगः कैवल्याख्यं फलमुत्पादयति । तत्र को योग इत्याह—योगश्चित्तवृत्तिनिरोधः ।

**End:**

योगिचित्तस्य चित्तान्तरवैलक्षण्यमभिधाय, तत्कर्मणामलौकिकत्वं चोपपाद्य, विपाकानुगुणवासनानामभिव्यक्तिसामर्थ्यं कार्यकारणयोश्चैक्यप्रतिपादनेन व्यवहितानामपि वासनानामानन्तर्यमुपपाद्य, तासामानन्त्येऽपि हेतुत्वादिद्वारेण हानिमुपदिश्यातीतानागतादिषु धर्माणां सद्भावमुपपाद्य, विज्ञानवादं निराकृत्य, साकारवादं च प्रतिष्ठाप्य, पुरुषस्य ज्ञातृत्वमुक्त्वा, चित्तद्वारेण सकलव्यवहारनिष्पत्तिमुपपाद्य, पुरुषसिद्धप्रमाणमुपदर्श्य, कैवल्यनिर्णयाय दशभिः सूत्रैः क्रमेणोपयोगिनोऽर्थानभिधाय, शास्त्रान्तरेष्वेतदेव कैवल्यस्वरूपं निर्णीतमिति कृतः कैवल्यपादश्चतुर्थः ॥

**Colophon :**

सर्वे यस्य वशाः प्रतापनृपतेः पादान्तसेवानति·
प्रभ्रश्यन्मकुटेषु मूर्धसु दधत्याज्ञां धरित्रीभृतः ।
यद्वक्त्राम्बुजमाप्य वर्ग(गर्व)मसमं वाग्देवतापि श्रिता
स श्रीभोजपतिः फणाधिपतिकृत्सूत्रेषु वृत्तिं व्यधात् ॥

**Colophon:**

इति श्रीधारेश्वरविरचितायां राजमार्ताण्डाभिधानायां पातञ्जलयोग-सूत्रवृत्तौ कैवल्यपादश्चतुर्थः ॥

शाके चन्द्राङ्करागक्षितिविभव (१७९१) समे श्रावणे मासि शुक्ले-
ऽनूराधायुग्दशम्यां दिविजगुरुदिने लेखनं पूर्णमि(मै)ष्यत् ।
हारीतान्वयतर्कमळ्ळकनकाम्बासूनुना वेङ्कट-
श्रीकृष्णेन सटीकमान्ध्रलिपिना श्रीयोगपातञ्जलम् ॥
श्रीमत्पातञ्जलं योगसूत्रं वृत्तिसमन्वितम् ।
आन्ध्रलिप्या व्यलिलिखत् कनकाम्बातनूभवः ॥

## No. 4353. मार्कण्डेययोगः.

## MĀRKAṆḌĒYAYŌGAḤ.

**Pages,** 28. Lines, 20 on a page.

Begins on fol. 251*b* of the MS. described under No. 4336.

Yōga as taught by Mārkaṇḍēya.

This is found in the Mārkaṇḍēya-purāṇa, and is said to have been related by Dattātrēya to Alarka.

**Beginning:**

दत्तात्रेयं ततो विप्रं प्रणिपत्य स पार्थिवः ।
प्रत्युवाच महात्मानं प्रश्रयावनतो वचः ॥
सम्यक् प्रपश्यतो ब्रह्मन् मम दुःखं न किंचन ।
असम्यग्दर्श(र्शि)नो मग्नाः सर्वे दै(वैथै)व सुखार्णवे ॥

यस्मिन् यस्मिन् समासक्ता संवित्पुंसः प्रजायते ।
ततस्ततस्समादाय दुःखान्येव प्रयच्छति ॥
मार्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे ।
न तादृङ्ममता शून्ये कलविङ्के च मूषिके ॥
सोऽहं न दुःखी न सुखी यतोऽहं प्रकृतेः परः ।
यो भूताभिभवो भूतैस्सुखदुःखात्मको हि सः ॥

दत्तात्रेयः—

एवमेतन्नरव्याघ्र यथैतद्व्याहृतं त्वया ।
ममेति मूलं दुःखस्य न ममेति च निर्वृतिः ॥

End:

मनो ब्रह्मणि सन्धास्ये तज्जये परमो जयः ।
संसाध्यमन्यत्तत्सिद्धौ यतः किञ्चिन्न विद्यते ॥
सोऽहं न तेऽरिर्न ममास्ति शत्रुस्सुबाहुरप्येष न मेऽपकारी ।
दृष्टं मया सर्वमिदं यथात्मा अ(त्व)न्विष्यतां भूप रिपुस्त्वदन्यः ॥

पुत्रः—

इत्थं स तेनाभिहितो नरेन्द्रो हृष्टस्समुत्थाय ततस्सुबाहुः ।
दिष्ट्येति स भ्रातरमभ्यनन्दत्काशीश्वरं वाक्यमिदं बभाषे ॥

Colophon:

श्रीमार्कण्डेयपुराणे अलर्कोपाख्याने सप्तत्रिंशोऽध्यायः ॥

---

## No. 4354. मार्कण्डेययोगः.

## MĀRKAṆḌĒYAYŌGAḤ.

Pages, 62. Lines, 8 on a page.

Begins on fol. 85*a* of the MS. described under No. 4337.

Complete.

Same work as the above.

## No. 4355. योगतत्त्वदीपिका.

## YŌGATATTVADĪPIKĀ.

Pages, 2. Lines, 22 on a page.

Begins on fol. 1*b* of the MS. described under No. 1021.

Complete in 16 stanzas.

A brief description of the nature and value of Yōga: by Aṣṭāvakra.

**Beginning**:

यत्र वियोगसुयोगौ न स्तो वैषयिकदुःखसुखवृत्तेः ।
तं विदुरात्मज्ञवरा योगं नित्यात्मभावसंस्थानम् ॥
रेचकमिति पूरकमिति कुम्भकमिति चाहुरस्य बाह्यत्वम् ।
न हि तत्कृतिसाध्यं स्याद्यत्र मनो लीयते तदेवैतत् ॥
दिवि सूर्यो भुवि चन्द्रः चित्रमिदं नद्विसर्गसंसर्गौ ।
जनयति कालस्सूक्ष्मः तं जानन् योगवैभवं भुङ्क्ते ॥

**End**:

नौलिकहस्तिकमुख्यैः षड्भिः कर्मभिरपास्य सर्वाधीन् ।
अभ्यासं प्रचरेद्वा यदि न प्राणगतिमात्रदृष्ट्यालम् ॥
मूलं बद्ध्वा सम्यग्वोड्याणं जालबन्धमपि यत्नात् ।
नैव श्रमो हि कार्यः स्वप्राणोभयगती विचिन्वानः ॥
हिमकरदिनकरकोटिप्रभामयं ज्योतिरनिशमभियुज्य ।
तन्मयतां समवाप्य स्वात्मानन्दामृताब्धिमवगाहेत् ॥
षोडशभिः श्लोकानां सङ्ख्याभिर्योगमार्गसङ्क्षेपः ।
कथितोऽस्माभिस्सुखदो गृह्णन्तु सुखेन जगति धीमन्तः ॥

**Colophon**:

इति अष्टावक्रप्रोक्तयोगतत्त्वदीपिकार्याषोडशकं सम्पूर्णम् ॥

## No. 4356. योगतारावलिः.

## YŌGATĀRĀVALIḤ.

**Pages**, 3. Lines, 20 on a page.

Begins on fol. 236*a* of the MS. described under No. 4336.

Complete.

A short account of the nature and value of the practice of Yōga.

By Gōvindabhagavatpūjyapāda, probably the well-known Guru of the famous Śaṅkarācārya.

**Beginning:**

वन्दे गुरूणां चरणारविन्दं सन्दर्शितस्वात्मसुखाम्बुधीनाम् ।
जनस्य यत् ज्ञानशिखायमानं संसारहालाहलमोहशान्त्यै ॥
सदाशिवोक्तानि सपादकोटिलयावसानानि लसन्ति भूमौ ।
नादा(नुसन्धा)नसमाधिमेकं मन्यामहे नान्यतमं लयानाम् ॥
सरेचपूरैरनिलस्य कुम्भैः सर्वासु नाडीषु विरोधितासु ।
अनाहताख्या(ख्यो) बहुभिः प्रकारैरन्तःप्रवृत्तेस्तु सदा निनादः ॥
नादानुसन्धानसमाधिभाजां योगीश्वराणां हृदये प्रगूढम् ।
आनन्दमात्रं वचसामवाच्यं जानाति तं(संहित)नाध(द)एव ॥
नादानुसन्धान नमोऽस्तु तुभ्यं त्वां मन्महे तत्त्वपदं लयानाम् ।
भवत्प्रसादात् पवनेन साकं विलीयते विष्णुपदे मनो मे ॥
जालन्धरोड्याणकमूलबन्धान् जल्पन्नकण्ठोदरपायुनेयान् ।
बन्धत्रयेऽस्मिन् परिचीयमाने बन्धः कुतो दारुणकालपाशात् ॥
उड्याणजालन्धरमूलबन्धैरुन्निद्रितायामुरगाङ्गनायाम् ।
प्रत्यङ्मुखत्वात् प्रविशन् सुषुम्नां गमागमौ मुञ्चति गन्धवाहः ॥
उत्थापिताधारहुताशनोल्कैराकुञ्चनैः शश्वदपानवायोः ।
सन्तापितां चन्द्रमसः पतन्तीं पीयूषधारां पिबतीह धन्यः ॥
बन्धत्रयाभ्यासविपाकजातां विवर्जितां रेचकपूरकाभ्याम् ।
विशोषयन्तीं विषयप्रवाहैर्विद्यां भजे केवलकुम्भरूपाम् ॥

**End:**

विच्छिन्नसङ्कल्पविकल्पमूले निश्शेषमुन्मूलितकर्मजाले ।
निरन्तराभ्यासनितान्तभद्रा विजृम्भते योगिनि योगमुद्रा ॥
प्रकाशमाना(ने परमा)त्मभानौ नश्यत्यविद्यातिमिरे समस्ते ।
अहो बुधा निर्मलदृष्टयोऽपि किञ्चिन्न पश्यन्ति जगद्विचित्रम् ॥
सिद्धिं तथाविधमनोविलयं प्रयाने श्रीशैलशृङ्गकुहरेषु गतो(तथो)पलस्य(स्ये) ।
गात्रं यथा मम लताः परिवेष्टयन्ति श्रोत्रं यथा विरचयन्ति खगाश्च नीडम् ॥
अचिन्त्यमहिमारूपा चिन्तादिपरिवर्जिता ।
अचिन्त्यपददा साक्षात् राजते खेचरी परा ॥

**Colophon:**

. इति योगतारावलिस्समाप्तः ॥

---

## No. 4357. योगतारावलिः.

## YŌGATĀRĀVALIḤ.

Substance, palm-leaf. Size. 16½ × 1¼ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यषड्दर्शनीस्थापनाचार्यगोविन्दभगवत्पादपूज्य(त्पूज्यपाद)विरचिता योगतारावलिस्सम्पूर्णा ॥

## No. 4358. योगतारावलिः.

## YŌGATĀRĀVALIḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 65*a* of the MS. described under No. 4337.

Complete.

Same work as the above.

## No. 4359. योगतारावलिः.

## YŌGATĀRĀVALIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 24*a* of the MS. described under No. 2372.

Contains only 25 stanzas. Author unknown.

Similar to the above work.

**Beginning :**

अत्र शृणु महावाक्यं राजयोगाभिधानकम् ।
इमं(दं) सद्गुरुणा याति सज्जनो नान्यकर्मभिः ॥
दुष्कर्माभ्यासयोगेन महायासेन किं फलम् ।
क्षणेन लभते ब्रह्म सद्गुरोरवलोकनात् ॥
बाह्यमाभ्यन्तरं ब्रह्म सर्वजन्तुषु भासते ।
तथापि गुरुमज्ञात्वा ते न पश्यन्ति तत्पदम् ॥
खण्डज्ञानवतां च षट्समयतन्मोहान्धकारात्मनां
नानावेदपुराणशास्त्रकवितावाग्वैशदीशालिनाम् ।
मूढानां चतुराश्रमैकनियमाद्वर्वात्मकानां कथं
योगज्ञानमिदं भवेद्गुरुमुखाभावे परोक्षान्वितम् ॥
क्षत्रार्थरम्यगृहपुत्रकळत्रमित्रहीनैर्महारसरसायनधातुवादैः ।
ते काम्यमन्त्रलययोगहठाभिधाना भ(भेदात्मनां) कथमिह श्री(स्व)गुरोः
[प्रसादः ॥

अन्तर्लक्ष्यं बहिर्दृष्टिर्निमेषोन्मेषवर्जितः ।
एषा सा शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥
अन्तश्चेतो बहिश्चक्षुरधिष्ठाय सुखासनम् ।
ममत्वं च शरीरस्य ज्ञानमुद्रेति शिधि(सिद्धि)दा ॥
तिर्यगूर्ध्वमधोदृष्टिर्विना वाक्यं महामते ।
भावयेदेकमात्मानमान्तरं चित्स्वरूपिणम् ॥

निराकारं निरालम्बं निष्प्रपञ्चं निरालयम्
निरामयं निराहारं तत्त्वं तत्त्वविदो विदुः

निराटङ्के निरालम्बे निष्प्रपञ्चे निरामये ।
योगी योगविधानेन परब्रह्मणि लीयते ॥

End

निर्वर्तयन्तीं निखिलेन्द्रियाणि प्रवर्तयन्तीं परमात्मयोगे ।
संविन्मयीं तां सहजामनस्कां निद्रां सखे निर्विश निर्विकल्पाम् ॥
प्रकाशमाने परमात्मभावं(नौ) नश्यन्ति(त्य)विद्यातिमिरं(रे)समस्थे(स्ते) ।
अहो बुधा निर्मलदृष्टयोऽपि किञ्चिन्न पश्यन्ति जगत्प्रपञ्चम् ॥
शीधं(सिद्धे)तथा मम मनोविलयं(ये)समाधौ श्रीशैलशृङ्गकुहरेषु तथो-
पलप्स्ये ।
गात्रं यथा मम लताः परिवेष्टयन्ति कर्णे यथा विरचयन्ति शुकाश्च नी-
डा(न्) ॥

विहरतु मतिरेषां निर्विकल्पे समाधौ
कुचकलशयुगे वा कृष्णसारेक्षणानाम् ।
रच(य)तु ज[व]व(न)नासञ्जल्पमल्पं समन्ता-
दधिकृतगुणदोषौ मां विभुं न स्पृशन्ति ॥

अहिमिव जनसङ्गं सर्वदा वर्जयेद्यः
कुणपमिव सुनारीं त्यक्तकामो विरागी ।
विषमिव विषयाद्यान् मन्यमानो दुरन्तो
जगति परमहंसो मुक्तिभावं समेति ॥

आसनं शीथ(सिद्ध)सदृशं न नाद[द]सदृशो लयः ।
न खेचरीसमा मुद्रा न कुम्भः केवलोपमा(मः) ॥

## No. 4360. योगबीजम्.
## YŌGABĪJAM.

Pages, 19. Lines, 20 on a page.

Begins on fol. 186*b* of the MS. described under No. 4336.

Complete.

This describes how the salvation of Mōkṣa may be attained through the practice of Yōga and purports to have been related to Pārvatī by Śiva.

**Beginning:**

श्रीदेव्युवाच—

नमस्ते परिपूर्णाय जगदानन्दहेतवे ।
सदाशिव जगन्नाथ कारुण्यामृतवारिधे ॥
सर्वे जीवास्सुखैर्दुःखैर्मायाजालेन वेष्टिताः ।
तेषां मुक्तिः कथं देव कृपया वद शङ्कर ॥
सर्वसिद्धिकरो मार्गो मायाजालनिकृन्तकः ।
जन्ममृत्युजराव्याधिनाशकस्सुखदो वद ॥
नानामार्गास्त्वया मार्गकथितास्स्म महेश्वर ।
अधुना मोक्षदं मार्गं ब्रूहि योगविदां वर ॥

ईश्वर उवाच—

बद्धा येन विमुच्यन्ते नाथ(थे)मार्गमतः परम् ।
तमहं कथयिष्यामि तव प्रीत्या सुरेश्वरि ॥
नानामार्गैस्तु दुष्प्रापं कैवल्यं परमं पदम् ।
सिद्धिमार्गेण लभ्येत नान्यथा शिवभाषितम् ॥

**End:**

इत्येतत्कथितं देवि योगसिद्धस्य लक्षणम् ।
सिद्धिभिः परिहीनं तु नरं बद्धं तु लक्षयेत् ॥
अजरामरपिण्डो यो जीवन्मुक्तस्स उच्यते ।

चिन्मयानि शरीराणि इ(त्वि)न्द्रियाणि तथैव च ॥
ब्रह्मदेवत्वमापन्नं यथैवालङ्घनत्ववत् ।
एतत्ते कथितं देवि तव प्रीत्या सुरेश्वरि ॥
गोपनीयं प्रयत्नेन क्रूरे धूर्ते शठे खले ।
दातव्यं शिवभक्तेषु सदाचारपरेषु च ॥
योगबीजं महागुह्यं यन्मया प्रकटीकृतम् ।

श्रीदेव्युवाच—

गतो मे संशयो नाथ कृपया तव शङ्कर ।
नमस्ते योगिराजाय सर्वज्ञाय नमो नमः ॥

**Colophon:**

इति योगबीजं सम्पूर्णम् ॥

## No. 4361. योगबीजम्.

## YŌGABĪJAM.

**Pages**, 20. Lines, 8 on a page.

Begins on fol. 9*a* of the MS. described under No. 4337.

Complete.

Same work as the above.

## No. 4362. योगयाज्ञवल्क्यगीता.

## YŌGAYĀJÑAVALKYAGĪTĀ.

**Substance**, palm-leaf. Size, $9\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 42. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 27*a*. The other work herein is Haṭhayōgapradīpikā 1*a*.

A treatise on Aṣṭāṅga-yōga in the form of a dialogue between Yājñavalkya and Gārgī.

It consists of twelve chapters.

Complete.

**Beginning**:

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यमुनिश्रेष्ठं कृष्णं हरिहरप्रभुम् ॥

याज्ञवल्क्यमुनिश्रेष्ठं सर्वज्ञं न (च मु)निर्मलम् ।
सर्वशास्त्रार्थतत्त्वज्ञं सदाध्ययनतत्परम् ॥

वेदवेदान्ततत्त्वज्ञं योगे च परिनिष्ठितम् ।
ब्रह्मविद्भिर्महाभागैर्ब्राह्मणैश्च समावृतम् ॥

सर्वभूतहितं शान्तं मन्त्रसिद्धं गतक्लमम् ।
जितेन्द्रियं जितक्रोधं जिताहारं जितश्रमम् ॥

जितशास्त्रं जितामित्रं ब्रह्मण्यं ब्राह्मणप्रियम् ।
तपोवनगतं सौम्यं सन्ध्योपासनतत्परम् ॥

गुणज्ञं सर्वभूतेषु परार्थैकप्रयोजनम् ।
ब्रुवन्तं परमं योगमृषीणां वरतेजसाम् ॥

तमेवंगुणसम्पन्नं नारीणामुत्तमा वधूः ।
मेधावती महाभागा गार्गी ब्रह्मविदां वरम् ॥

सभामध्यगतं चैनमृषीणामुग्रतेजसाम् ।
प्रणम्य दण्डवद्भूमौ गार्गी तद्वाक्यमब्रवीत् ॥

भगवन् सर्वशास्त्रज्ञ सर्वभूतहिते रत ।
योगतत्त्वं मम ब्रूहि साङ्गोपाङ्गविधानतः ॥

एवं पृष्टस्सभामध्ये भगवान् स प्रियां ततः ।
ऋषीनालोक्य नेत्राभ्यां वाक्यमेतदभाषत ॥

याज्ञवल्क्य

उत्तिष्ठोत्तिष्ठ भद्रं ते गार्गि ब्रह्मविदां वरे ।
वक्ष्यामि योगसर्वस्वं ब्रह्मणा कथितं पुरा ॥

* * * *

जातस्य द्विविधौ ज्ञेयौ पन्थानौ श्रुतिचोदितौ ।
अनुष्ठितौ हि विद्वद्भिः प्रवर्तकनिवर्तकौ ॥
वर्णाश्रमोक्तं यत्कर्म काम्यसङ्कल्पपूर्वकम् ।
प्रवर्तकं भवेदे(त)त्पुनरावृत्तिहेतुकम् ॥

**End:**

एतत्पवित्रं परमं योगमष्टाङ्गसंयुतम् ।
ज्ञानगुह्यतमं पुण्यं कीर्तितं ते वरानने ॥
इत्येतच्छृणुयान्नित्यं विद्वान् भक्तिसमन्वितः ।
अज्ञानजनितं पापं सर्वं सद्यः प्रणश्यति ॥
अनुतिष्ठन्ति ये नित्यमेवं योगं समाहिताः ।
नित्यं कर्मरता विप्रास्ते यान्ति परमां गतिम् ॥

**Colophon:**

इति श्रीयाज्ञवल्क्यगीतासु द्वादशोऽध्यायः ॥
देहेन्द्रियादौ वैराग्यं यम इत्युच्यते बुधैः ।
अनुरक्तिः परे तत्त्वं(त्त्वे) नियमः परिकीर्तितः ॥
सर्ववस्तुन्युदासीनभाव आसनमुच्यते ।
जगत्सर्वमिदं सत्यं प्रतीतिः प्राणसंयमः ॥
चित्तस्यान्तर्मुखीभावः प्रत्याहारो निगद्यते ।

आनन्द॒ कृष्ण इत्येव चिन्तनं ध्यानमुच्यते ॥
चित्तस्य निश्चलीभावो धारणा सुप्रकीर्तिता ।
चित्तस्य विस्मृतिस्सम्यक् समाधिरभिधीयते ॥

---

## No. 4363. योगयाज्ञवल्क्यम्.

## YŌGAYĀJÑAVALKYAM.

Pages, 38. Lines, 9 on a page.

Begins on fol. 122*a* of the MS. described under No. 4338.

This manuscript is dated as Sunday the 2nd of the Puraṭṭāsi month—13th day of the bright fortnight—in Viḷambi year.

Same work as the above, but the colophon is different.

**Colophon**:

इति योगयाज्ञवल्क्ये द्वादशोऽध्यायः ॥

## No. 4364. योगयाज्ञवल्क्यम्.

## YŌGAYĀJÑAVALKYAM.

Substance, palm-leaf (Śrītāla). Size, 9¼ × 2⅜ inches. Pages, 34. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 8*a*. The other work herein is Gaṇapatimantrahōmaprayōga 1*a*.

Same work as the above.

---

## No. 4365. योगरत्नप्रदीपिका.

## YŌGARATNAPRADĪPIKĀ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 76. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol 67*a*. The other works herein are Advaitadīpikā 1*a*, Mālavikāgnimitravyākhyā 105*a*.

A work by Bhōgīśvarayōgin on Yōga.
Contains 3 Ullāsas complete, 4th almost complete.

**Beginning:**

वामाङ्के(ङ्क)न्यस्तवामेकरतल(तरकर)कमलायास्तथा वामहस्त-
न्यस्तारक्तोत्पलायास्स्तनपरिविलसद्वामबाहुं प्रियायाः ।
सर्वाकल्पाभिरामोद्धृतपरशुमृगाभीष्टदः(दं)काञ्चनाभं
ध्यायेत् पद्मासनस्थं स्मरललितवपुस्सम्पदे(दं)पार्वतीनः(म्) ॥

* * * *

श्रीमत्प्रबलवेदाम्बासर्वदेवतनूभवः ।
कुर्वे भोगीश्वरो नाम योगरत्नप्रदीपिकाम् ॥
अथ भोगीश्वरो नाम श्रीमत्प्रबलवंशजः ।
आसनानां स्वरूपं च वक्ष्ये शास्त्रप्रचोदितम् ॥
आसनं प्राणसंरोधः प्रत्याहारश्च धारणे(णा) ।
ध्यानं समाधिरेतानि योगाङ्गानि भवन्ति हि ॥

आदौ योगाङ्गान्यष्टाविंश(तिरि)त्युक्तम्; इदानीं षडेवेति नियमः ।
यमनियमापेक्षया श्रेष्ठत्वात् षण्णामेव ग्रहणम् ।

* * * *

**Colophon:**

इति श्री(प्र)बलगो(भो)गीश्वरयोगिविरचितायां योगरत्नप्रदीपिकायां यमनियमाद्यष्टाङ्गयोगनिरूपणं नाम तृतीयोल्लासः ॥

अथ भोगीश्वरो योगी श्रीमत्प्रबलवंशजः ।
षट्चक्रभेदनं वक्ष्ये हृदिनाथादिभाषितम् ॥

षडाधारस्वरूपविवेचनाय षडङ्गयुतयोगादेव ज्ञानोदय इति प्रतिपाद्यते ।

**End:**

काकचञ्चुप(व)दास्येन शीतलं सलिलं पिबेत् ।
प्राणं प्राण(प्राणायाम)विधानज्ञो योगी भवति निर्जरः ॥

## No. 4366. योगरहस्यम्.

## YŌGARAHASYAM.

Pages, 9. Lines, 16 on a page.

Begins on fol. 93*a* of the MS. described under No. 4338.

The title here given is found on the margin in the MS.

This forms the 18th Adhyāya of the Hastigirimāhātmya and deals with Aṣṭāṅga-yōga.

This contains also some brief notes in Tamil.

Complete.

**Beginning:**

भृगुः—

कथितो विस्तरेणैव हयमेधस्त्वया विधेः(धे) ।
आविर्भावस्तथा विष्णोर्हस्तिशैलस्य मूर्धनि ॥
प्रतिष्ठार्चाविधिस्तस्य ब्रह्मणा विधिना कृतः ।
श्रुत्वैतत् कृतकृत्योऽस्मि त्वत्प्रसादान्महामुने ॥
न मया सदृशो लोके नरो धन्यतमः क्वचित् ।
इदानीं श्रोतुमिच्छामि त्वत्प्रसादाद्धितं मुने ॥
त्वदन्यस्सर्वधर्माणां वक्ता मे भुवि दुर्लभः ।
मेरुशृङ्गे पुरा ब्रह्मा याज्ञवल्क्याय धीमते ॥
योगमष्टाङ्गसंयुक्तं यमाह कमलासनः ।
तन्ममाचक्ष्व भगवन् शुश्रूषोर्योगमुत्तमम् ॥
त्वामुपास्य न सर्वत्र विद्यते दुर्लभं नृणाम् ॥

**End:**

इति सम्यक् समाख्यातो योगसारो मयाधुना ।
साध्यं योगमथो वक्ष्ये शृणुष्व सुसमाहितः ॥
नाडीभेदादपगततमःकल्मषस्तासु नीत्वा
प्राणायामैर्नियमितगतिं वायुमापूरणेन ।

हृत्पद्मान्तस्स्फुरितममृतज्योतिरष्टाक्षराख्य
यस्तत् पश्येत्स भवति नरो निर्ममस्सर्वकालम् ॥

**Colophon:**

इति ब्राह्मपुराणे भृगुनारदसंवादे श्रीहस्तिगिरिमाहात्म्ये अष्टाङ्गयोगो नाम अष्टादशोऽध्यायः ॥

## No. 4367. योगविषयः.

## YŌGAVIṢAYAḤ.

Pages, 4. Lines, 20 on a page.

Begins on fol. 196*b* of the MS. described under No. 4336.

On **Yōga**: by Mīnanātha.

**Beginning:**

गुरुश्च गुरुपुत्रश्च ये चान्ये गुरुबान्धवाः ।
अन्येषां च क्रमाज्ज्येष्ठाः तेषां पादौ नमाम्यहम् ॥

यादृशी भावना तीतं(यत्र)तं गुरुं प्रणमाम्यहम् ।
भ्रान्तश्च भ्रमते लोको निर्भ्रान्तः कृतनिश्चयः ॥

तस्य सिध्यन्ति पुरुषा आदिनाथे व्यवस्थिताः ।

* * * *

उमाशङ्करपुत्रोऽहं मीननाथो मुनीश्वरः ।
कथयामि परं तत्त्वं कुलाकुलविबोधकम् ॥

आधारस्स्वाधिष्ठानं च मणिपूरमनाहतम् ।
विशुद्धिराज्ञा कौलानि षट्चक्राणि शुभानि च ॥

आधारश्च गुदेतस्थौ(दान्तस्स्थः) स्वाधिष्ठानं च लिङ्गके ।
मणिपूरं नाभिगतं हृदये चाप्यनाहतम् ॥

**End:**

शीताशीतं परं स्थानं मेदोमज्जादिपूरितम् ।
स्रवति ब्रह्मणः स्थानात्सिञ्चते भुवनत्रयम् ॥
सर्वव्याधिक्रियाकर्मवातपित्तसमन्वितम् ।
दशाष्टदोषरहितं मीननाथेन कथ्यते ॥

**Colophon:**

इति मत्स्येन्द्रनाथविरचितं भक्तिसं(?)सम्पूर्णम् ॥

No. **4368.** योगविषयः.
YŌGAVIṢAYAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 19*b* of the MS. described under No. 4337.

Similar to the above.

No. **4369.** योगशास्त्रम्.
YŌGAŚĀSTRAM.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 34. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 23*a*. The other works herein are Avadhūtagītā 1*a*, Kulārṇava 40*a*, Śarabhamālāmantra 93*b*, Dakṣiṇakālikāmantra 97*a*, Ajapāgāyatrī 99*a*, Dēvīpūjāvidhāna 107*a*.

A general treatise on the various kinds of Yōga and on how to practise each of them.

By Dattātrēya.

Complete.

**Beginning:**

योगिहृत्कमलावासं सगुणं निर्गुणं पुनः ।
विष्णुं वन्दे योगिगम्यं चिद्रूपं विघ्नशान्तये ॥
साङ्कृतिर्मुनिवर्योऽभू[य]न्मण्डले योगनिष्ठया ।
सकलं च परिक्रम्य नैमिशारण्यमाप्तवान् ॥

सुगन्धिताकुसुमितासाधुसत्फलसंयुतैः ।
शाखिभिश्शोभितं पुण्यं जलकासारमण्डितम् ॥
स मुनिस्तत्र विचरन् ददर्शाम्रतरोरधः ।
पद्मासनसमासीनं दत्तात्रेयं महामुनिम् ॥
दृढपद्मासनेनापि नासाग्रार्पितया दृशा ।
ऊरुमध्ये(ध्य)गतोत्तानपाणियुग्मेन शोभितम् ॥
ततःप्रणम्य तमृषिं दत्तात्रेयं स साङ्कृतिः ।
तच्छिष्यैस्सह तत्रैव सम्मुखं चोपविष्टवान् ॥
तदैव स मुनिर्योगाद्विरमय्य पुरः स्थितम् ।
उवाच साङ्कृतिं प्रीतिपूर्वकं स्वागतं वचः ॥
साङ्कृते किमिति त्वं मां किमुद्दिश्य इ(त्वि)हागतः ।
इति पृष्टस्स च प्राह योगं ज्ञातुमिहागतः ॥

श्रीदत्तात्रेयः—

योगो हि बहुधा ब्रह्मन् तत्सर्वं कथयामि ते ।
मन्त्रयोगो लयश्चैव हठयोगस्तृतीयकः ॥
राजयोगश्चतुर्थः स्याद्योगानामुत्तमः स्मृतः ।
आरम्भश्च घटश्चैव तथा परिचयः स्मृतः ॥
निष्पत्तिश्चेत्यवस्थाच(श्च) चतस्रः परिकीर्तिताः ।
एषां तु विस्तरं वक्ष्ये यदि त्वं श्रोतुमिच्छसि ॥
अङ्गेषु मातृकान्यासपूर्वं मन्त्रं जपेत्सुधीः ।
एकेन चापि सिद्धिः स्यान्मन्त्रयोगस्स उच्यते ॥
अम्बुसैन्धवयोरैक्यं यथा भवति योगतः ।
तथात्ममनसोरैक्यं समाधिस्सोऽभिधीयते ॥
यत्समत्वं द्वयोरेव जीवात्मपरमात्मनोः ।

**End:**

समस्तनष्टसङ्कल्पस्समाधिस्सोऽभिधीयते ॥
इन्द्रियेषु मनोवृत्तिरपरं(र) प्रेक्षणा हि सा ।
अद्वयत्वं गते जीवे ग(न)मनो नेन्द्रियाणि च ॥
न गन्धं न रसं रूपं संस्पर्शं न च निश्चलम् ।
नात्मानं न परं वेत्ति यो हि युक्तस्समाधिना ॥
अभेद्यस्सर्वशस्त्राणामवध्यस्सर्वदेहिनाम् ।
अग्राह्यो मन्त्रयन्त्राणां योगी युक्तस्समाधिना ॥
युक्ताहारविहारश्च युक्तचेष्टः स्वकर्मसु ।
युक्तस्स्वप्नावबोधेन योगी तत्त्वं न विन्दति ॥
निराकारं निरालम्बं निष्प्रपञ्चं निरामयम् ।
निरालयं निराहारं तत्त्वं तत्त्वविदो विदुः ॥
निश्चलं निर्मलं नित्यं निष्क्रियं निरुपद्रवम् ।
व्योम विज्ञानमानन्दं ब्रह्म ब्रह्मविदो विदुः ॥
निरातङ्के निरालम्बे निराकाशे निरामये ।
योगी योगविधानेन परे ब्रह्मणि लीयते ॥
दुग्धं क्षीरे घृतं(ते) सर्पिः वह्नौ वह्नीति(ह्निरि)व श्रुति(त): ।
तन्मयत्वं व्रजेदेवं योगी लीनः परे(रा)वरे ॥
भवभयहरवह्निं मुक्तिसोपानमार्गं
प्रकटितपरमार्थं ग्रन्थगुह्यं त्वगुह्यम् ।
सकृदपि पठतीमं यश्शृणोति प्रबोधं
स भवति भुवि भव्यं भाजनं मु(भु)क्तिमुक्तौ ॥

**Colophon:**

इति सद्गुणाचार्येण श्रीदत्तात्रेयमहायोगिना विरचितं योगशास्त्रं समाप्तम् ॥

## No. 4370. योगशास्त्रम्.
## YŌGAŚĀSTRAM.

Substance, palm-leaf (Śrītāla). Size, 7⅝ × 2¼ inches. Pages, 28. Lines, 16 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 54*a*. The other works herein are Candrajñānāgamasaṅgraha 1*a*, Svātmaprakāśikā 68*a*, Yōgasāra 71*a*, Harimīḍēstōtra 75*a*, Ātmabōdha 78*a*, Advaitamakaranda 79*b*, Kaupīnapañcaka 82*b*, Daśaślōkī 83*a*, Hastāmalakastōtra 83*b*, Dṛgdṛśyavivēka 84*b*, Atharvaśirsa 86*a*, Tripurōpaniṣad 86*b*, Śrīvidyāmanvāmnāyasvarūpa 87*a*.

Contains Adhyāyas 1 to 8 complete, 9th incomplete.

Similar to the above.

**Beginning:**

ईश्वर उवाच—

अथातस्संप्रवक्ष्यामि नाडीचक्रमनुत्तमम् ।
श्रद्धया गुरुभक्त्या च विद्धि वाचस्पतेऽधुना ॥
शरीरं तावदेव स्यात् षण्णवत्यङ्गुलात्मकम् ।
मनुष्याणां मुनिश्रेष्ठास्स्वाङ्गुलीभिरिति श्रुतिः ॥
देहमध्ये शिवस्थानं तप्तजाम्बूनदप्रभम् ।
त्रिकोणं मनुजानां तु सत्यमुक्तं बृहस्पते ॥

**End:**

न देहेन्द्रियबुद्ध्यादि न माया वान्यदेवता ।
इति बुद्धिर्व्यवस्थापि धारणा सेति हि श्रुतिः ॥
सर्वं सङ्क्षेपतः प्रोक्तं सर्वशास्त्रविशारद ।
आगमान्तैकसंसिद्धमस्तेयं भवता सदा ॥

**Colophon:**

ओं तत्सत् योगशास्त्रे ईश्वरबृहस्पतिमुनिसंवादे धारणाविधिवर्णनं नामाष्टमोऽध्यायः ॥

ईश्वर उवाच—

अथातस्संप्रवक्ष्यामि ध्यानं संसारनाशनम् ।
आकाशे निर्मलं शान्तं भासमानं सुशीतलम् ॥

* * * *

सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात् ।
विश्वो नारायणो देवअ(स्त्व)क्षरः परमः प्रभुः ॥
इति ध्यात्वा पुनस्स्वस्य हृदयाम्भोजमध्यमे ।

---

## No. 4371. योगसङ्ग्रहः.

## YŌGASAṄGRAHAḤ.

Pages, 33. Lines, 16 on a page.

Begins on fol. 70*a* of the MS. described under No. 4338.

A work on the practice of Yōga: in 5 chapters. The colophon at the end of each chapter summarizes the subjects treated of therein.

At the end of this work there are 4 pages which cannot be easily deciphered.

**Beginning:**

श्रीकृष्णचरणाम्भोजं योगिहृद्भ्रमरालयम् ।
ध्यात्वा सज्जनतोषाय क्रियते योगसङ्ग्रहः ॥

श्रियः पतिरवाप्तसमस्तकामो महार्णवशायी भगवान् नारायणः स्वनाभिकमलोद्भवं शैशवात् चतुर्दिङ्निरीक्षणचतुर्मुखं तप तपेत्यशरीरश्रवणाद्दिव्यसहस्रसंवत्सरं तपश्चरन्तं भगवत्साक्षात्कारचतुरं चतुराननं प्रति लोहितशुक्लकृष्णप्रकृतिस्थितजीवराजी(शी)न् प्रदर्श्य एतान् कालकृतपरिणामवन्त(त): कुरु इत्युक्त्वान्तरधात् ॥

**Colophon :**

* * * *

इति योगसङ्ग्रहे ब्रह्मणः भगवत्साक्षात्कारतद्ध्यानसृष्टयश्च गुणाश्च तत्कार्येन्द्रियपञ्चभूताण्डकटाहाश्च कालश्च हृदयग्रन्थिश्च जीवानां प्रतिकल्पमुत्पत्तिप्रलयाश्च तद्धेतुभूतकर्मस्वरूपभावस्वरूपप्रकारकर्मफलानीत्येवंरूपकविभूतियोगो नाम प्रथमप्रकरणम् ॥

* * * *

**Colophon :**

इति योगसङ्ग्रहे जीवस्य देहविमोचनदेहान्तरावाप्तिश्च स देहः कालकृतपरिणामशुक्लशोणितमयत्वङ्मांसमेदोऽस्थिपुरीषराशिः पञ्चकोशमण्डलत्रयनाडीपञ्चभूतगुणमयः, एवंरूपदेहे जुगुप्साकोपवैराग्ययोगो नाम द्वितीयं प्रकरणम् ॥

* * * *

**Colophon :**

इति योगसङ्ग्रहे अधिकारिणां नियतत्वं च गुरूपदेशश्च तत्प्रतिबन्धकाश्च तज्जननकर्माश्रयत्रिविधकरणानां कर्तृत्वं च कारयितृत्वं च तत्कृतसत्कर्मतपोरूपं च तत्साध्यमनोनिग्रहाश्च तत्साध्योपासनादिरूपकर्मयोगो नाम तृतीयप्रकरणम् ॥

* * * *

**Colophon :**

इति ज्ञानयोगे आत्मनः सद्भावं च नित्यनिरुपाधिकानन्दस्वरूपश्च(श्च) अहङ्कारेण तिरोहितत्वं चेश्वरेणान्तरबाह्यप्रकाशकत्वञ्चोपासनादिरूपज्ञानयोगो नाम चतुर्थप्रकरणम् ॥

**End:**

चित्तशुद्धिरूपसंसिद्धिं कर्मयोगेन जनकादयः ; ज्ञानयोगेन भरतादयः, भक्तियोगेन प्रह्लादादयः प्राप्ता इति प्रसिद्धिः ॥

**Colophon:**

इति योगसंग्रहे अधिकारिणां भक्तिप्रतिबन्धकवासनास्वरूपं च भक्तिप्राप्तिश्च त्रयाणां पुरुषार्थसाधनादिरूपभक्तियोगो नाम पञ्चमं प्रकरणम् ॥

---

No **4372.** योगसारः.

YŌGASĀRAḤ.

**Pages**, 8. Lines, 16 on a page.

Begins on fol. 71*a* of the MS. described under No. 4370.

A treatise on Yōga as related to Pārvatī by Paramēśvara

Complete.

**Beginning:**

पार्वत्युवाच—

कथं मुक्तिप्रदं देव कथं ज्ञानप्रदायकम् ।
कथं ज्योतिः कथं नाथं(दः)कथमानन्ददायकम् ॥
कस्मिन् स्थाने वस(से)न्नित्यं सोमसूर्याग्निमण्डलम् ।
कस्मिन् स्थाने सुषुम्नाख्यनाडी सम्यक् प्रकाशते ॥
तत्सर्वं ब्रूहि मे शम्भो श्रोतुमिच्छाम्यहं प्रभो ।

ईश्वर उवाच—

उपजिह्वादूर्ध्वभागे त्रिकोणाकारमण्डले ।
तस्य मध्ये स्तितन्देव(स्थिता देवी) सुषुम्ना नाडिरुच्यते ॥
तस्य मध्ये महावह्निः तत्पार्श्वे चन्द्रसूर्ययोः ।
तदग्नौ जायते नाद मो(ओ)मोमिति तदद्भुतम् ॥

**End:**

नादकोटिसहस्राणि बिन्दुकोटिशतानि च ।
सर्वे तत्र लयं यान्ति यत्र देवो निरञ्जनः ॥

इति नादानुसन्धानसमाधि . . . . . ।
युवा वृद्धोऽतिवृद्धो वा व्याधितो दुर्बलोऽपि वा ॥
अभ्यासात्सिद्धिमाप्नोति सर्वे(र्वो) योगेष्वतन्द्रितः ।

**Colophon :**

योगसारस्समाप्तः ॥

## No. 4373. योगसारसङ्ग्रहः.
## YŌGASĀRASAṄGRAHAḤ.

Substance, paper. Size, 11⅛ × 9 inches. Pages, 93. Lines, 25 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 16 Adhyāyas.

This contains the substance of certain works on Yōga.

**Beginning :**

प्रणमामि गणेशानं प्रणतार्तिप्रभञ्जनम्. ।
प्रसन्नं भजतामिष्टप्रदातारं भवच्छिदे ॥
सुधांशुकोटिद्युतिमप्रमेयं सुधाकरस्मेरमुखारविन्दम् ।
श्रीराजयोगामृतदानदक्षं श्रीदक्षिणामूर्तिगुरुं नमामि ॥
श्रीशङ्करं परां शक्तिं गणेशं षण्मुखं हरिम् ।
ब्रह्माणं नन्दिकेशं च दत्तात्रेयं पतञ्जलिम् ॥
नवयोगीन्द्रबृन्दं च व्यासं व्यासात्मजं भजे ।

* * * *

अष्टाङ्गादिसमस्तयोगकमलश्रीकुण्डलिन्याः पर[:]-
ब्रह्मद्वारकवाटपाटनपटोर्मार्गस्य यल्लक्षणम् ।
तत्त्वातीतसदाशिवस्य निलयस्यात्मस्वरूपं च यत्
तत्सर्वं प्रकटीकरोमि च पुरा योगेषु यद्वर्णितम् ॥
योगशास्त्राणि सर्वाणि सम्यगालोच्य सङ्ग्रहात् ।
योगसारमहं वक्ष्ये साधकानुजिघृक्षया ॥

गुरूपदिष्टमार्गेण योगशास्त्रानुवर्तिनाम् ।
वैराग्यशीलयुक्तानामिदं शास्त्रं प्रगीयते ॥

तदुक्तं योगशाङ्करे—

ज्ञानखड्गं दृढं कृत्वा वैराग्यमयच(व)र्म चं ।
दुर्लभे योगसङ्ग्रामे शूरः कौटौ विराजते ॥

गीतायाम्—

अभ्यासेन च कौन्तेय वैराग्येण च गृह्यते । इति.

योगेनैव विमुच्यन्ते देहिनो भवबन्धनात् ।
नान्यथा मुक्तिरेतेषां जन्मकोटिशतैरपि ॥

तदुक्तं योगशाङ्करे—

नास्ति योगं विना मुक्तिः या मुक्तिर्योगदर्शिता ।
योगयुक्तस्तु जानाति स मुक्तो भवसागरात् ॥ इति.

निरोध एव चित्तस्य योग इत्यभिधीयते ।
योगाभ्यासवशेनैव परमात्मा प्रकाशते ॥

तदुक्तं श्वेताश्वतरे—

तावन्मनो निरोद्धव्यं हृदि यावत् क्षयं गतम् ।
एतत् ज्ञानं च ध्यानं च शेषास्तु ग्रन्थविस्तराः ॥

पतञ्जलिश्च—

योगाश्चित्तवृत्तिनिरोध इति ।

**End :**

मनो न बुद्धिर्न शरीरमिन्द्रियं तन्मात्रभूतादि न भूतपञ्चकम् ।
अहङ्कृतिश्चापि नयेत् स्वरूपकं तमेकमात्मानमुपैति शाश्वतम् ॥

तीर्थे वाप्यथ गेहे वा यत्र कुत्र मृतोऽपि वा ।
योगी न पश्यते गर्भे परब्रह्मणि लीयते ॥

तीर्थे वा श्वपचगृहे वा नष्टस्मृतिः परित्यजन् देहम् ।
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोकः ॥
कुलं पवित्रं जननी कृतार्था विश्वम्भरा पुण्यवती च पृथ्वी ।
अपारसच्चित्सुखसागरेऽस्मिन् लीनं परे ब्रह्मणि यस्य चेतः ॥
योगशास्त्रस्य सर्वेषां श्रद्धाभक्तिपुरस्सरम् ।
शतकृच्छ्रफलं नित्यं भवति श्रवणेन तु ॥
दिनेदिने योगशास्त्रं यः पठेद्भक्तिसंयुतः ।
तस्य श्रीर्विपुला सद्यःअ(श्चा)न्ते मुक्तिर्न संशयः ॥

**Colophon:**

इति श्रीमद्योगसारसङ्ग्रहे आत्मस्वरूपनिरूपणं नाम षोडशोऽध्यायः ॥
यमादिषोडशवरैःकृत्यैरात्मस्थितिक्रमः ।
सम्प्रोक्तः षोडशाध्यायैर्बहुसम्मतिभिर्दृढम् ॥
इति योगसारसङ्ग्रहः सम्पूर्णः ॥

---

## No. 4374. राजयोगः.

## RĀJAYŌGAḤ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 35. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 30*a*. The other works herein are Drāviḍavēda-māhātmya 1*a*, Trailōkyamōhanakavaca 12*a*, Gadyatraya 18*a*- Navaviṣṇumūrtipratiṣṭhāsamprōkṣaṇavidhi 48*a*, Sarasvatīpūjā, vidhāna 51*a*, Kṛṣṇāṣṭamīvratakalpa 57*a*.

6th Upadēśa only complete.

A treatise on Rājayōga; by Agastyamuni.

**Beginning:**

अथ योगाध्यायः ।
श्रीभगवानुवाच—

राजयोगं प्रवक्ष्यामि मुनिगुह्यं सुपावनम् ।
सेवकानां मोक्षकरमायुरारोग्यवर्धनम् ॥
योगानां सुलभो विद्यां साधयेद्यस्य कस्यचित् ।

श्रीशुकः—

अगस्त्यभगवान्(वत्)प्रोक्तं लोकानां हितकाम्यया ।
सुलभं पावनं पुण्यं योगसाधनमुत्तमम् ॥
तद्विद्यां च प्रवक्ष्यामि शृणु नान्यमनाः प्रभो ।

* * * *

पृथिवी पूर्वतत्त्वं च द्वितीयं जलसंज्ञिकम् ।
तृतीयं वह्नितत्त्वं च वायुतत्त्वं चतुर्थकम् ॥
आकाशं पञ्चमं प्रोक्तमित्येतत्तत्त्वलक्षणम् ।

**End**:

द्वात्रिंशत्कुम्भके चैव पुनष्षोडशपूरके ।
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सहं ॥
त्रिः पठेदायत[ः]प्राणः प्राणायामस्स उच्यते ।

एवं प्राणायामत्रयं कृत्वा उच्छ्वासनिश्वासरूपेण षट्छताधिकैक-विंशतिसहस्रकृत्वः प्रणवमन्त्रजपं करिष्य[त] इति सङ्कल्प्य ॥

**Colophon**:

इति श्रीअगस्त्यमौनीन्द्रविरचिते योगोद्धारचक्रभवने योगराजं(जो) नाम षष्ठोपदेशः समाप्तम्(ः) ॥

## No. **4375.** राजयोगभाष्यम्.

## RĀJAYŌGABHĀṢYAM.

**Pages**, 13. Lines, 18 on a page.

**Begins** on fol. 93*a* of the MS. described under No. 332.

An explanatory commentary on the Maṇḍala-brāhmaṇōpaniṣad.

**Beginning :**

एवं प्रतिपादितं साङ्ख्यं मोक्षलक्षणम् । इदानीं साङ्ख्यैकदेशिक-मतं वक्ष्ये—

देहस्य पञ्च दोषास्सन्ति—कामक्रोधनिश्वासभयनिद्राभेदात् । तत्परिहारमार्गस्त्व(स्तु)सङ्कल्पवर्जनं कामस्य; क्षमता क्रोधस्य; निश्वासस्य लघुत्वभोजनम्; अप्रमत्तता भयस्य; सत्त्वसेवनं निद्राया इति क्रमेण भवन्ति । दुःखोदकं व्याधिमृत्युग्राहं भयसरीसृपं हिंसादितरङ्गं तृष्णापत्यं(वर्तं)दारपङ्कं नानाकल्पितसुखरत्नमसच्छरीरं संसारवार्धिं तर्तु-मयमुपायः । जीवस्स्वयमतिसूक्ष्मः ।

**End :**

प्रत्यङ्मुखासीन(ा)स्सदा तत्तच्चिह्नमुक्तमण्डलप्रकारेण अवलोकयन्ति ॥

श्रीकण्ठनामकगुरुप्रवरं महेशं वैकुण्ठनाथ(यति)देशिकदेशिकेन्द्रम् ।
नारायणार्यमरुणाचलमूलभूषं त्राणाय नस्त्विह समागतमानतोऽस्मि ॥

श्रीकण्ठवैकुण्ठविरिञ्चवेदव्यासार्यगोत्रर्षिगुरुक्रमेण ।
यज्ज्ञानमात्तं तत एव नः श्रीनारायणार्योऽवतु स[ा]र्वकालम् ॥

द(दि)ष्ट्येह जन्तुसुकृतार्पितए(मे)व विष्णुं
वैकुण्ठतो झटिति पूर्णकृपावतीर्णम् ।
नारायणार्यमथ मन्दधियां न आत्म-
ज्ञानप्रदं गुरुवरं सततं भजामि ॥

यो वारुणाचलपदे सुकृतावतारो
यो दाक्षिणात्यदययैव समागतोऽत्र ।
प्राक् शेषदेशिकमलोकयदात्मदृष्ट्या
नारायणं तमनिशं गुरुमानतोऽस्मि ॥

भस्मत्रिपुण्ड्रलसितालिकमात्मखेलं
ब्रह्मास्म्यहं न वपुरादिरितीरयन्तम् ।

लोकानुसारिचरितं सुधियां गुरूक्तं
नारायणाय(णं न)रवराकृतिमानतोऽस्मि ॥
गो नासिकात्र्यम्बकमध्यवर्ती श्रीब्रह्मविद्यागुरुचक्रवर्ती ।
नारायणाख्यः प्रथितात्मकीर्तिः पादाय(याद)भिद्रावितशिष्यमूर्तिः ॥

Colophon:

अयं ग्रन्थः हेमलम्बिनामसंवत्सरे वैशाखमासे एकोनविंशद्दि(दि)-वसे रोहिणीनक्षत्रयुतामावास्यायां पञ्चविंशतितमघटिकावेलायां गोपालशर्मणा लिखितः समाप्तोऽभूत् ॥

No. 4376. राजयोगसारः.

RĀJAYŌGASĀRAḤ.

Substance, palm-leaf. Size, 9¾ × 1¾ inches. Pages, 12. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 16*a*. The other work herein is Haṭhayōgapradīpikā 1*a*.

A work on Rājayōga: by Śrī-Śaṅkarācārya.

Complete.

**Beginning:**

कमलायतनेत्रान्तां विधिविष्णुशिवस्तुताम् ।
बिभ्रतीमिक्षुचापं च पुष्पेष्ठां पाशमङ्कुशम् ॥
नमामि ललितां शान्तां त्रिपुरामष्टसिद्धिदाम् ।
हेतवे जगतामेव संसारार्णवसेतवे ॥
प्रभवे सर्वविद्यानां शाम्भवीगुरवे नमः ।

* * * *

ईश्वर उवाच—

उपजिह्वादूर्ध्वभागे त्रिकोणाकारमण्डले ।
तस्य मध्ये स्थिता देवि सुषुम्ना नाडिरुच्यते ॥

तस्य मध्ये महावह्निः तत्पार्श्वे सूर्यचन्द्रयोः ।
ओमुद्भूतपरं(ता परा) नाडी शब्दब्रह्मपरं च तत् ॥
तेन मार्गेण भित्वा तु चिदाकाशे निरञ्जनम् ।
निर्गुणं ब्रह्मरन्ध्रे च सगुणं हृदि संस्मरेत् ॥

**End:**

निरालम्बपदे प्राप्ते चित्ते तत्र लयं गतः ।
निवर्तन्ते क्रियास्सर्वे(र्वाः) तस्यान्तं पञ्चमाश्रमः ॥
निराकारं निराकाशं निरालम्बं निरन्तरम् ।
वसते हृदयस्थानं तस्यान्तं पञ्चमाश्रमः ॥
आब्रह्मस्तम्बपर्यन्तं परब्रह्मस्वरूपिणम् ।
अभिन्नं भिन्नवत्पश्येत्तस्यान्तं पञ्चमाश्रमम्(:) ॥
अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहम्(:) ।
सर्वभूतदया पुष्पं क्षमा पुष्पं विशेषतः ॥
ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तथैव च ।
सत्यवाक् चाष्टमं पुष्पं नित्यतृप्तो महेश्वरः ॥

**Colophon:**

इति परमहंसपरिव्राजकाचार्यश्रीशङ्कराचार्यविरचितायां(तोऽयं) राजयोगसारं(रः) सम्पूर्णम्(:) ॥

---

## No. 4377. राजयोगसिद्धान्तरहस्यम्.

### RĀJAYŌGASIDDHĀNTARAHASYAM.

Substance, palm-leaf.. Size, $13\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 12. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 48*a*. The other work herein is Vāmanasūtravṛtti 1*a*.

Complete in 13 Adhyāyas.

Similar to the above.

**Beginning:**

हृदयकमलमध्ये चिन्तितोऽहं गुरूणा-
ममलविमलसूक्ष्मं सर्वदा साक्षिभूतम् ।
अखिलनिगमवेद्यं सच्चिदानन्दमूर्ति
मम हृदयनिषण्णं श्रीगुरुं चिन्तयामि ॥
कैलासवास सर्वेश दीनरक्ष दयानिधे ।
योगिनामपि सर्वेषां कथं श्रेष्ठं कथं परम् ॥
कथं मुक्तिः कथं देवः कथं ज्ञानप्रकाशकम् ।
कथं ज्योतिः कथं नादः कथमानन्ददायकम् ॥
कस्मिन् स्थाने वसेन्नित्यं सोमसूर्याग्निमण्डलम् ।
कस्मिन् स्थाने सुषुम्नाख्या नाडी सम्यक् प्रकाशते ॥
तत्सर्वं ब्रूहि मे शम्भो श्रोतुमिच्छाम्यहं सदा ।

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतमं महत् ॥
मुनीनां मोक्षसिद्ध्यर्थं मया प्रोक्तं वरानने ।
राजयोगामृतं नित्यं सद्यो मुक्तिप्रदायकम् ॥
अजपामन्त्रसंयुक्तं रेचपूरककुम्भकैः ।
कृत्वाभ्यासं सदा योगी हठयोग इति स्मृतः ॥
साङ्ख्ययोग इति प्रोक्तं पवनाभ्यासिनां सदा ।
रेचपूरककुम्भादिदेहशोधनपूर्वकम् ॥

**End:**

आदौ सद्गुरुमाश्रित्य तत्त्वज्ञानं समभ्यसेत् ।
आत्मानं गगनं श्रुत्वा बिन्दून् श्रुत्वा तथैव च ॥

द्वयोस्समरसं कुर्यादमनस्ककळा हि सा ।
नाद एव लयश्रेष्ठो मुद्राणां खेचरी परा ॥
देवश्रेष्ठो निरालम्बो व्य(ह्य)वस्थाय(यां) मनोन्मनी ।
आधारस्तु चतुर्दळारुणरुचिर्वासान्तवर्णात्मकं(कः)
स्वाधिष्ठानमनेकवि(वै)द्युति(त)निभं बालान्तषट्पत्रकम् ।
रत्नाभं मणिपूरकं दशदळं डाद्यै(द्यं)फकारान्तकं
पत्रैर्द्वादशभिर्विशोभितमहाहैमं कठा(ठका)रान्तकम् ॥
मात्राभिर्दशषोडशैर्विनिहितं ज्योतिर्विशुद्धाम्बुजं
हं क्षं द्व्यक्षरपद्मपत्रयुगळं रत्नाभमाज्ञापरम् ।
तस्मादूर्ध्वमधोमुखं विकसितं पद्मं सहस्रच्छदं
नित्यानन्दमयं हृदम्बुजपुटे ई(नी)डे सदा संस्मरेत् ॥

**Colophon:**

इति श्रीराजयोगसिद्धान्तरहस्ये सर्वोपनिषत्सारे गौरीशिवसंवादे राजयोगप्रदीपि(प)के द्वितीयः पटलः सम्पूर्णः ॥

## No. 4378. राजयोगामृतम्.

## RĀJAYŌGĀMṚTAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 44*a* of the MS. described under No. 2014.

Two Paṭalas complete.

Lays down the rules for the practice of Rāja-yōga.

Also gives a brief description of Sāṅkhya-yōga, Haṭha-yōga and Laya-yōga as associated with Rāja-yōga.

**Beginning:**

कैलासवास सर्वेश दीनरक्षक शङ्कर ।
योगिनामपि सर्वेषां कथं श्रेष्ठ कथं परम् ॥
कथं मुक्तिप्र(प)दं देव कथं ज्ञानप्रकाशकम् ।
कथं ज्योतिः कथं नादं(दः) कथमानन्ददायिनि(यकः) ॥

त(क)स्मिन्स्थाने वसेन्नित्यं सूर्यसोमाग्निमण्डलम् ।
त(क)स्मिन् स्थाने सुषुम्नाख्यनाडी सम्यक् प्रकाशते ॥
तत्सर्वं ब्रूहि मे शम्भो श्रोतुमिच्छामि मां(म्यहं)सदा ।

**ईश्वर उवाच—**

शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं मया(हत्) ॥
मुनीनां मोक्षसिध्यर्थं पुरा प्रोक्ता(क्तं) मयानघे ।
राजयोगामृतं नित्यं सद्यो मुक्तिप्रदायकम् ॥
अजपामन्त्रसंयुक्तं रेचपूरककुम्भकैः ।
कृत्वाभ्यासं(भ्यसेत्) सदा योगी मन्त्रयोग मु(उ)दाहृतम्(:)
साङ्ख्यरूपेण प्रणवं कृत्वा वायुनिरोधने ।
साङ्ख्ययोग मि(इ)ति प्रोक्त(क्तः) पवनाभ्यासिभिस्सदा ॥
रेचपूरककुम्भादि देहरोधनपूर्वकम् ।
कृत्वाभ्य[ा]सेस(त्स)दा योगी हठयोग मि(इ)ति स्मृतम्(:) ॥
भ्रूमध्ये परमात्मानं ध्यात्वा सुज्योतिरूपिणम् ।
लीयते मनसा नादं(दो) लययोग मि(इ)ति स्मृतम्(:) ॥
पाञ्चभौतिकसंयोगाज्जायते नादसंज्ञकम् ।
हृच्चित्तबुद्धिसंयोगात् जायते बिन्दुसंज्ञकम् ॥

**End:**

ज्योतिं दृष्ट्वा हृदाकाशे समुक्तिर्नात्र संशयः ।
आसने(नं) व्याधिनाशाय प्राणायामे न पातकः(म्) ॥
अथ नादानुसन्धाने चित्तं स्थिरतरं भवेत् ।
ज्योतिःप्रकाशे कैवल्यं नान्यथा मुक्तिसाधनम् ॥
वाचातीतं मनोऽतीतं गुणातीतं निरञ्जनम् ।

भावातीतं परं ज्योतिः कथं ध्यायन्ति योगिनः ॥

उमोवाच—

ज्वालमालाकुलं व्याप्तं शीतोष्णादिविवर्जितम् ।

कोटिसूर्यप्रतीकाशं विद्युत्पुञ्जसमाकृतिम् ॥

आदौ सूक्ष्मेण द(प)श्यन्ति लक्ष्यं कृत्वा पुनःपुनः ।

पूर्वलक्ष्येण दर्शित्वा पूर्णज्योतिः प्रकाशते ॥

शृङ्गाटको(के) यस्तु मनो नियम्य त्रिकोणमार्गाच्छशिभास्कराभ्याम् ।

बाह्यो(ह्या)न्तरङ्ग[ः] प्रणवैकगोभिरष्टावधानी हठराजयोगी ॥

Colophon:

इति श्रीराजयोगसिद्धान्तरहस्ये वेदान्तसारे ईश्वरोमासंवादे सकलराजयोगामृते द्वितीयः पटलः ॥

## No. 4379. राजयोगामृतम्.

## RAJAYÓGAMṚTAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 574.

First Paṭala complete.

Same work as the above.

Colophon:

इति श्रीउमामहेश्वरसंवादे परमासिद्धागमे शैवसिद्धान्तरहस्ये राजयोगामृते प्रथमः पटलः ॥

---

## No. 4380. वासुदेवमननम्–(समाधिलक्षणम्).

## VĀSUDEVAMANANAM: (SAMĀDHILAKṢAṆAM).

Pages, 16. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 411.

Incomplete.

This work deals with that state of Yogic self-realisation which is known as Samādhi.

**Beginning :**

वसिष्ठवचनम्—

प्राणे गते यथा देहः सुखं दुःखं न विन्दति ।
तथा चेत्प्राणयुक्तोऽपि स कैवल्याश्रमे वसन् ॥
मनसा वृत्तिशून्यस्य ब्रह्माकारतया स्थितः ।
योऽसम्प्रज्ञातनामासौ समाधिरभिधीयते ॥
रजस्तमोमयीं त्यक्त्वा श्रद्धासत्त्वमयीं श्रितः ।
तत्त्वज्ञानाधिकारी स्यादिति पञ्चदशेरितम् ॥
न्यासत्यागविभागेन सर्वगीतार्थसङ्ग्रहम् ।
स्पष्टमष्टादशे प्राह परमार्थविनिर्णये ॥
तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ।
मत्कथाश्रवणादेव श्रद्धया परयुक्तवत् ॥
ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ।

**End :**

(ध्यान)ध्येयध्यातृभावं यदा पश्यति निर्भरम् ।
ततस्तु नित्यं भवति ज्ञानामृतनिषेवणात्(णम्) ॥
. . . . . . . . . . |
सुषुप्तिवत्परानन्दं युक्तश्चोपरतेन्द्रियः ॥
निवातदीपवत्संस्थः समा.

## No. 4381. विजृम्भितयोगशास्त्रम्.

## VIJṚMBHITAYŌGAŚĀSTRAM.

Pages, 8. Lines, 10 on a page.

Begins on fol. 23*a* of the MS. described under No. 2398.

Fifth chapter only complete : deals with that condition of consciousness wherein the differentiation of subject and object is realised to be altogether absent.

By Śaṅkarācārya.

**Beginning:**

शिष्यो गुरुणा एवमुपदिष्टः पुनरिदमभाषत—

स्वामिन् अमनस्कलक्षणमिदानीं श्रुतमपि विस्मृतमिव भाति । तदर्थाय पुनर्वक्तव्यम् ।

इति प्रार्थितः परमयोगी शिष्यमवादीत्—अद्वैतमत्यन्तरहस्यं शृणु सद्यः कृतार्थो भवसि । नित्यं शाम्भवीमुद्रिकान्वितः पूर्वोक्तप्रकारेण परमात्मदृष्ट्या प्रत्ययानि लक्ष्याणि दृष्ट्वा दृष्ट्वा ह्रासः ।

**End:**

तस्मात्संसारान्निर्विण्णः परमयोग(गी)ब्रह्ममार्गमवलम्ब्य मूलाधारमण्डलीसमुत्थितवायुमिडापिङ्गळसञ्चारकेवलमु(व्यु)त्क्रमेण सुषुम्नाबिलं प्राप्य तमुद्घाट(ट्य) वैपुल्यत(ल्यात्त)न्मार्गे(ण) ब्रह्मविष्णुरुद्रग्रन्थिभेदपुरस्सरमाज्ञादहरं भित्त्वा तारकानुसन्धानेन तारकेशार्धबिम्बमध्यमार्गेणानर्गळपरिविजृम्भमाणमग्नतेजः कूटपाटनास्फोटनधळधळायमानतेजो भूत्वा तत्समीपगविश्वव्योमव्याप्तपरिपूर्णचन्द्रमण्डलनिविष्टसान्द्रामृतनिष्यन्दबिन्दुसन्दोहपान - परितृप्तसदानन्दरूपनिःश्रेयःप्राप्तनिस्संशयतत्त्वाकारो भूत्वा सदानन्दावधूतकृपा(बला)त् दैववशात् मुक्तस्सोऽतिभावितव्यः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचिते(तायां) विजृम्भितयोगशास्त्रकृते(तौ) पञ्चमप्रकरणं समाप्तम् ॥

---

## No. 4382. शाम्भवी-मुद्रा.

## ŚĀMBHAVĪ-MUDRĀ.

Page, 1. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 116.

Incomplete.

A pamphlet on Yōga treating about the Śāmbhavī-mudrā which consists in having the mind deeply concentrated, and the eyes rigidly and unwinkingly fixed. on some specially chosen object.

**Beginning:**

अन्तर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्तते
दृष्ट्या निश्चिततारया बहिरिदं पश्यन्नपश्यन्नपि ।
मुद्रेयं किल शाम्भवी भगवती युष्मत्प्रसादाद्गुरो
शून्याशून्यविलक्षणा मृगयते तत्त्वं पदं शाम्भवम् ॥
प्राणवृत्तौ विलीनायां मनोवृत्तिर्विलीयते ।
शिवशक्तिसमो योगो हठयोगेन जायते ॥
अन्तर्लक्ष्यं बहिर्दृष्टिः निमेषोन्मेषवर्जितम् ।
एषा तु शाम्भवी मुद्रा सर्वतन्त्रेषु गोपिता ॥
वेदशास्त्रपुराणानां सामान्यकरणानि च ।
एकैव शाम्भवी मुद्रा गुप्ता कुलवधूरिव ॥

**End:**

दृष्टि(:)स्थिरं(रा) यत्र विनावलोकनं वायु(:)स्थिरं(रो) यत्र विनावरोधनम् ।
मनः स्थिरं यत्र विनावलम्बनं स एव मुद्रा विमला सुखेचरी ॥

### No. 4383. शिवतत्त्वोपलब्धिः.

### ŚIVATATTVŌPALABDHIḤ.

Substance, palm-leaf (Śrītāla). Size, $14\frac{1}{4} \times 2\frac{1}{8}$ inches. Pages, 37. Lines, 12 on a page. Character, Nandināgari. Condition, slightly injured. Appearance, old.

Incomplete.

A work on Yōga describing the postures which a Yōgin should assume while practising Yōga-meditations so as to realise Śiva as the supreme God.

**Beginning:**

मतङ्गे योगसारे—

कारणश्च(ञ्च)प्रवक्ष्यामि यथावत्तन्निबोध मे ।
द्वयोर्जंघनयोर्मध्ये हस्तं वा नय तिर्यगौ(?) ॥
कृतोत्तानौ समौ विद्वान् वामस्योपरि दक्षिणम् ।
न्यसेत्करं यथाङ्गुल्या दक्षिणावाममूलतः ॥
किञ्चिदाकुञ्चिताङ्गुष्ठौ कर्तव्यो नियतात्मनः ।
उरश्चोन्नम्य विततं कृत्वा बाहू परिश्लथे(थौ) ॥
पृष्ठमाकुञ्चयन् स्कन्धदेशमुन्नमयेत्सुधीः ।
निष्कम्पां सुदृढामृज्वीं नातिस्तब्धां न कुञ्चिताम् ।
ग्रीवां विधारयेद्यत्नात् शिरः कायसमं सदा ।
द्यावापृथिव्यभिमुखो दृङ्नासाग्रसमाश्रितः ॥
किञ्चित्संमीलयेन्ने(त्रं) दन्तैर्दन्तान्न संस्पृशेत् ।
तालुमध्यगतेनैव जिह्वाग्रेण महामुने ॥
करणं योगमार्गोक्तं यथावत्परिविस्तरात् ।
एवमादौ सुनिष्कम्पकरणेन महामते ॥
संस्थितस्य यथान्यायं प्राणायामोऽथ वर्ण्यते ।
आपूरयेत्समाकृष्य बहिर्वायोस्स्वकां तनुम् ॥

**End:**

सर्वाज(स)ननिषण्णो यः सर्वदाराधने गुरोः ।
आराधनं शिवस्योक्त्वा प्रेरितस्य प्रवर्तनम् ॥
पदाघ्रातः पशुस्सम्यक्शिवशक्त्या तदेव सः(?) ।
विमुक्तो विगतायासो भोगसङ्गार्णवायुतः ॥
यथाभिगुरुतोऽज्ञस्तु(?) स्वाधिकारवशात्पशुः ।
मन्त्रदीक्षामवाप्नोति यथा निर्वृतिमेष्यति ॥

## No. 4384. शिवयोगप्रदीपिका.

## ŚIVAYŌGAPRADĪPIKĀ.

Substance, palm-leaf. Size, 7¼ × 1⅛ inches. Pages, 46. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Śivastōtra 24*a*, Punaścaraṇādiprayōga 28*a*, Bālāsahasranāma 40*a*, Bālāhṛdaya 68*a*, Bālāstavarāja 72*a*, Bālākavaca 73*a*, Bālāṣṭaka 86*a*, Bālāṣṭōttaraśatanāmāvalī 88*a*, Śivānandalahari 93*a*, Siddhārikōṣṭhaprakaraṇa 120*a*.

Paṭalas 1 to 4 complete.

On the practising of the four kinds of Yōga, viz., Mantra-yōga, Laya-yōga, Haṭha-yōga and Rāja-yōga with a view to attain self-realisation and salvation as a devotee of Śiva.

By Śivayōganātha.

**Beginning:**

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानामेकदन्तमुपास्महे ॥

परमयोगिमनोऽम्बुजषट्पदं त्रिविधकारणकारणमव्ययम् ।
सगुणनिर्गुणतत्त्वमनामयं गुरुसदाशिवलिङ्गमहं भजे ॥

श्रीमद्गुरुप्रसादेन योगं ज्ञात्वा शिवात्मकम् ।
वक्ष्यामि सुप्र(ख)बोधाय शिवयोगप्रदीपिकाम् ॥

शैवतत्त्वविदां श्रेष्ठ वक्ष्यामि श्रु(शृ)णु तेऽधुना ।
शिवयोगपरं गुह्यमपि तद्भक्तिकारणात् ॥

मन्त्रो लयो हठो राजा चेति योगश्चतुर्विधः ।
तमाहुः पूर्वमुनयस्सिद्धाश्शम्भुप्रचोदिताः ॥

एकाक्षरं द्व्यक्षरं वा षडक्षरमथापि वा ।
अष्टाक्षरं वा मोक्षाय मन्त्रं योगी जपेत्सदा ॥

**End:**

किरणाकुञ्चनं नैव भिन्नरूपं विलीयते ।
परमाकुञ्चनं ने(चै)व परमानन्ददायकम् ॥
एतदाकुञ्चनसमं नास्ति नास्ति सुरेश्वरि ।
एतदाकुञ्चनं ज्ञात्वा न पुनर्जायते तदा ॥
वितता धनसिद्धिश्चेत् साक्षाद्ब्रह्ममयो भवेत् ।
अष्टचक्रपरिज्ञानं तन्मध्ये परिशीलनम् ॥
. . . . . . सहस्रारेऽपि शोधनम् ।
लक्षयोजनसिद्धिश्च पश्चाद्वक्ष्यामि सुन्दरि ॥

**Colophon:**

इति तारकग्रन्थे सर्वरहस्योपदेशलक्षणं नाम चतुर्थः पटलः ॥

### No. 4385. शिवयोगप्रदीपिका.
### ŚIVAYŌGAPRADĪPIKĀ.

Substance, palm-leaf. Size, 5⅞ × 1⅜ inches. Pages, 81. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete in 5 Paṭalas.

Same work as the above.

See under the previous number for the beginning.

**End:**

तारणाच्च गुरुशिष्ययोर्द्वयोस्तारकोऽयमिति योगसंज्ञकः ।
तारकं भवमहास्थि(ब्धि)तारकं द्वन्द्व मे(ए)व परिशीलनं कुरु ॥
फलमेकं द्विधाचार्या यथोक्तं साङ्ख्यतारयोः ।
उपाधिरहितस्साङ्ख्यो योगस्सोपाधिकस्स्वयम् ॥

**Colophon:**

इति श्रीसदाशिवयोगिनाथविरचितायां शिवयोगप्रदीपिकायां साङ्ख्य-तारकयोर्वि(गवि)धानं नाम चतुर्थपाटलिका ॥

पुनश्चातिरहस्यं यज्ज्योतिषां निलयं महत् ।
दिव्यलिङ्गस्थलं दृष्टमन्तर्लक्ष्यात्मकं शृणु ॥

* * * *

योगशास्त्ररहस्यानि सिद्धसिद्धान्तवन्ति च ।
संक्षेपतः कृता बोध्या शिवयोगप्रदीपिका ॥
अभ्यासू(सशू)राय जितेन्द्रियाय गुरौ शिवे भक्तिसुनिश्चलाय ।
देयं रहस्यं किल योगशास्त्रं शिष्याय पुत्राय महानुभावैः ॥

**Colophon**:

इति श्रीसदाशिवयोगिनाथविरचितायां शिवयोगप्रदीपिकायां राजयोगप्रकारे अम(न)स्कविधानं नाम पञ्चमपाटलिका ॥

श्लोकाः २५८. रामस्वामिहस्तलिखितम् ॥

No. **4386.** समाधिक्रमः.

SAMĀDHIKRAMAḤ.

Pages, 21. Lines, 20 on a page.

Begins on fol. 240*b* of the MS. described under No. 4336.

On how to attain the state of self-realisation known as Samādhi.

Incomplete.

**Beginning**:

नमश्शिवाय गुरवे नादबिन्दुलयात्मने ।
निरञ्जनं पदं यान्ति नित्यं यत्र परायणाः ॥
अथेदानीं प्रवक्ष्यामि समाधिक्रममुत्तमम् ।
मृत्युघ्नं तु सुखोपायं ब्रह्मानन्दकरं परम् ॥
राजयोगस्समाधिस्स्यादुन्मनी च मनोन्मनी ।
अमरौघो लयस्तत्त्वं शून्याच्छून्यप(त)रं पदम् ॥
अमनस्कं तथाद्वैतं निरालम्बं निरञ्जनम् ।
सहजन्तु . . . . . . . . कवाचकम् ॥

सलिले सैन्धवं यद्वत् साम्यं भजति योगतः
तथात्ममनसोरैक्यं समानैरभिधीयते ॥

**End:**

एतत षडङ्गयोगेन काश्यां नित्यं निषेवते ।
सम्प्राप्य योगनिद्रां स दीर्घाममृतमश्नुते ॥
ओङ्कारं कृत्तिवासश्च केदारश्च त्रिविष्टपः ।
विश्वेश्वरोऽथ विश्वेशः षडङ्गोऽयमिहापरः ॥
पादोदकासिंहभेदज्ञानोदमणिकर्णिकाः ।
षडङ्गोऽयं महायोगो ब्रह्मधर्मह्रदावपि ॥
षडङ्गसेवनादस्मात् वाराणस्यां नरोत्तमः ।
न जातु जायते जन्तुर्जननीजठरे पुनः ॥
गङ्गास्नानं महामुद्रा महापातकनाशिनी ।
एतन्मुद्राकृताभ्यासोऽप्यमृतत्वमवाप्नुयात् ॥

## No. 4387. समाधिक्रमः.

## SAMĀDHIKRAMAḤ.

**Pages,** 29. Lines, 8 on a page.

Begins on fol. 71*a* of the MS. described under No. 4337.

Same work as the above

## No. 4388. स्वरशास्त्रसङ्ग्रहः.

## SVARAŚĀSTRASAṄGRAHAḤ.

**Pages,** 16. Lines, 24 on a page.

Begins on fol. 79*a* of the MS. described under No. 22.

Incomplete.

Deals with the process of creation, of the structure of the body, the production of vocal sounds, &c., the knowledge so derived being considered to be helpful in the practice of Yōga.

**Beginning :**

महेश्वरं नमस्कृत्य शैवेयं गणनायकम् ।
गुरुं च परमात्मानमजं संसारतारणम् ॥

पार्वत्युवाच—

देवदेव महादेव कृपां कृत्वा ममोपरि ।
सर्वसिद्धिकरं ज्ञानं कथयस्व मम प्रभो ॥

कथं ब्रह्माण्डमुत्पन्नं कथं वा परिवर्तते ।
कथं विलीयते देव वद ब्रह्माण्डनिर्णयम् ॥

ईश्वर उवाच—

तत्त्वाद्ब्रह्माण्डमुत्पन्नं तत्त्वेन परिवर्तते ।
तत्त्वे प्रलीयते देवि तत्त्वाद्ब्रह्माण्डनिर्णयः ॥
सर्वलोकस्य भेदानां न देहे तत्त्वाभिन्नकम् ।
इति तत्त्वनिर्णयः ॥

देव्युवाच—

तत्त्वमेव परं मूलं निश्चितं तत्त्ववादिभिः ।
तत्त्वस्वरूपं किं देव तत्त्वमेव प्रकाशय ॥

ईश्वरः—

निरञ्जनं निराकारमेको देवो महेश्वरः ।
तस्मादाकाशमुत्पन्नमाकाशाद्वायुसम्भवः ॥

* * *

अतस्तत्सं(स्तं सं)प्रवक्ष्यामि शरीरस्थं स्वरोदयम्
हंसचार(रु)स्वरूपेण भवेज्ज्ञानं त्रिकालिकम् ॥
गुह्याद्गुह्यतरं सारमप्रकाश्यं प्रकाशितम् ।
इदं स्वरोदयं ज्ञानं सर्वशास्त्रशिरोमणिम् ॥

शृणु त्वं कथितं देवि देहस्थं ज्ञानमुत्तमम् ।
येन विज्ञातमात्रेण सर्वज्ञत्वं प्रजायते ॥

स्वरे च वेदशास्त्राणि स्वरे गान्धर्वमुत्तमम् ।
स्वरे सर्वत्र त्रैलोक्यं स्वरमात्मस्वरूपकम् ॥

**End:**

भवेद्यस्य न मृत्यश्च(त्युश्च) भविष्यति न संशयः ।
गन्धशून्यं भवेद्यस्य जिह्वा च रसवर्जिता ॥

कम्पते च तदा मेरुः घटीमात्रं न तिष्ठति ।
करेऽस्य स्थापयेद्भूमौ मध्यमां च निरोधयेत् ॥

अहोरात्राद्भवेन्मृत्युः प्रतीक्षति च यामिका(म्) ।
वायो(यु)श्शीतल(त्व)माप्नोति अ(चा)ङ्गं कम्पयते स ह ॥

वर्णहीनं यथा देहं कालसन्निधिग(मृ)च्छति ।
लोहदण्डधरं कृष्णं स्वप्नान्ते येन पश्यति ॥

समाधिसंस्थोऽप्यथवा अ(त्व)वश्यं नैव जीवति ।
अथवा दश चिह्नानि कालस्य प्रब्रवीम्यहम् ॥

## No. 4389. स्वरशास्त्रसङ्ग्रहः.

## SVARAŚĀSTRASAṄGRAHAḤ.

Substance, paper. Size, $6\frac{1}{2} \times 5\frac{1}{8}$ inches. Pages, 36. Lines, 16 on a page. Character, Telugu. Condition, fair. Appearance, new.

Begins on fol. 1*a*. The other work herein is Svaracintāmaṇi 19*a*.

Incomplete.

Same work as the above.

No. **4390.** **स्वरूपदर्शनसिद्धाञ्जनम्.**

SVARŪPADARŚANASIDDHAÑJANAM

Substance, palm-leaf. Size, 19 × 1⅜ inches. Pages, 22. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Brahmapraṇavadīpikā 12*a*, Tattvampadārthalakṣyaikyaśataka 25*a*, Rāmacandradayāṣṭaka 29*b*, Siddhāntaślōkatraya 30*a*, Karmākarmavivēkanaukā 30*b*, Pañcīkaraṇa 31*a*, Guṇatrayavivēka 31*a*.

Deals with the two different conditions of Yogic self-realisation known as the differentiated and the non-differentiated Samādhis.

Complete.

**Beginning:**

यस्यैकदेशे वियदादिविश्वं जन्म स्थितिं भङ्गमुपैति शश्वत् ।
अंशांश्यभावाद्यदखण्डसौख्यं तद्ब्रह्म रामाख्यमहं प्रपद्ये ॥

नत्वा श्रीगुरुपादाब्जं यमिनां नियतात्मनाम् ।
योगद्वयसुनिष्पन्नसमाधिः प्रोच्यते मया ॥

सदेहादेहमुक्त्योर्धी . . . पारूपनाशयोः ।
निर्विकल्पसमाध्योस्तज्ज्ञानमेव हि साधनम् ॥

प्रत्यक्परैक्यविज्ञानजन्मने साधनद्वयम् ।
वेदान्तश्रवणं पश्चान्मननं तदनन्तरम् ॥

निदिध्यासनमित्याद्यं (ज्ञान)साधनमीरितम् ।
यमाद्यष्टाङ्गयोगाख्यं द्वितीयं साधनं भवेत् ॥

**End:**

सहस्रारगते तुर्यतुर्ये सर्वं विलाप्य सः ।
विदेहमुक्तिमापन्नो योगी ब्रह्मैव जायते ॥
प्रतिबन्धज्ञानयोगसमुच्चयविधानतः ।
द्वितीयं साधनं प्रोक्तं ज्ञानस्य श्रुतिसंमतम् ॥
स्वरूपदर्शनस्यास्य सिद्धाञ्जनमिदं स्फुटम् ।
कृतं लोकोपकाराय वासुदेवेन्द्रयोगिना ॥

यश्श्रद्धया पठेन्नित्यमनुसन्धानपूर्वकम् ।
एकेन जन्मना योगी भूत्वा कैवल्यमश्नुते ।

**Colophon:**

स्वरूपदर्शनसिद्धाञ्जनं सम्पूर्णम् ॥
स्वरूपदर्शनश्लोका द्वात्रिंशत्रिं(त्रि)शतं स्मृताः ॥

## No 4391. हठप्रदीपिका.
## HAṬHAPRADĪPIKĀ.

Pages, 6. Lines, 20 on a page.

Begins on fol. 238*a* of the MS. described under No. 4336.

Contains 4 Upadēśas.

Complete.

A treatise by Svātmārāmayōgin laying down rules for practising Haṭha-yōga, which is considered to be a preparation for Rāja-yōga.

**Beginning:**

आदौ मुक्तालिमालागलपथविगळत्तालझङ्कारहारी
नादोऽसौ पां(वां)शिकस्यानिलभरितलसद्वंशनिस्साणतुल्यः ।
घण्टानादानुकारी तदनु जलनिधिस्वानधीरो गभीरो
गर्जत्पर्जन्यघोषोऽपर इव कुहरे वर्तते ब्रह्मनाड्याः ॥
यासौ पूर्वं वहन्ती विलसति रसना कुण्डलित्रीपुराव(?)
व्याप्ता कृत्वा सुषुम्नाप्रसनमथ च षट्चकुम्भ(कुम्भे)दा[स्व]स्ववक्त्रा ।
वायो(यू)स्थाधारशक्तिर्भवति मणिगणश्चेन्द्रियस्य प्रदेशे
ब्रह्मद्वारेऽथ डाकिन्यथ मुखविवरे स्यात्फणाकारयुक्ता ॥
ऊर्ध्वा शक्तिस्तत्रमुख्या स्वमन्दे ब्रह्मग्रन्थिस्फोटने कारणत्वात् ।
तस्या मूलं ज्ञायतां वज्रनाडी . . . . श्रीगुरोरेव वक्त्रात् ॥

**End:**

काष्ठगोष्ठीप्रपञ्चेन किं सखे श्रूयतामिदम् ।
पुरा मत्स्ये . . . . . . . प्रलापः ॥

वायौ ध्यानादसञ्चारे लभते सकलां महीम् ।

तथाह . . . . . . . . . पुनः ॥

तथाह वासिष्ठः . . . . . . निरर्थकाः ॥

तथाह विश्वः . . . . . . थीयते ॥

प्रवेशे . . . . . . . . . वञ्चकः ॥

दृष्टिः स्थिरा . . . . . . सेव्यः ॥

इति सकलयोग . . . . . . वाञ्छा ॥

**Colophon:**

इति सहजानन्दसन्तानचिन्तामणिना स्वात्मारामयोगीन्द्रेण विरचितायां हठप्रदीपिकायां चतुर्थ उपदेशः ॥

---

No. **4392.** हठप्रदीपिका.

HAṬHAPRADĪPIKĀ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 68*a* of the MS. described under No. 4337.

Incomplete.

Same work as the above.

---

No. **4393.** हठयोगप्रदीपिका.

HAṬHAYŌGAPRADĪPIKĀ.

Pages, 30. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4376.

Contains 3 Upadēśās complete.

Similar to the above.

**Beginning:**

अनाथनाथाय नमोऽस्तु तस्मै येनोपदिष्टा हठयोगविद्या ।

विराजते प्रोन्म(न्न)तराजयोगादारोढुमिच्छोरधिरोहिणीव ॥

प्रणम्य श्रीगुरोर्नाथो (रोः पादौ) स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठयोगो(विद्यो) पदिश्यते ॥

भ्रान्त्या बहुमतध्वान्ते राजमार्गमजायत(नताम्) ।
हठप्रदीपिकामन्ते(ङ्क्ते)स्वात्माराम(:)कृपाकरः ॥

हठविद्यां हि मच्च(मत्स्ये)न्द्रगोरक्षाद्या हि जानते ।
स्वात्मारामोऽथ वा योगी जाना(नी)ते तत्प्रसादतः ॥

अनाथनाथ मच्च(त्स्ये)न्द्रशाबरानन्दिभैरवं(वाः) ।
चारङ्गिमेषगोरक्षविरूपाक्षबिलेशय(ा): ॥

मन्थानभैरवश्चैव सिद्धबुद्धिश्च कन्दलिः ।

* * * *

गुरूपदिष्टमार्गेण योगमेव सदाभ्यसेत् ।
अत्याहार(:)प्रयासश्च प्रजल्पो नियमग्रहः ॥

जनसङ्गश्च(श्च) तौ(लौ)ल्यं च षट् च योगं विनश्यति ।
उत्साहं(हो) निश्चयं(यो) धैर्यं तत्त्वज्ञानात्मदर्शनं(ने) ॥

जनसङ्गपरित्यागः षट्च(सु) योगे प्रसिध्यति ।
हठस्य प्रथमाङ्गत्वादासनं पूर्वमुच्यते ॥

See under the next number for the end.

## No. 4394. हठयोगप्रदीपिका.

## HAṬHAYŌGAPRADĪPIKĀ.

Pages, 31. Lines, 7 on a page.

Begins on fol. 68*a* of the MS. described under No. 673.

Contains Upadēśās 4 complete.

Same work as the above.

See under the previous number for the beginning.

**End:**

स्वस्थो जाग्रदवस्थायां सुप्तवद्योऽवतिष्ठति(ते) ।
निश्वासोच्छ्वासहीनस्तु निश्चितं मुक्त एव सः ॥

इति सकलसुयोगशास्त्रसिन्धोर्वर(:परि)मथितापिवि(दप) कृष्टसारभूतम् ।
अनुभव(त)हठामृतं[सं]यमीन्द्रा यदि भवता(म)जरामृतत्ववाञ्छा ॥

**Colophon:**

इति सहजानन्दाचिन्तामणिना स्वात्मारामयतीन्द्र(न्द्रेण)विरचितायां हठप्रदीपिकायां चतुर्थे उपदेशः ॥

No. **4395.** **हठयोगप्रदीपिका.**

HAṬHAYŌGAPRADĪPIKĀ.

Pages, 50. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 4362.

Contains Addhyāyas 5 complete.

Similar to the above.

**Beginning:**

प्रणम्य श्रीगुरुं नाथं स्वात्मारामेण योगिना ।
केवलं राजयोगाय हठयोगः प्रकाश्यते ॥

भ्रान्त्या बहुमतध्वान्ते राजयोगमजानताम् ।
हठप्रदीपिकां धत्ते स्वात्मारामः कृपाकरः ॥

हठविद्यां हि गोरक्षमत्स्येन्द्राद्या विजानते ।
स्वात्मारामोऽथ वा योगी जानीते तत्प्रसादतः ॥

* * * *

युवा वृद्धोऽप्यवृद्धो वा व्याधितो दुर्बलोऽपि वा ।
अभ्यासात्सिद्धिमाप्नोति सर्वयोगेष्वतन्द्रितः ॥

**Colophon:**

इति स्वात्मारामयोगीन्द्रविरचितायां हठप्रदीपिकायां प्रथमोऽध्यायः ॥

**End:**

दृष्टिः स्थिरा यस्य विनैव दृश्यं वायुः स्थिरो यस्य विना प्रयत्नम्।
चित्तं स्थिरं यस्य विनावलम्बं स एव योगी स गुरुस्स सेव्यः ॥
इति सकल(सु)योगशास्त्रसिन्धोः परिमथितादपकृष्टसारभूतः(म्)।
अनुभवत हठामृतं यमीन्द्रा यदि भवतामजरामरत्ववाञ्छा ॥

**Colophon:**

इति सहजानन्दचिन्तामणिस्वात्मारामयोगिकृतायां हठप्रदीपिकायां पञ्चमोऽध्यायः ॥

## No. 4396. हठयोगप्रदीपिका.

## HAṬHAYŌGAPRADĪPIKĀ.

Substance, palm-leaf. Size, $7\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 45. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, not old.

Begins on fol. 1*a*. The other work herein is Gītagōvinda 29*a*.

Contains only 4 Adhyāyas complete.

Same work as the above.

## 4. MĪMĀṀSĀ.

### No. 4397. अंशत्रयीविचारः.

### AṀŚATRAYĪVICĀRAḤ.

Pages, 9. Lines, 9 on a page. Character, Grantha.

Begins on fol. 63*a* of the MS. described under No. 4247.

The name of the work cannot be made out with certainty.

A discussion relating to the three things involved in a mandatory or prohibitory order, viz., the thing to be done, the means of doing it, and the procedure to be followed in doing it.

**Beginning:**

साध्यसाधनेतिकर्तव्यताविशिष्टविधिप्रतिषेधयोः प्रतिपादनादिति । भाव्यापरनामधेयं भावनानिष्पाद्यं साध्यम्, तन्निष्पादकं करणं साधनम्, तदनुग्राहकं वस्तु इतिकर्तव्यता, एतत्त्रिविधं भावनाया विशेषणमंशत्रयमित्युच्यते । अत्र भावनाद्वैविध्यात्तद्विशेषणमंशत्रयमपि द्विविधम् । लिङाद्यर्थरूपशब्दभावनां प्रति आख्यातार्थभूतार्थभावनारूपं भाव्यम्, लिङर्थभूतप्रवर्तनाज्ञानं करणम्, अर्थवादलक्षितं प्राशस्त्यमितिकर्तव्यतेत्येकमंशत्रयम् ।

**End:**

दर्वीपिठरादेर्होमसाधनत्वानुमित्यनन्तरमुक्तज्ञानस्य शाब्दत्वाय तर्के बाधकपदकल्पनापेक्षया श्रुतस्य शूर्पपदस्यैव लक्षणया तद्बोधकत्वे लाघवं शूर्पपदप्रयोजनसिद्धिश्चेत्याह— उपलक्षणं वेति । पूर्ववाक्यनिर्दिष्टशूर्पवृत्तिहोमसाधनत्वरूपसाध्यानुरोधेन शूर्पे प्रत्यक्षकरणत्वस्यैव हेतुत्वौचित्यात् । तेनेति । प्रकृतपरामर्शिसर्वनाम्नो(मो)त्तरतृतीयाश्रवणेन.

## No. 4398. अध्वरमीमांसाकुतूहलवृत्तिः

## ADHVARAMĪMĀṀSĀKUTŪHALAVṚTTIḤ.

Substance, paper. Size, 13¼ × 8⅜ inches. Pages, 864. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

A lucid commentary on the Pūrvamīmāṁsāsūtras of Jaimini by Vāsudēvadīkṣita, son of Mahādēva and Annapūrṇa, and pupil of Viśvēśvara. The author was patronized by Ānandarāya, the minister of Śāhaji Śarabhaji Tukōkāji Bhōsala.

From the beginning to the end of the 3rd Pada of the 3rd Adhyāya.

**Beginning:**

निर्मथ्य निगमसिन्धून् विविधन्यायाभिधानमन्थानैः ।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥
जैमिन(नि)मतिप्रसृष्टां शबरकुमारप्रकामनिक्ष(ष्क्र)ष्टाम् ।
मीमांसां दीदांसारीत्या वृत्त्या परिष्कुर्वे ॥
स्फायच्छाबरभाष्यवार्तिकमहाग्रन्थैककल्लोलभवत्-
क्षुभ्यज्जैमिनिसूत्रजालमपृथग्भूरिप्रचारं श्लथम् ।
उद्धृत्य स्फुटबालबोधनकृते श्रीवासुदेवाध्वरी
तत्कौतूहलवृत्तिमाकलयते सन्तो दयन्तामिह ॥

अथेयमध्वरमीमांसा नारब्धव्या, प्रयोजनाभावात्; न चाध्ययनविधि-साध्यार्थज्ञानस्य विचारमन्तरेणानुपपत्तेः तदेव प्रयोजनमिति वाच्यम्; अर्थज्ञानस्याध्ययनविधिभाव्यत्वाश्रवणात् । अध्ययनमर्थज्ञानहेतुः अध्ययनत्वात् भारताद्यध्ययनवदित्यनुमानेन तदर्थमध्ययनस्य प्राप्तत्वाच्च । न च लिखितपाठादिना पक्षप्राप्तमध्ययनमत्र नियम्यत इति वाच्यम्; वैयर्थ्यात् ।

* * * *

**Colophon :**

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मषोडशाररथचक्राकाराद्यनेकगुण-विराजमानमहाग्निविलसितप्रौढापरिमितमहाध्वरस्य श्रीशाहजिशरभजितुकेका-जिभोसलचोळमहीमहेन्द्रामात्यधुरन्धरस्य श्रीमत आनन्दरायविद्वत्सार्वभौ-मस्य पञ्चपुरुषीपोष्येण बाल्य एव तद्दयानिर्वर्तितापरिमितमहाग्निविजृम्भितसर्व-पृष्ठाप्तोर्यामवाजपेयप्रमुख(मख)सन्तर्पितशतमखप्रमुखबर्हिर्मुखेन श्रीमहादेव-वाजपेययाजिसुतेनान्नपूर्ण(ा)गर्भजातेन अपारपदवाक्यप्रमाणपारावारपारीणा-ग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्यावैशद्येन वासुदेवदीक्षितविदुषा विर-चितायामध्वरमीमांसाकुतूहलवृत्तौ प्रथमाध्यायस्य प्रथमः पादः ॥

For the end, see under the next number.

---

No. **4399.** **अध्वरमीमांसाकुतूहलवृत्तिः.**

ADHVARAMĪMĀṀSĀKUTŪHALAVṚTTIḤ.

Substance, paper. Size, 13 × 8 inches. Pages, 253. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

11th Adhyāya complete.

Same work as the above.

For the beginning, see under the previous number

**End :**

न च पश्वर्थानुष्ठितप्रयाजानां कालान्तरभाविपुरोडाश इव आग्नि-गोरपि कालान्तरभाविप्राजापत्यकार्येषूपकारकतासम्भव इति वाच्यम् ; वैषम्यात् । प्रयाज[ा]कृतस्तावददृष्टस्संस्कारः कालान्तरेऽवतिष्ठते, आग्नि-गुस्तु प्रवृत्तिप्रकाशनार्थः ; तत्प्रकाशनस्य च तदानीं प्रध्वस्तस्य कालान्तरे कार्यकार(रि)त्वासम्भवादावृत्तिरिति सिद्धम् ॥

**Colophon :**

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मषोडशाररथचक्राकारादिबहुगुण-विराजमानप्रौढापरिमितमहाध्वरस्य श्रीशाहजिशरभजि(तु)केकाजिभोसलचो-

लमहीमहेन्द्रामात्यधुरन्धरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्याध्वर्युणा पञ्चपुरुषीपोष्येण बाल्य एव तद्दयानिर्वर्तितापरिमितमहाग्निविजृम्भितसर्वपृष्ठसर्वस्तोमाप्तोर्यामवाजपेयप्रमुखमखसन्तर्पितशतमखप्रमुखबर्हिर्मुखेन अपारपदवाक्यप्रमाणपारावारपारीणाग्रजन्मविश्वेश्वरवाजपेययाजिनो लब्धविद्यावैशद्येन श्रीमहादेववाजपेययाजिसुतेनान्नपूर्णागर्भजातेन वासुदेवदीक्षितविदुषा विरचितायामध्वरमीमांसाकुतूहलवृत्तौ एकादशाध्यायस्य चतुर्थः पादः ॥

## No. 4400. अध्वरमीमांसाकुतूहलवृत्तिः.

## ADHVARAMĪMĀṀSĀKUTŪHALAVṚTTIḤ.

Substance, paper. Size, 13¼ × 5½ inches. Pages, 742. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains Adhyāyas 2 to 4 complete.

Wants 35 leaves in the beginning.

Same work as the above.

## No. 4401. अध्वरमीमांसाकुतूहलवृत्तिः.

## ADHVARAMĪMĀṀSĀKUTŪHALAVṚTTIḤ.

Substance, paper. Size, 13¼ × 5½ inches. Pages, 534. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains Adhyāyas 5 to 8 complete.

Same work as the above.

## No. 4402. अध्वरमीमांसाकुतूहलवृत्तिः.

## ADHVARAMĪMĀṀSĀKUTŪHALAVṚTTIḤ.

Substance, paper. Size, 13⅛ × 8⅜ inches. Pages, 736. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

This seems to be the second volume of the work described under No. 4398.

It contains the commentary from the 4th Pāda of the 3rd Adhyāya to the end of the 3rd Pāda of the 5th Adhyāya.

Same work as the above

## No. 4403. अध्वरमीमांसाकुतूहलवृत्तिः.

### ADHVARAMĪMĀṀSĀKUTŪHALAVṚITIḤ.

Substance, paper. Size, 13 × 8¼ inches. Pages, 326. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the 8th Adhyāya complete.

Same work as the above.

---

## No. 4404. अध्वरमीमांसाकुतूहलवृत्तिः.

### ADHVARAMĪMĀṀSĀKUTŪHALAVṚTTIḤ.

Substance, paper. Size, 13¼ × 5½ inches. Pages, 501. Lines, 9 on a page. Character, Devanāgari. Condition, good. Appearance, new.

Tenth Adhyāya only: complete.

Same work as the above.

## No 4405. आपदेवीयम्–(मीमांसान्यायप्रकाशः).

### ĀPADĒVĪYAM: (MĪMĀṀSĀNYĀYAPRAKĀŚAḤ).

Substance, palm leaf. Size, 15⅝ × 1¼ inches. Pages, 150. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

An elementary treatise on the rules of Mīmāṁsā; intended for the use of beginners.

The transcription of this manuscript was completed by one Pillaipakam Vaṅgipuram Śrīnivāsarāghavadāsa of Vēlāmūr on the 1st of Cittirai in the year Svabhānu.

Complete.

**Beginning:**

यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् ।
प्राप्यते तमहं वन्दे गोविन्दं भक्तवत्सलम् ॥

अनन्तगुणसम्पन्नमनन्तभजनाप्रियम् ।
अनन्तरूपिणं वन्दे गुरुमानन्दरूपिणम् ॥

इह खलु परमकारुणिकेन भगवता जैमिनिना अथातो धर्मजिज्ञासेत्यारभ्य द्वादशाध्यायेषु तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः; यथा—यागादिः। स हि यजेत स्वर्गकाम इत्यादिवाक्येन स्वर्गमुद्दिश्य विधीयते । तथा हि—

यजेतेत्यत्रास्त्यंशद्वयम्—यजधातुः प्रत्ययश्च। तत्राप्यस्त्यंशद्वयम्—आख्यातत्वं लिङ्त्वं च । आख्यातत्वं च दशलकारेषु विद्यते; लिङ्त्वं पुनः केवलं लिङ्येव । (तत्र) आख्यातत्वलिङ्त्वाभ्यां भावनैवोच्यते । भावना नाम भवितुर्भवनानुकूलभावुकव्यापारः ।

**End:**

सोऽयं धर्मो यदुद्देशेन विहितः, तदुद्देशेन क्रियमाणस्तद्धेतुः। गोविन्दार्पणबुद्ध्या क्रियमाणस्तु निश्श्रेयसहेतुः । न च तदर्पणबुद्ध्यानुष्ठाने प्रमाणाभावः;

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यासि कौन्तेय तत्कुरुष्व मदर्पणम् ॥" इति स्मृतेः ।

अस्याश्चाष्टकादिस्मृतिवत् प्रामाण्यादित्यन्यत्र विस्तरः ॥

क्वाहं मन्दमतिः क्वेयं प्रक्रिया भट्टसम्मता ।
अ(त)स्माद्भक्तेर्विलासोऽयं गोविन्दगुरुपादयोः ॥

ग्रन्थरूपो मदीयोऽयं वाग्व्यापारस्सुशोभनः ।
अनेन प्रीयतां देवो गोविन्दो भक्तवत्सलः ॥

**Colophon:**

इति श्रीमदनन्तदेवसूनुना आपदेवेन कृतं मीमांसान्यायप्रकाशसंज्ञकमीमांसाप्रकरणं सम्पूर्णम् ॥

## No. 4406. आपदेवीयम्–(मीमांसान्यायप्रकाशः).
## ĀPADĒVĪYAM : (MĪMĀṀSĀNYĀYAPRAKĀŚAḤ).

Substance, palm-leaf. Size, 15⅝ × 1½ inches. Pages, 174. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Some leaves in the beginning and end are broken.

Same work as the above.

## No. 4407. आपदेवीयम्–(मीमांसान्यायप्रकाशः).
## ĀPADĒVĪYAM : (MĪMĀṀSĀNYĀYAPRAKĀŚAḤ).

Substance, paper. Size, 8 × 6⅜ inches. Pages, 113. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Bhāṭṭaparibhāṣā 57*a*.

Complete

Same work as the above.

## No. 4408. आपदेवीयम्–(मीमांसान्यायप्रकाशः).
## ĀPADĒVĪYAM : (MĪMĀṀSĀNYĀYAPRAKĀŚAḤ).

Substance, palm-leaf. Size, 18⅜ × 1½ inches. Pages, 93. Lines, 8 on a page. Character, Grantha. Condition, not good. Appearance, old.

Complete.

Same work as the above.

## No. 4409. उपक्रमपराक्रमः.
## UPAKRAMAPARĀKRAMAḤ.

Substance, palm-leaf. Size, 14¾ × 1⅜ inches. Pages, 122. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

On the relative superiority of the initial in relation to the final passages in the interpretation of connected by continuous Vedic texts.

By Appayadīkṣita.
Incomplete.

**Beginning:**

उपक्रमस्य प्रबलत्वमूचिरे ययोपसंहारविरोधिनो बुधाः ।
प्रतिष्ठितां तामिह युक्तिसन्ततिं प्रबोधयामः प्रतिकूलजल्पितान् ॥

मीमांसकास्तावदुपक्रमोपसंहारयोर्विरोधे सत्युपक्रमस्य प्राबल्ये न्यायमेवमाहुः—सर्वस्यापि शब्दस्य स्वार्थलङ्घने विरोधः कारणम् । स च प्रतियोगिनि दृष्टे ज्ञायते । न चोपक्रमदशायामुपसंहारो विरोधी ज्ञात इत्युपक्रमो मुख्यवृत्तिरेव युक्तः; उपसंहारो मुख्यवृत्तिश्चेन्न तेन सम्बध्यते; आकाङ्क्षावशेन हि सम्बन्धः ।

**End:**

नन्वेवं स्वर्गलोकं समागतिपरम्परापर्यवसानभूमित्वेन समर्थितवतो दाल्भ्यस्य पक्षे शालावत्यकृतेनाप्रतिष्ठितं वै किल ते दाल्भ्य सामेति अप्रतिष्ठितस्य दोषोद्भावने शालावत्यस्स्वयम्प्रतिष्ठारूपं किञ्चित्तथात्वेन विवक्षतीत्यवगमात्तदनन्तरं यमलोक इति होवाचेति शालावत्यवचनमपि ब्रह्मविषयं स्यात्; ब्रह्मण एवासङ्कुचितसर्वप्रतिष्ठारूपत्वात्, ब्रह्म पुच्छं प्रतिष्ठेति श्रवणाच्च । मैवम्—तदनन्तरं तद्ब्रह्मत्वगमकान्तवत्त्वश्रवणतद्गम्यान्तरप्रपञ्चनानुसारेण तस्य प्रतिष्ठ(ा)लो.

## No. 4410. उपक्रमपराक्रमः.

## UPAKRAMAPARĀKRAMAḤ.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 36. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vidhirasāyanasukhōpajīvinī (Vidhirasāyanavyākhyā) 19*a*.

Incomplete.

**Same work as the above.**

## No. 4411. उपक्रमपराक्रमः.
## UPAKRAMAPARĀKRAMAḤ.

Substance, palm-leaf. Size, 18⅝ × 1½ inches. Pages, 34. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as the above.

---

## No. 4412. जैमिनीयन्यायमालाविस्तरः.
## JAIMINĪYANYĀYAMĀLĀVISTARAḤ.

Pages, 46. Lines, 7 on a page.

Begins on fol. 34*a* of the MS. described under No. 1416.

From the 1st Pāda of the 1st Adhyāya to the end of the 3rd Adhikaraṇa of the 2nd Pāda, and from the 4th Adhikaraṇa of the 1st Pāda of the 2nd Adhyāya to the end of the 6th Adhikaraṇa of the same Adhyāya.

A metrical treatise containing the rules of interpretation and sacrificial procedure as found in the Mīmāṁsā philosophy: with a prose commentary.

By Mādhavācārya.

**Beginning:**

वागीशाद्यास्सुमनसस्सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
युक्तिं मानवतीं विदन् स्थिरधृतिर्भेदे विशेषार्थभा-
गाप्तोहं(हः) क्रमकृत्प्रयुक्तिनिपुणः श्लाघ्यातिदेशोन्नतिः ।
नित्यस्फूर्त्यधिकारवान् गतसदाबाधः स्वतन्त्रेश्वरो
जागर्ति श्रुतिमत्प्रसङ्गचरितः श्रीबुक्कणक्ष्मापतिः ॥
यद्ब्रह्म प्रतिपाद्यते प्रगुणयत्तत्त्वंच(त्पञ्च) मूर्तिप्रथां
तत्रायं स्थितिमूर्तिमाकलयति श्रीबुक्कणक्ष्मापतिः ।
विद्यातीर्थमुनिस्तदात्मविलसन्मूर्तिस्त्वनुग्राहिका
तेनास्य स्वगुणैकखण्डितपदं सार्वज्ञ्यमुद्योतते ॥

इन्द्रस्याङ्गिरसो नलस्य सुमतिः शैब्यस्य मेधातिथिः
धौम्यो धर्मसुतस्य वैन्यनृपतेः स्वौजा निमेर्गौतमः ।
प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो
यद्वत्तस्य विभोरभूत्कुलगुरुर्मन्त्री तथा माधवः ॥

स खलु प्राज्ञजीवातुस्सर्वशास्त्रविशारदः ।
अकरोज्जैमिनिर्मिते न्यायमालां गरीयसीम् ॥
तां प्रशस्य सभामध्ये वीरश्रीबुक्कभूपतिः ।
कुरु विस्तरमस्यास्त्वमिति माधवमादिशत् ॥
कृपामव्याहतां लब्ध्वा परार्थ्यप्रतिमोऽभवत् ।
स भव्याभा(द्भा)रतीतीर्थयतीन्द्रचतुराननात् ॥
निर्माय माधवाचार्यो विद्वदानन्ददायिनीम् ।
जैमिनीयन्यायमालां व्याचष्टे बालबुद्धये ॥

न्यायमालाया आदौ स्वकीयग्रन्थत्वद्योतनाय स्वमुद्रारूपमनेकार्थ[त्व]गर्भं देवतानमस्कारप्रतिपादकं श्लोकं पठति—वागीशाद्या इति । इष्टदेवतां नमस्कृत्य चिकीर्षितार्थ(परिपालनाय)प्रतिपाद(पाल)के स्वामिनि विद्यमान(महिमान)मनुस्मारयति—युक्तिं मानवतीमिति । . . . . . . . राज्ञः सर्वज्ञत्वं सोपपत्तिकं प्रकटयति—यद्ब्रह्मेति । . . . . . . . . . . उक्तगुणोपेतस्य राज्ञो मन्त्रिणं नानानिपुणदृष्टान्तैर्हितकारितया प्रशंसति—इन्द्रस्येति । . . . . . चिकीर्षितग्रन्थे श्रद्धातिशयमुत्पादयितुं कर्तृगौरवं प्रकटयति—

श्रुतिस्मृतिसदाचारपालको माधवो बुधः ।
स्मार्तं व्याख्याय सर्वार्थं द्विजार्थं श्रौतमुद्यतः ॥

सर्ववर्णाश्रमानुग्रहाय पुराणसारपराशरस्मृतिव्याख्यानादिना स्मार्तो धर्मः । इदानीं द्विजानां विशेषानुग्रहाय श्रौतधर्मं व्याख्यानाय प्रवृत्तो ग्रन्थमारिप्सुर्गुरुमूर्त्युपाधिकं सकलवेदशास्त्रप्रवर्तकत्वेनोचितेष्टदेवतारूपं पर-

मेश्वरमादौ नमस्कृत्य श्रोतृप्रवृत्तिसिद्ध्यर्थं विषयप्रयोजनं दर्शयन् तं ग्रन्थं प्रतिजानीते—

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
जैमिनीयन्यायमाला श्लोकैस्संगृह्यते स्फुटम् ॥

* * * *

एको विषयसन्देहपूर्वपक्षावभासकः ।
श्लोकोऽपरस्तु सिद्धान्तवादी प्रायेण कथ्यते ॥
चत्वारोऽवयवा एकश्लोकेनोक्ताः क्वचित्क्वचित् ।
यत्र क्वापि बहुश्लोकैरुच्यन्तेऽतो न विस्तरः ॥

* * * *

सर्वथापि सहस्रे द्वे नातिक्रामति संग्रहः ।
मीमांसासागरस्तेन क्रीडापुष्करिणी कृतः ॥

* * * *

संगतिं व्युत्पादयति—

शास्त्रेऽध्याये तथा पादे न्यायसंगतयस्त्रिधा ।
शास्त्रादिविषये ज्ञाते तत्र संगतिरूह्यताम् ॥

* * * *

शास्त्रस्याध्यायानां चासाधारणं विषयं दर्शयति—

धर्मो द्वादशलक्षण्यां(ण्या) व्युत्पाद्यस्तत्र लक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञिकाः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात् ॥

लक्षणानि अध्यायाः द्वादशानां लक्षणानां समाहारः द्वादशलक्षणी तादृशस्य द्वादशाध्यायोपेतस्य शास्त्रस्य धर्मो विषयः प्रमाणादयः प्रसङ्गान्ता द्वादशपदार्थाः । क्रमाद्द्वादशानामध्यायानां विषयः—

प्रथमेऽध्याये विध्यर्थवादरूपं प्रमाणं निरूपितं, द्वितीये यागदानादीनां कर्म(क्रम)भेदः, तृतीये प्रयाजादेः दर्शपूर्णमासाद्यर्थत्वेन तच्छेषत्वं,

चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्त्या अनुष्ठानं न तु क्रत्वर्थप्रयुक्त्ये-त्येवमादयः, पञ्चमे क्रमनियतिविधेयत्वादयः, षष्ठे कर्तुरधिकारो नान्धा-देरित्यादयः, सप्तमे समानमितरच्छ्येनेनेत्यादि प्रत्यक्षवचनेनाग्निहोत्रादि-नाम्ना अनुमितवचनेन सामान्यतोऽतिदेशः, अष्टमे सौर्यं चरुं निर्वपेत् इत्यत्र निर्वापस्तद्धितेन देवतानिर्देशः एकदेवत्यत्वमोषधिद्रव्यकत्वमित्यादिलिङ्गेन आग्नेयपुरोडाशेतिकर्तव्यतैव सूर्यस्येत्येवमादिविशेषतोऽतिदेशः, नवमे प्रकृतावग्नये जुष्टं निर्वपामि इति पठिते मन्त्रे विकृते सौर्यचरौ अग्नि-पदपरित्यागेन सूर्यपदप्रक्षेपेण सूर्याय जुष्टं निर्वपामीत्येवमाद्यूहः, दशमे कृष्णलेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणसंभवेन लोप इत्ये-वमादिबाधः, एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेन उपकार इत्यादितन्त्रं, द्वादशे प्रधानस्य पशोरुपकारा-यानुष्ठितेन प्रयाजाद्यङ्गेन पश्वङ्गपुरोडाशेषु उपकार इत्यादिप्रसङ्गः ॥

See under the next number for the end.

## No. 4413. जैमिनीयन्यायमालाविस्तरः.

## JAIMINĪYANYĀYAMĀLĀVISTARAḤ.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 306. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

From the end of the 7th Adhyāya to the end of the 12th Adhyāya.

Same work as the above.

See under the previous number for the beginning.

**End:**

आर्त्विज्यं किं त्रिवर्णस्थं (विप्रयोग्येव वाग्रिमः ।
विद्यावत्त्वान्न तद्युक्तं ब्राह्मणस्यैव तत्स्मृतेः ॥

विप्रक्षत्रियवैश्यानामधीतवेदानां विद्यावत्त्वादार्त्विज्यमस्तीति चेत् न; विप्रस्यैवार्त्विज्यस्मरणात्) । तथा च याज्ञवल्क्यः—

प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा । इति । एवं स्मृत्यन्तराण्युदाहरणीयानि । तस्माद्विप्रस्यैवार्त्विज्यमिति सिद्धम् ॥

वेदानां स्थितिकृत्पुरा हरिरभूत्तत्सूत्रकृज्जैमिनिः
तद्भाष्यं शबरो(ऽ)भ्यधाद्वदितवान् तद्विस्तरं माधवः ।
सोऽयं नित्यकलत्रपुत्रधनभुग्भूम्याधिपत्यस्थितिः
दीर्घायुस्सह बन्धुभिर्विजयतामाचन्द्रमातारकम् ॥

**Colophon:**

इति श्रीमत्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टश्रीमाधवविरचिते (जैमिनीय)न्यायमालाविस्तरे द्वादशाध्यायस्य चतुर्थः पादः ॥ समाप्तश्चाध्यायः ॥

## No. 4414. जैमिनीयन्यायमालाविस्तरः.

## JAIMINĪYANYĀYAMĀLĀVISTARAḤ.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{1}{2}$ inches. Pages, 334. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains Adhyāyas 7 to 12.

Same work as the above.

---

## No. 4415. तन्त्रवार्त्तिकटीका—न्यायसुधा.

## TANTRAVĀRTIKAṬĪKĀ: NYĀYASUDHĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 456. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

From the 2nd Pāda to the 4th Pāda of the second Adhyāya. In the second Pāda the beginning is wanting, and in the 3rd and 4th Pāda both beginning and end are wanting.

A commentary on Kumārila's Tantravārtika: by **Bhaṭṭasōmēśvara**, son of Mādhava known as **Trikāṇḍī-Mīmāṁsāmaṇḍana**.

**Beginning:**

नन्वेवमपि भिन्नवाक्योपादाने धात्वर्थानां प्रत्येकमेव [विशेष]भावना-विशेषणता युक्तेत्याशङ्क्याह–तस्मादिति । यस्मात्कल्पनालाघवाय संहृत्य विशेषणत्वं (प्रतीयते, तस्मात्) सच(र्वे)धात्वर्थविशिष्टैकभावनाभिधानार्थ-त्वेनैकार्थत्वात्सर्वं प्रकरणमेकवाक्यमित्यर्थः । तस्मादित्युपसंहारभाष्यं सङ्क्षिप्य व्याचष्टे–एकमिति ॥

* * * *

**Colophon:**

इति श्रीमत्रिकाण्डीमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मज-भट्टसोमेश्वरविरचितायां तन्त्रवार्त्तिकटीकायां सर्वानवद्यकरण्यां न्यायसुधा-ख्यायां द्वितियस्याध्यायस्य द्वितीयः पादः ॥

**End:**

प्रत्ययं चापि दर्शयति ।

शाखान्तरानुवादेन तद्धर्मविधानं शाखान्तराधीतस्य च मन्त्रस्य शाखान्तराधीतेन मन्त्रेण सह विकल्पवचनमित्यन्योन्यधर्मसाङ्कर्यं सूचयन् सर्व.

---

## No. 4416. तन्त्रविलासः.

## TANTRAVILĀSAḤ.

Substance, palm-leaf. Size, 16¾ × 1⅝ inches. Pages, 84. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

A treatise on certain controversial points in Mīmāṁsā: by Lakṣmaṇārya.

Incomplete.

**Beginning:**

मीमांसासरणौ वादकामानां वादिनां मुदे ।
ग्रन्थस्तन्त्रविलासोऽयं लक्ष्मणार्येण तन्यते ॥

केषु चिदधिकरणेषु प्रागुत्तरपक्षभङ्गकलनेन ।
क्रियते तत्र(न्त्र)विलासो(सः) प्रयता अवलोकयन्तु मतिमन्तः ॥

फलश्रुतेस्तु कर्म स्यात्फलस्य[ा]कर्मयोगित्वात् । अग्निहोत्रं प्रकृय-(कृ)त्य श्रूयते—दध्नेन्द्रियकामस्य जुहुयादिति । तत्र संशयः—किमग्निहोत्रात्कर्मान्तरं दधिविशिष्टमिन्द्रियकामाय विधीयते? उत तत्रैव गुणमात्रं फलाय विधीयत इति । तदर्थमिदं विचार्यते—

किं कर्मणः फलमुत गुणादि(देरि)ति । यदि कर्मणः, ततः प्राप्तस्य कर्मणः फलसम्बन्धं गुणसम्बन्धं च एकं वाक्यं न केनाति(पि)विधातुमि(तुंशक्य)ति कर्मान्तरं स्यात्; गुणफलसम्बन्धे तु तन्मात्रं वाक्येन विधीयते; दधिहोमसम्बन्धस्तु आश्रयाश्रयिरूपः प्रकरणप्राप्तोऽनूद्यमानो न वाक्यं भिनत्तीति सिद्धमेकवाक्यत्वमकर्मान्तरत्वेऽपीति फलफलीभावः ।

**End:**

तथा सति सङ्ख्यामुष्ट्यधिकरणविरोधापत्तेः । तथाहि वाजपेये श्रूयन्ते—बार्हस्पत्यो नैवारस्सप्तदशशरावश्चरुर्भवतीति । अस्ति च प्रकृतौ चतुरो मुष्टीर्निर्वपतीति । चतुस्सङ्ख्यामुष्टिद्रव्यं च तदुभयमपि चोदकेनेह प्राप्तम्; चतुर्भिर्मुष्टिभिस्सप्तदशशरावः कर्तुं न शक्यत इत्यन्यतरबाधावश्यम्भावे कस्य बाधः, कस्यानुग्रह इति संशये सङ्ख्याया द्रव्याङ्गत्वात् प्रधानस्य.

No. **4417**. तन्त्रशिखामणिः.

TANTRAŚIKHĀMAṆIḤ.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 81. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains only 12th Adhyāya complete.

A commentary on the Mīmāṁsāsūtras of Jaimini: by Rājacūḍāmaṇi-dīkṣita, son of Vēṅkaṭaśrīnivāsa-dīkṣita.

See under the next number for the beginning.

**End:**

तत्र यदि राजन्यवैश्ययोरार्त्विज्यं स्यात्; तदा तयोरप्या(प्यन्वा)-हार्यदक्षिणा दातव्या स्यात्; तत्र ब्राह्मणग्रहणमनुपपन्नं सत् ब्राह्मणाना-मेवार्त्विज्यं न तु क्षत्रियवैश्ययोरपिरि(पी)ति दर्शयति—तस्माद्ब्राह्मणा-नामेवार्त्विज्यमिति । सत्रे ब्राह्मणानामेवाधिकार इति सिद्धम् ॥

**Colophon:**

इति श्रीमदद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाग्निचित्याप्तवाजपेययाजि-श्रीवेङ्कटेश्वरदीक्षितनियोगानुभवसमुन्मिषितमनीषाविशेषस्य विश्वजि[न]दभि-द्योतिदिवाप्रदीपाङ्कविश्वामित्रवंशमुक्ताफलसत्यमङ्गलरत्नवेङ्कटश्रीनिवासदीक्षि-ततनयस्य कामाक्षीगर्भसम्भवो(व)श्रीराजचूडामणिदीक्षितस्य कृतिषु तन्त्र-शिखामणौ द्वादशाध्यायस्य चतुर्थः पादः ॥

No. **4418.** तन्त्रशिखामणिः.

TANTRAŚIKHĀMAṆIḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 136. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains only the 4th Pāda of the 1st Adhyāya.

Same work as the above.

**Beginning:**

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ।

अत्र भाष्यकारेण उद्भिदा यजेत पशुकामः, वलभिदा यजेत, विश्वजिता यजेत इत्याद्युदाहृत्य किमुद्भिदादिशब्दाः गुणविधयः कर्म-नामधेयानि वेति सन्दिह्योक्तम् । समाम्नायैदमर्थ्यमिति गुणविधिपूर्वपक्षं कृत्वा अपि वा नामधेयं स्यात् इत्यग्रिमसूत्रेण नामधेयत्वं सिद्धान्ति-तम् । तद्यद्युद्भिदादिशब्दानां धर्मप्रमोपयोगसिद्ध्यर्थं ततोऽर्थवादाधि-

करणे नामधेयानां सामान्योपयोगानभिधानेऽपि अर्थवादवदेवाध्ययनविधिवशादेव गुणविधित्वेन नामधेयत्वेन चोभयथाप्युपयोगसिद्धेरनर्थकम् ।

See under the previous number for the end.

## No 4419. तन्त्रशिखामणिः.

## TANTRAŚIKHĀMAṆIḤ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 98. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 119*a*. The other work herein is Vidhidarpaṇa 1*a*.

The 5th Pāda of the 6th Adhyāya incomplete, 6th Pāda complete.

Same work as the above.

---

## No. 4420. तन्त्ररत्नसारः (तन्त्रशिखामणिः).

## TANTRARATNASĀRAḤ (TANTRAŚIKHĀMAṆIḤ).

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 154. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

From the beginning of 7th Adhyāya to the end of 26th Sūtra of the 1st Pāda of the 8th Adhyāya.

Same work as the above, Tantrasāra being apparently another name for Tantraśikhāmaṇi.

**Colophon:**

इति श्रीम(द)द्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रसाग्निचित्यसर्वतोमुखसाग्निचित्याप्तवाजपेययाजिश्रीगोविन्ददीक्षितवरसूनोः साग्निचित्याप्तवाजपेययाजिनः श्रीवेङ्कटेश्वरदीक्षितस्य विनियोगेन(श्री)राजचूडामणिदीक्षितकृते तन्त्ररत्नसारे तन्त्रशिखामणौ सप्तमस्याध्यायस्य तृतीयः पादः ॥

## No. 4421. न्यायरत्नमाला.

## NYĀYARATNAMĀLĀ.

Substance, palm-leaf. Size, 15⅝ × 1½ inches. Pages, 63. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 190*a*. The other work herein is Śāstradīpikā 1*a*.

Begins in the course of the 3rd Paricchēda and ends with the 5th Paricchēda.

An epitome of the Tantra-vartika: by Pārthasārathi-miśra.

**Beginning:**

भाव्यमिव भावनापेक्षते प्रवर्त्यश्च नियोज्यः(म्) । तत्र स्वर्गकामशब्दः किं भावनापेक्षितं भाव्यं समर्पयेदाहोस्विद्विध्यपेक्षितं नियोज्यम्? उभयपरत्वानुपपत्तेर्वैरूप्यापातादन्यतरसिद्धेः । न हि स्वर्गफले कर्मणि अतदर्थी नियोज्यः सम्भवतीति न नियोज्यसिद्धिः । स्वर्गकामस्यान्यफले कर्मणि नियोज्यत्वायोगान्नियोज्यविशेषणफलसिद्धिः । तत्र स्वर्गकामशब्दस्य पुरुषपरत्वान्नियोज्यपरतैव युक्तेति । उच्यते—

विधेरपेक्षितस्सत्यं नियोज्यो न त्वसौ तदा ।
अवधारयितुं शक्यः फलस्य त्वस्ति योग्यता ॥

**End:**

ततस्सर्वविशेषणविशिष्टभावनानुष्ठानं प्रयोजकाप्रयोजकतन्त्र . . . . . . पवादापरिमाणं श्रुत्याद्यवगतक्रतुसहितं फलार्थिनं सकलार्थाङ्गानुष्ठानक्षमं नित्यनैमित्तिकेषु किञ्चिदङ्गानुष्ठानशक्तमपि पुरुषं प्रति विधिर्विधत्त इति । एतत्सर्वं वाक्या.

* * * *

तस्मात्प्रक्रान्तरूपोऽपि विधिस्तावत्प्रतीक्षते ।
यावद्योग्यत्वमापन्ना भावनान्यानपेक्षिणी ॥"

इत्यन्तेन दर्शितव्यमिति ॥

**Colophon:**

इति श्रीन्यायरत्नमालायामङ्गनिर्णये पञ्चमः परिच्छेदः ॥

## No. 4422. भाट्टचिन्तामणिः.

## BHĀṬṬACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 166. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

A work on Mīmāṁsā; by Viśvēśvara *alias* Gāgābhaṭṭa of Viśvāmitragōtra. He was the son of Dinakara and a descendant of Bhaṭṭanārāyaṇa.

This manuscript is said to have been completed by Gaṅgabhaṭṭa of the Kōḍamūrti family on Friday in the month of Caitra in the year Vikrama.

**Beginning:**

असाधकं तु तादर्थ्यात् । एवं प्रयाज्ये(जे) निरूपिते अधिकारिविशेष[ण]निरूपणद्वाराधिकारो निरूप्यते—

कर्तृत्वसमानाधिकरणं भोक्तृत्वमधिकारः । न च जातेष्टियागश्रद्धाधिकारिण्यव्याप्तिः; फले चासमानाधिकरणकर्तृत्वस्य विवक्षितत्वात् । न च यजमाननिष्ठफले च असमानाधिकरणकर्तृत्ववत्सु ऋत्विक्ष्वतिव्याप्तिः, स्वनिष्ठेति विवक्षणे पूर्वोक्ताव्याप्तिरिति वाच्यम्; साधनप्रवृत्तिजनकफलेच्छासमानाधिकरणकर्तृत्वस्य विवक्षणादिति सम्प्रदायः ।

**Colophon:**

इति श्रीमीमांसककुलावतंसभट्टदिनकरसूनुगागाभट्टापराख्यविश्वेश्वर भट्टकृतभाट्टचिन्तामणौ अष्टमस्य चतुर्थः पादोऽध्यायश्च ॥

कोडमर्तिकुलाम्भोधिपूर्णचन्द्रो बुधाग्रणीः ।
गागाभट्टकृतं भाट्टचिन्तामणिमलीलिखत् ॥
विक्रमे चैत्रिके मासि दशम्यां भृगुवासरे ।
गङ्गाभट्टोऽलिखत्साङ्गमष्टमाध्यायमादरात् ॥

**End:**

. सिद्धान्तस्तु पूर्वकर्मणः परिसमाप्तेर्द्रव्यान्तरापेक्षाभावेन तद्विनायोगात् अनुषक्तपूर्वा देवता राज्यद्रव्यकर्मान्तरविधिः । शेषसंस्थाशब्दावपि समानदेवताकतया पूर्वकर्मासमाप्तिसादृश्येन गौ(णौ) । एवञ्च पश्चाष्टारं वनस्पतिमावाहयति । अथ चैनो पक्षसी त्वा ष्ठीवनमिन्द्रपाजस्य.

* * * *

वनस्पतियागभावानुपा(वा)द उपपद्यते ॥

विश्वामित्रकुलध्वजस्समभवद्यो भट्टनारायणः
तद्वंशस्य करीरतां दध(वह)ति यो विश्वेश्वराख्यः कृती ।
गागाभट्ट इति प्रथां दिनकरात्प्राप्तः पितुर्लालना-
त्तद्ग्रन्थे नवमांशकस्समभवच्छ्रीभाट्टचिन्तामणौ ॥

**Colophon:**

इति श्रीमद्भट्टदिनकरसूनुगागाभट्टकृतभाट्टचिन्तामणौ नवमस्याध्यायस्य चतुर्थः पादोऽध्यायश्च ॥

कोडमर्तिकुलाम्भोधिपूर्णचन्द्रो बुधाग्रणीः ।
गङ्गाधरोऽलिखत्साङ्गं नवमाध्यायमादरात् ॥

## No. 4423. भाट्टदीपिका.

## BHĀṬṬADĪPIKĀ.

Substance, palm-leaf (Śrītāla). Size, 19 × 2 inches. Pages, 86. Lines, 11 on a page. Character, Grantha and Telugu. Condition, injured. Appearance, old.

To the end of the 3rd Pāda of 3rd Adhyāya.

A commentary on Jaimini's Mīmāṁsāsūtras: by Khaṇḍa-dēva.

**Beginning:**

दीक्षाङ्गो मन्त्रराशिस्त्रिसवनपुरभूष्षोडशर्त्विक्छदाढ्यो
अ(ह्य)ष्टेष्टिद्दे(द्ध्ये)कगर्भस्त्रिविधपशुभृदाम्नायपाध्ये(वाध्यें)कसाध्यः ।

षोडश्या यन्त्रितो द्वादशशतकगवीदक्षिणाढ्यस्त्रिसंयुक्
चत्वारिंशन्मितामिर्दिशतु सदमृतं चक्रराट् सोमयागः ॥

पादैष्षट्सप्तत्या त्रयोदशशतीमतीतमधिकरणैः ।
अध्यायैष्षोडशभिर्जयति मुनेर्जैमिनेश्शास्त्रम् ॥

विश्वेश्वरं गुरुं नत्वा खण्डदेवस्सतां मुदे ।
तनुते तत्प्रसादेन सङ्क्षिप्तां भ(ा)ट्टदीपिकाम् ॥

इतः प्राञ्चोऽखिला ग्रन्था न्यूनतादोषदूषिताः ।
इयमेकैव पूर्णाभूच्छास्त्रेऽस्मिन्भाट्टचन्द्रिका ॥

इह खलु निखिलपुमर्थानर्थसाधनौ धर्माधर्मौ साङ्गोपाङ्गवेदाध्ययनैकसमधिगम्यौ । तच्च विचारमन्तरेण न भाव्यायालमिति तत्प्रदर्शनाय पर(म)कारुणिको भगवान् जैमिनिराचार्यः सकलविद्योपकारिधर्ममीमांसामथातो धर्मजिज्ञासेत्यारभ्य विद्यते वान्यकालत्वाद्यथा याज्यासम्प्रैषो यथा याज्यासम्प्रैष इत्यन्तैस्सूत्रैर्बह्वधिकरणगर्भितां षोडशलक्षि(क्ष)णीमभ्यर्हितां विद्यां प्रकटीचकार । अधिकरणं तु वेदवत् षडङ्गम् ।

यदाहुः :—

"विषयो विशयश्चैव पूर्वः पक्षस्तथोत्तरः ।
सङ्गतिश्चेति पञ्चाङ्गं प्राञ्चोऽधिकरणं विदुः ॥" इति ॥

प्रयोजनं चेति क्वचित्पाठः । सङ्गतिस्तु प्रसङ्गादिभेदाद्बहुविधा । तत्रेदमाद्यमधिकरणम्—

अथातो धर्मजिज्ञासा ।

अत्र स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिवाक्यं विषयः । वेदाध्ययनानन्तरं वेदार्थविचारः कर्तव्यो न वेति सन्देहः । तत्र पूर्वः पक्षः— अधीत्य समयादिति स्मृत्याध्ययनानन्तरमेव गुरुकुलात्परावर्तनविधानविरोधान्न कर्तव्यः । न चाध्ययनविधित एवार्थज्ञानभाव्यकात्तत्सिद्धिः ;

अर्थज्ञानजनकत्वेनाध्ययनस्य लोक(।)सिद्धत्वेनाविधेयत्वात्तन्नियमस्य चार्थ-ज्ञानेऽनुपयोगात् । अव्यभिचरितक्रतुसम्बन्धाभावेन क्रतुं यावदुपयोग-कल्पनानुपपत्तेश्च न विधेयत्वम् । अतः स्वर्गाद्यर्थमेवाध्ययनं विधी-यते ।

For the end, see under the next number.

---

## No. 4424. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Substance, paper. Size, 13½ × 5⅛ inches. Pages, 400. Lines, 13 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Adhyāyas 5 to 9, 11 and 12 complete.

Begins on fol. 1*b*. The other work herein is Mīmāṁsā-kaustubha 201*b*.

Same work as the above.

For the beginning, see under the previous number.

**End :**

प्रभुत्वात् ।

प्रसङ्गाद्ब्राह्मणस्यैवार्त्विज्यमुत त्रयाणामपि वर्णानामिति चिन्तायां विद्वत्त्वाविशेषात्त्रयाणामपि । यत्तु षण्णां तु कर्मणामस्य त्रीणि कर्म(।)-णि जीविकेत्यनेन ब्राह्मणस्यैव याजनमुक्तं तत्पुरुषार्थम् । अतः क्षत्रिय-वैश्ययोः प्रत्यवायं सोढ्वापि आर्त्विज्यकरणे न क्रतुवैगुण्यमिति प्राप्ते यज्ञं व्याख्यास्याम इत्युपक्रम्य ब्राह्मणा ऋत्विज इति कल्पसूत्रकारैः कात्यायनादिभिरार्त्विज्योद्देशेन ब्राह्मण्यविधानान्मन्त्रार्थवाहे(दे)तिहासादौ तत्तद्गमकसत्त्वाच्च ब्राह्मणस्यैवार्त्विज्यमिति सिद्धम् । तदेवं निरूपितौ द्वादशभिरध्यायैर्धर्माधर्मौ ॥

जैमिनेर्विमलसूक्तिषु मग्नं शुद्धिमाप विपुलां मम चेतः ।
प्रीतिमेतु न(नृ)हरेः पदपद्मे येन जन्मनिवहो न पुनस्स्यात् ॥

**Colophon:**

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां द्वादशाध्यायस्य चतुर्थः पादस्समाप्तः अध्यायश्च ॥

---

## No. 4425. भाट्टदीपिका.

## BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 384. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Saṅkarṣaṇabhāṭṭadīpikā 193*a*.

Same work as the above.

## No. 4426. भाट्टदीपिका.

## BHĀṬṬADĪPIKĀ.

Pages, 28. Lines, 7 on a page.

Begins on fol. 108*a* of the MS. described under No. 4048.

Eighth Adhyāya complete.

Same work as the above.

## No. 4427. भाट्टदीपिका.

## BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 98. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Pādas 2 to 4, in the I Adhyāya, Pādas 1 and 2, in the II Adhyāya, Pādas 1 to 3 in the III Adhyāya complete.

Same work as the above.

## No. 4428. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, 1⅝ × 1⅝ inches. Pages, 79. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Ninth Adhyāya complete.

Same work as the above.

## No. 4429. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 108. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Adhyāyas I and II complete.

Same work as the above.

## No. 4430. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, 19½ × 1⅜ inches. Pages, 150. Lines, 9 on a page. Character, Grantha. Condition, much injured. Appearance, old.

From the end of the 5th Adhyāya to the end of the 2nd Pāda of the 8th Adhyāya.

Same work as the above.

---

## No. 4431. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Pages, 118. Lines, 7 on a page.

Begins on fol. 60*a* of the MS. described under No. 1320.

Adhyāyas 1 and 2 complete.

Same work as the above.

## No. 4432. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, 18⅜ × 1¾ inches. Pages, 118 Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

In the 10th Adhyāya the first four Pādas complete, 5th Pāda incomplete.

Same work as the above

## No. 4433. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 174. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

The 3rd Adhyāya complete, the first Pāda of the 4th Adhyāya incomplete.

Same work as the above

## No. 4434. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Substance, paper. Size, 9¼ × 5⅝ inches. Pages, 33. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, old.

First Adhyāya complete

Begins on fol. 3*a*. The other work herein is Siddhānta-siddhāñjana 1*a*.

Same work as the above.

## No. 4435. भाट्टदीपिका.

### BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, 15⅞ × 1¼ inches. Pages, 367. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 1 (from the 2nd Pāda) 2, 11 and 12.

The 1st Pāda of the 1st Adhyāya is found incomplete towards the end.

Transcribed by Rāmānujasudhīmaṇi.

Same work as the above.

## No. 4436. भाट्टदीपिका.

## BHĀṬṬADĪPIKĀ.

Substance, palm-leaf. Size, 18 × 1¾ inches. Pages, 404. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Adhyāyas 3 to 9 complete ; 10th incomplete.

Same work as the above.

## No. 4437. भाट्टदीपिका.

## BHĀṬṬADĪPIKĀ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 27*a* of the MS. described under No. 4232.

The 2nd Pāda complete in the 1st Adhyāya.

Same work as the above.

## No. 4438. भाट्टदीपिकाव्याख्या—चन्द्रिका.

## BHĀṬṬADĪPIKĀVYĀKHYĀ : CANDRIKĀ.

Substance, paper. Size, 12 × 9⅝ inches. Pages, 280. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

First two Adhyāyas complete.

A commentary on the Bāṭṭadīpikā of Khaṇḍa-dēva: by Bhāskararāya-dīkṣita Mahāgnicit, son of Gambhīrarāya-dīkṣita.

**Beginning :**

श्रीगम्भीरविपश्चितो विकृ(तः पितु)रभूद्यः कोनमा(म्बो)दरे
विद्याष्टाद(श)कस्य मर्मविदभूद्यः श्रीनृसिंहाद्गुरोः ।

यश्च श्री(शि)वदत्तशुक्लचरणैः पूर्णा(भि)षिक्तोऽभव-
त्स त्येना(त्रेता)त्रिपुरा त्रिया(त्रयी)ति मनुते ना(ता)मेव नाथत्य(त्र)यीम् ॥

भागीरथीभि(भी)मर(थी)तटकूटककुप्पटः ।
पाण्डुरङ्गः परं ब्रह्म(स) दैवावृ(व्याहृ)षाकपिः ॥
मीमांसाशास्त्रजीवातुं जैमिन्यादिमुनित्रयम् ।
सरस्वतीश्च द(न)त्वाहं सा(व्या)कुर्वे भाट्टदीपिकाम् ॥

श्रीखण्डदेवोदितभाट्टचन्द्रिकां प्रसारयन् षोडशलक्षणं भुवि ।
स भाट्टचन्द्रस्समुदेति यं सया(व्यधा)न्महा(ह्मि)चिद्भास्कररायभारती ॥

परिपूर्णविधूदयान्वयव्यतिरेकानुविधायिनी सती ।
(प्रथते) कुमुदप्रबोधकृद्विशदार्थं भुवि भाट्टचन्द्रिका ॥

प्रारिप्सितस्य ग्रन्थस्य[ा]विघ्न(विघा)ताद्यर्थं श्रीचक्रसोमयागा(गौ)श्लेषेण स्तौति–दीक्षाङ्ग इति। उमया सहितः शिव इज्यते अस्मिन्निति सोमयागश्चक्र-राजः तदभिन्नो[न्ने]ज्योतिष्टोमो वा। सदमृतं कैवल्यामृतमाभूतसम्प्लवं स्वर्ग-वासं वा दिशतु । चक्रं प्रकृत्य सर्वामृतमयं तथेत्यपाम सोम(म)मृता अभूमेति चागमात् ।

End:

यद्वा । एव(एवं)परम्परयैव द्विवेदिनस्त्रिपाठिनश्चतुर्वेदिनो वा तेषा-मेकवेदीयैकशाखाध्यय(न)स्यैवं नित्यतया तदीयगृहेष्वपि एकस्यैवेच्छया स्वीकारः । परन्तु यद्वे(दी)यशाखाया अध्ययनं तत्सम्बन्ध्येव कलो-(ल्पो)ग्राह्यः । तत्तत्कल्पसूत्राणां व्यवस्थयैव तत्तदङ्गत्वेन एकैकस्य स्व-शाखाङ्गत्वे मानाभावात्। द[ा]शतयकल्पस्य आध्वर्यवकाण्डार्थज्ञानार्थविचा-रेतिकर्तव्यतात्वाभावात् । स्वीयकल्पान्तरोक्तगृह्याङ्गोपसंहारस्तु सम्भवात् द्विवेदिप्रभृतीनामावश्यक एवेति तदाशयः । अध्यायार्थमुपसंहरति–तदे-वमिति । षण्णाञ्च प्रमाणानां मध्ये कतिपयानामेकविषयोपनिपातेऽपि विरो-धाभावान्न बलाबलादिविचार इत्याशयेन वक्तव्यांशाभावात् उत्तराध्यायार्थ-मेव श्रावयति अतः परमिति सर्वं शिवम् ॥

**Colophon:**

इति भाट्टचन्द्रिकायां चन्द्रोदयनाम्नि टीकायां भास्कररायस्य कृतौ द्वितीयसर्गे चतुर्थोऽङ्घ्रिः ॥

इति श्रीगम्भीराध्वरीन्द्रस्य भारत्युपाख्यस्य सूनोः कवेः भास्करस्य कृतौ चन्द्रिकाटीकने भाट्टचन्द्रोदयो(ये) पूर्णतन्त्रे द्वितीयो मयूखः ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणनिखिलतन्त्रस्वतन्त्रभारत्युपनामकश्रीमद्गम्भीरराजदीक्षितात्मजभास्कररायदीक्षितमहाग्निचिता विरचिते भाट्टचन्द्रिकापरनामकभाट्टदीपिकाव्याख्याने भाट्टचन्द्रोदयाख्याने षोडशलक्षणे पूर्णतन्त्रे द्वितीयोऽध्यायस्सम्पूर्णः ॥

## No. 4439. भाट्टपरिभाषा.

## BHĀṬṬAPARIBHĀṢĀ.

Pages, 111. Lines, 20 on a page.

Begins on fol 57*a* of the MS. described under No. 4407.

An elementary work on Mīmāṁsā.

Śabdaparicchēda only complete.

By Pētta-dīkṣhita.

**Beginning:**

अथ शब्दो निरूप्यते—शाब्दप्रमाकरणं शब्दप्रमाणम् । शाब्दप्रमा च शब्दजन्यतात्पर्यविषयाबाधितार्थसंसर्गानुभवः । अत्र शब्दो वा करणम् । शब्दानां प्रमाणत्वे वाक्यार्थज्ञानं फलम् । आन्तरालिकन्तु सर्वं करणव्यापारतया दर्शनीयम् ।

**End:**

याजनादिभिर्ब्राह्मणो धनमार्जयेदिति द्रव्यार्जनशास्त्रेण ज्योतिष्टोमादिशास्त्रस्य ऋत्विगवे(पे)क्षस्याविशेषेण त्रैवर्णिकानामार्त्विज्यमाक्षिप्तम् । प्रवृत्तस्योपकारश्शास्त्रप्रसङ्ग इत्येवमादिरूपेण द्वादशे सापवादः प्रसङ्गो निरूपितः । एवं सप्रपञ्चमुपदेशातिदेशात्मकं शब्दप्रमाणं निरूपितम् ॥

**Colophon:**

इति पेत्तादीक्षितविरचितायां भ(ा)ट्टपरिभाषायां शब्दपरिच्छेदः समाप्तः ॥

## No. 4440. भाट्टरहस्यम्.

## BHĀṬṬARAHASYAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 187. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, not new.

First Paricchēda complete.

An elementary treatise on Mīmāṁsā: by Khaṇḍa-dēva.

**Beginning:**

स्मृत्वा स्मृत्वा पुरारातिं तत्प्रसादावलम्बनात् ।
रहस्यं भाट्टतन्त्रस्य विशदीकर्तुमीश्महे ॥
यज्ज्ञानाज्जैमिनीयोक्तिः स्फुटीभवति तत्त्वतः ।
तद्रहस्यं खण्डदेवः प्रकाशयितुमुद्यतः ॥

तत्र द्वादशलक्षण्यां धर्माधर्मावेव जैमिनिनानुष्ठानोपयोगितया विचारितौ । अत एव यद्यपि धर्मः क्षरति कीर्तनादित्यादौ वैशेषिकतन्त्रे च क्रियाजन्यादृष्टे धे(ध)र्माधर्मप्रयोगस्तथापि धर्मस्त्वनुष्ठितः पुंसामित्यादौ तज्जनकविहितनिषिद्धक्रियादावपि तच्छब्दप्रयोगात्ताविह प्राधान्येन विचार्येते ।

**End:**

तदेवं लिङ्गसङ्ख्याव्यतिरिक्तसुबर्थमात्रस्य सिद्धो भावनान्वयः ॥
नवीनानां नानामननविशदानामयमहो
सुयुक्तीनां पुञ्जैरिह विरचितः कोऽपि जगति ।

महात(न)र्केस्तर्कप्रथिततमसज्ञाततमसां
सुधांशुर्मीमांसामतकुमुदपारस्य जयतु ॥

**Colophon :**

इति श्रीखण्डदेवविरचिते भाट्टरहस्ये प्रथमः परिच्छेदः ॥

## No. **4441.** भाट्टरहस्यम्.

## BHĀṬṬARAHASYAM.

Substance, palm-leaf. Size, 20 × 1 inches. Pages, 114. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

First Paricchēda only complete.

Same work as the above.

## No. **4442.** भाट्टरहस्यम्.

## BHĀṬṬARAHASYAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 31*a* of the MS. described under No. 4232.

Incomplete.

Same work as the above.

---

## No. **4443.** भाट्टरहस्यम्.

## BHĀṬṬARAHASYAM.

Substance, palm-leaf. Size, 15 × $1\frac{3}{4}$ inches. Pages, 48. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Taptacakrādyaṅkanapramāṇāni 25*a*.

Incomplete.

Same work as the above.

## No **4444.** भाट्टसङ्ग्रहः.

## BHĀṬṬASAṄGRAHAḤ.

Substance, palm-leaf (Śrītāla). Size, 17 × 2 inches. Pages, 362. Lines, 13 on a page. Character, Grantha. Condition, good. Appearance, old.

A commentary according to the views of Kumārila Bhaṭṭa on the Mīmāṁsāsūtras of Jaimini: by Rāghavēndrayati, pupil of Sudhīndra.

**Beginning:**

. . . . . . . . . . . . . . . . शास्त्रं प्रणिनाय भगवान् जैमिनिः । तत्राध्यायाः . . . . . . . . . . . . . . . . . . . . . . . . . दाः सहस्र-मधिकरणानीति प्रसिद्धिः । एवमतिगहनात्मके . . . . . . . . . . . . . . . . . . पादनेनारम्भणीयत्वसमर्थ-नार्थमिदमादिमं सूत्रम्—

अथातो धर्मजिज्ञासा इति ।

अत्राध्ययनविधिवाक्यं विचार्यते—लिङ्लोट्क्त(त)व्यप्रत्ययलेटामन्य-तमयुक्तं वाक्यं विधिवाक्यमुच्यते । लिङादिरूपविध्यर्थस्तु प्रयत्नापर-पर्यायभावनाकर्तव्यत्वम् । सा च फलकरणेतिकर्तव्यतारूपांशत्रयवती । अत्र स्वाध्यायोऽध्येतव्य इत्यादिविधिवाक्यं विषयः । स्वाध्यायो नाम क्रमविशेषविशिष्टवर्णराशिः । तद्विषयकगुरूच्चारणानूच्चारणमध्ययनम् । तव्यप्रत्ययस्य भावना ह्यर्थः । तथा च स्वाध्यायगोचराध्ययनेन स्वर्गं भावयेदुत्पादयेदित्यर्थ उत भूतार्थज्ञानं भावयेदुत्पादयेदित्यर्थः—इति सन्देहः ।

पूर्वपक्षस्तु—

फलांशे भावनायास्तु प्रत्ययो न विधायकः ।

इति भट्टोक्तचार्थज्ञानोद्देशेनाध्ययनं विधीयत इति वाच्यम् ।

**End :**

ब्राह्मणा एवार्त्विज्याधिकारिणो न क्षत्रियवैश्यावपि; यज्ञसूत्रकारैर्यज्ञं व्याख्यास्याम इत्युपक्रम्य ब्राह्मणानामेवार्त्विज्यमिति [स्मरतां] क्रत्वर्थेनापि स्मरणात् । तदाह सूत्रकारः—

स्मृतेर्ब्राह्मणानां स्यादिति । फलचमसविधानाच्चेतरेषाम् । सान्नाय्ये च विप्रतिषेधे सोमपीथहेतुत्वात् । चतुर्धा करणे च निर्देशात् । अन्वाहार्ये च दर्शनादिति सूत्रचतुष्टये चानेकलिङ्गान्यपि भाष्ये दर्शितानि । तस्मात् ब्राह्मणानामेवार्त्विज्यमिति ॥

यदाराधनरूपाणि कर्माणि निखिलान्यपि ।
तद्ब्रह्म मे प्रसन्नं स्यादनया कर्मचिन्तया ॥

**Colophon :**

भाष्यवार्त्तिकटीकादिनानाग्रन्थावमर्शिना ।
राघवेन्द्रेण यतिना कृतोऽयं भाट्टसङ्ग्रहः ॥

इति भाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रसुधीन्द्रगुरुपादशिष्यराघवेन्द्रयतिकृते द्वादशाध्यायस्य चतुर्थः पादः ॥

## No. **4445.** मीमांसाकौस्तुभः.

## MĪMAṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 180. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

From the 2nd Pāda of the 1st Adhyāya to the 1st pāda of the 3rd Adhyāya.

A commentary on the Mīmāṁsāsūtras of Jaimini : by Khaṇḍadōva, son of Rudradēva.

**Beginning:**

विघ्नध्वान्तनिवारणैकतरणिर्भक्तौघचिन्तामणि-
र्विद्याकाननगाहनैकसरणिर्मच्चित्तभूषामणिः ।
भूयादेष कुतर्ककर्कशधियां हर्तापहर्ता तदा
मोहानां सुधियां सदैव स पिता कात्यायनीशात्मजः ॥

बृन्दाविपिनविहारी गिरिवरधारी स्वकीयसुखकारी ।
मच्चित्तरङ्गचारी भूयान्नृत्यप्रियः कृष्णः(शौरिः) ॥

शश्वद्बोधतरङ्गा विद्यागङ्गोत्तमाङ्ग(ङ्के) यस्य ।
श्रीरुद्रदेवसंज्ञं जनकं वन्दे सदा स्फूर्त्यै ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।

अत्र "सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्; वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" इत्याद्यर्थवादा धर्माधर्मयोः प्रमाणं न वेति सन्देहः । अत्र लक्षणसङ्गतिः धर्माधर्मप्रमाणनिरूपणात्सुलभैव । यस्यापि मते वेदप्रामाण्यनिरूपणमध्यायार्थस्तस्याप्यस्मिन्नधिकरणे तावत्सङ्गतिस्सुलभैव ।

For the end, see under the next number.

---

No. **4446.** मीमांसाकौस्तुभः.

MĪMĀṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 70. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, not fresh.

Contains 13 Sūtras of the 3rd Pāda of the 3rd Adhyāya.

See under the previous number for the beginning.

**End:**

यदा त्विष्टगतरागापेक्षयानिष्टगतस्योत्कटत्वरूपं बलवत्त्वं तदभावा-त्प्रवृत्त्यभावः । अतश्च रागप्रमिते विरोधाभावान्न विकल्पापत्तिः । अतः कथं प्राप्तबाधत्वावच्छेदेने(न) प्रापकशास्त्रस्य बाधकशास्त्रेण स्वविषयविष-यकताप्रतिबन्ध इति [इति] चेन्न; प्रयोगे प्रापकशास्त्रस्य विषयता-प्रतिबन्धेन बाधकाभावात्; रागप्राप्तनिषेधे त्वर्थवशसम्पन्नप्रवृत्तिप्रतिबन्ध-कत्वेऽपि प्रमाणस्य विषयताप्रतिबन्धाभावात् बाधव्यवहारो भाक्त इत्यनु-सन्धेयम् । तस्मात् सिद्धं श्रुतिलिङ्गादावप्राप्तबाध एवेति सूत्रम् । प्रयो-जनञ्च स्पष्टम् ॥

## No 4447. मीमांसाकौस्तुभः.

## MĪMĀṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 155. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

The 3rd Pāda of the 1st Adhayāya only complete.

Same work as the above.

## No. 4448. मीमांसाकौस्तुभः.

## MĪMĀṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 194. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

The first two Pādas complete in the 3rd Adhyāya.

Same work as the above.

## No. **4449.** मीमांसाकौस्तुभः.
## MĪMĀṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 408. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

From the 4th Pāda of the 1st Adhyāya to the 2nd Pāda of 2nd Adhyāya complete.

Same work as the above.

## No. **4450.** मीमांसाकौस्तुभः.
## MĪMĀṀSĀKAUSTUBHAḤ

Substance, palm-leaf. Size, 20¾ × 1⅝ inches. Pages, 81. Lines 8 on a page. Character, Telugu. Condition, injured. Appearance, not fresh.

Contains the 3rd Pāda, and 11 Sūtras of the fourth Pāda, of the 2nd Adhayāya.

Same work as the above.

## No. **4451.** मीमांसाकौस्तुभः.
## MĪMĀṀSĀKAUSTUBHAḤ.

Pages, 28. Lines, 13 on a page.

Begins on fol. 201*b* of the MS. described under No. 4424.

The 2nd Pāda of the 1st Adhyāya incomplete.

Same work as the above.

## No. **4452.** मीमांसाकौस्तुभः.
## MĪMĀṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 72. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants Beginning.

The fourth Pāda of the 1st Adhyāya only complete.

Same work as the above.

## No. 4453. मीमांसाकौस्तुभः.
## MĪMĀṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, 19 × 1½ inches. Pages, 124. Lines, 8 on a page. Character, Grantha and Telugu. Condition, injured. Appearance, old.

The 2nd Pāda of the 1st Adhyāya complete, 3rd Pāda incomplete.

Same work as the above.

## No. 4454. मीमांसाकौस्तुभः.
## MĪMĀṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 418. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Contains only Pādas 1 to 3 of the 2nd Adhyāya.

Transcribed by Srīraṅgam Srīnivāsaiyaṅgāru.

Same work as the above.

## No. 4455. मीमांसाकौस्तुभः.
## MĪMĀṀSĀKAUSTUBHAḤ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 318. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

From the 4th Pāda of the 1st Adhyāya to the end of 3rd Pāda of the 2nd Adhyāya.

Same work as the above.

## No. 4456. मीमांसाधिकरणन्यायविचारः.
## MĪMĀṀSĀDHIKARAṆANYĀYAVICĀRAḤ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 332. Lines, 4 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

On the topical divisions of the Mīmāṁsā-sūtras.

Incomplete.

The author is not known and the name of the work cannot be made out with certainty.

**Beginning:**

पूर्वशेषोऽत्र लिख्यते । निर्वृत्तधर्मविचारानन्तर्यपरोऽथशब्द इति द्वितीयः पक्षः । सोऽपि न सम्भवति; अर्थज्ञानस्याध्ययनविध्युपदर्शित-फलवत्त्वनिर्वाहाय धर्मानुष्ठान एव प्रवृत्त्यवश्यम्भावात् न तस्य ब्रह्म-विचारावसरः । अत्राहुः—ब्रह्मस्वरूपप्रमाणसाधनफलैस्सह जैमिनीयधर्म-विचार(:)प्रतिज्ञाविषयः अलौकिकश्रेयस्साधनत्वात् कर्मवत्; तेनाथातो धर्म जिज्ञासेतिसूत्रगतधर्मशब्दगृहीततया ब्रह्मणोऽपि जैमिनीयधर्मविचारप्रतिज्ञा-विषयत्वमस्ति ।

**End:**

उक्तं च सुरेश्वराचार्यैः—

श्रवणादिक्रिया तावत्कर्तव्येह प्रयत्नत इति । वेदान्तमूलेतिहासपुरा-णादीनां कल्पसूत्रादिवत् पक्षे प्राप्तिसम्भवात् नियमविधिरेवायम्; आत्म-ज्ञानस्य सर्वादृष्टसाध्यत्वस्य प्रागभिहितत्वात् न नियमविधानानुपपत्तिः ।

* * * *

तस्मात् न श्रवणादिशास्त्रस्य विधिपरत्वे सन्न्यासविधिविरोधः । ननु विधायकत्वे शास्त्रस्य कथं निवर्तकत्वमिति.

## No. **4457.** मीमांसानयविवेकः.

## MĪMĀṀSĀNAYAVIVĒKAḤ.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 144. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearnce, old.

The 2nd Adhyāya complete from the 5th Sūtra of the 1st Pāda; the 7th Adhyāya complete from the 17th Sūtra of the 1st Pāda; and the 8th Adhyāya complete.

A commentary on the Mīmāṁsāsūtras: by Bhavanātha-miśra.

**Beginning :**

(वस्तुत)स्तु किन्नामतः किमाख्याताद्विषयं प्रत्येष्यामीति सन्दिग्धे सन्देहादननुष्ठानं निर्णये त्वनुष्ठानमिति विचारप्रयोजनम् । अत एव व्युत्पत्तिदशायां क्रियाकारकान्वयाभिधानाभ्युच्चयेन पूर्वाधिकरणे राद्धान्तितम् । अत्र चाख्यातात् साध्यावस्थाधिगतेः तदवस्थस्य कृत्यन्वयमुखेन विषयभावयोग्यत्वादाख्यातमेव विषयमर्पयतीति राद्धान्तः । व्युत्पत्त्युपाधितया वेदमधिगतं यदाख्यातमिष्टफलसाधनकर्मक्षणनिचये प्रयुज्यत इति। इष्टफलावच्छेदश्च सजातीयक्षणनिचयस्य च विजातीयक्षणनिचयस्य च। तत्र सजातीये तन्त्रेण धातुर्वर्तते ; विजातीये तु स्वार्थातिरिक्ते । आक्षेपादिष्टसाधनतया च साध्यत्वम् । आक्षेपादेव तेनोच्यते साध्यतया प्रतीयत इति; अदृष्टफले त्वियतः फलसाधनत्वमिति न्यायतोऽवधारणसम्भवादनुष्ठानमिति प्रपञ्चितं दीपशिखायाम् । शेषमप्रस्तुतं भाष्यव्याख्याक्षीणं च ।

चोदना पुनरारम्भः—

अपूर्वाक्षेपसमाधानरूपमिदमाधिकरणम् । तेनापूर्वं कृत्वेत्यस्य समाधानार्थं सत्पूर्वाधिकरणशेषभूतमिति न पृथगारब्धमिति न पृथक्सङ्गतिमपेक्षते । अतः पूर्वमाधिकरणं सशेषमुपोद्घातेन ।

**End :**

राद्धान्तस्तु—

तस्यापूर्वत्वादेको हि विध्यन्तो ग्राह्यः । आकाङ्क्षाबलाद्धि परकीयग्रह इति विकल्पे नाप्यनेकग्रहे मानम् । जुहोतिशब्दोऽपि न विशेषलिङ्गं सर्वगामित्वात् । राष्ट्रभृत्स्वन्यत्रोपदेशोक्तिः पाठाभिप्राया सप्तमेऽप्युक्ता । न चैवमनितिकर्तव्यतया दर्वीहोमापूर्वाणामचोदनार्थता; सामान्यश्रुतस्मार्ताचारप्राप्तधर्मैरगत्या उपकारकल्पतस्तु.

**Colophon :**

इति श्रीमन्महामहोपाध्यायश्रीभवनाथमिश्रविरचिते मीमांसानयविवेके अष्टमस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

## No. 4458. मीमांसापरिभाषा.

## MĪMĀṀSĀPARIBHĀṢĀ.

Pages, 53. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3986.

A short introductory treatise on the techonolgy of the Mīmāṁsā : by Kṛṣṇayajvan.

Incomplete.

**Beginning :**

सूर्यं नारायणं देवं शिवं त्रिपुरसुन्दरीम् ।
धातारं गणनाथं च निरन्तरमहं भजे ॥
बालानां शास्त्रसारार्थलेशबोधाय धीमताम् ।
मीमांसापरिभाषेयं क्रियते कृष्णयज्वना ॥

इह खलु महर्षिणा जैमिनिना द्वादशलक्षण्यां पूर्वमीमांसायां धर्माधर्मावेवानुष्ठानोपयोगितया विचारितौ । तत्र वेदबोधितेष्टसाधनताको धर्मः; यथा—यागादिः । वेदबोधितानिष्टसाधनताकोऽधर्मः; यथा—कलञ्जभक्षणादिः । तयोश्च वेदः स्मृतिराचारश्च प्रमाणम् । तत्र वेदः स्वतन्त्रप्रमाणम् । इतरौ वेदमूलकतया प्रमाणम् । तत्र वेदो द्विविधः—मन्त्ररूपो ब्राह्मणरूपश्चेति । तत्र प्रयोगकालीनार्थस्मरणहेतुतया मन्त्राणामुपयोग इति वक्ष्यते । प्रयोगोऽनुष्ठानम् । तत्कालीनेत्यर्थः । विधायकं वाक्यं ब्राह्मणम् । ब्राह्मणशेषभूतश्चार्थवादः । तस्य विधेयप्राशस्त्यप्रतीतिजननद्वारा विधिवाक्यैकवाक्यतया प्रामाण्यमिति वक्ष्यते । तच्चानेकविधम्—कर्मोत्पत्तिवाक्यं, गुणवाक्यं, फलवाक्यं, फलाय गुणवाक्यं, सगुणकर्मोत्पत्तिवाक्यम्—इत्यादिभेदात् ।

**End:**

पुरोडाशस्य प्रकृतिद्रव्याकाङ्क्षायामनियमेन यस्य कस्याचिद्द्रव्यस्य प्राप्तौ व्रीहिभिर्यजेतेति वाक्याद्व्रीहयो नियम्यन्ते । एवं यवैः.

No. **4459.** मीमांसापादुका.

MĪMĀMSĀ PĀDUKĀ.

Substance, paper Size, $13\frac{3}{8} \times 8\frac{3}{8}$ inches. Pages, 37. Lines, 26 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Kārikādarpaṇa 21*a*. Vēdāntavilāsa 99*a*, Tattvaguṇādarśa 129*a*.

A metrical treatise on Mīmāṁsā: by Vēṅkaṭanātha.

Complete.

**Beginning:**

यस्य श्रीर्नित्यहृद्या निरुपधिगृहिणी नन्दतिच्छन्दवृत्त्या
यस्यापत्यं प्रजेशप्रभृति विहरणं यस्य विष्वक्परार्थम् ।
लीलाभोगापदेशव्यतिभिदुरमिदं यस्य ।विश्वं विभूति-
स्सत्तासिद्धानुकम्पानिधिरवतु स नस्सप्तलोकीगृहस्थः ॥

यस्मादस्माभिरेतद्यतिपतिकथितप्राक्तनप्रक्रियोद्य-
त्कर्मब्रह्मावमर्शप्रभवबहुफलं सार्थमग्राहि शास्त्रम् ।
तं विष्वग्भेदविद्यास्थितिपदविषयस्थेयभूतं प्रभूतं
वन्देयात्रेयरामानुजगुरुमनघ वादिहंसाम्बुवाहम् ॥

वेद्यं वेदैरशेषैर्विधितदितरयोर्विश्वमाज्ञापयन्तं
धर्मैराराधनीयं पितृसुरमुखतश्शाश्वतं धर्ममेकम् ।
साङ्गाधीताक्षरौघस्वरससमुदितापातधीजातरागा
मीमांसेमब्रनन्तं व्यवहितवपुषं कञ्चुकैरुज्झितं च ॥

निर्दोषाध्यक्षसिद्धं कथककुहनयापह्नवार्हे न किञ्चि-
न्न्याये कस्यापि कॢप्तिः कथमपि न भवेदन्यथासिद्धिमाद्भिः ।
निर्बाधं नापि वाक्यादवगतमनृतं निश्चितेऽप्यान्यपर्ये
त्रिस्थूणेऽस्मिन्प्रमाणैः स्थिरमतिभवने मा(भा)ति मीमांसितोऽक्ष(र्थ): ॥

मीमांसेत्येकमेतच्छ्रुतिविषयनयस्तोमसङ्ग्राहि शास्त्रं
षट्काध्यायाङ्घ्रिभेदैर्भिदुरतरतनुस्सा त्रिभिः काण्डभेदैः ।
सङ्गत्या च त्रयाणां क्रमनियतिरपि स्यादिहौचित्यवत्या
विंशत्या लक्षणैः खल्वियमवयाविनी वृत्तिकारोपदिष्टा ॥

विद्यास्थानानि चत्वार्यगणिषत पृथग्वेदरूपत्वसाम्ये
द्वे चाप्यन्ये विभक्ते ह्युपपदघटित(तं)श्चह्म(बृंह)णत्वं दधाने ।
मीमांसाशास्त्रसाम्येऽप्यत इह घटते भिन्नविद्यासमत्वं
नैवं मन्वादिभिस्तत्पृथगनुपठनाभावतस्तत्प्र[वा]हा(णा)त् ॥

काले कौमारिलादिष्वधिकबहुमतौ कस्त्वदिष्टं ग्रहीता
कस्मै रोचेत पूर्वश्रुतहृतमनसे कॢप्तिरन्येति चेन्न ।
स्वीकुर्वन्त्यसदुक्तिं स्वमतगुणतिरस्कारकप्रत्यनीक-
प्रत्यग्विद्याधुरीणप्रथितबहुमहावंशजाता महान्तः ॥

किञ्चित्केनापि दृष्टं प्रतिहतिविषयं तेन तत्ते च तैस्तैः
द्वे चोपादायिषातां द्वितयमपि सदित्यप्रमत्तो न वक्ता ।
इत्थं सत्येकभक्तैरितरपरिहृतौ न व्यवस्था न सिद्धिः
प्रत्येतव्यं तदर्थ्ये(र्थे) पटुतरमतिभिः प्राक्तनं नूतनं वा ॥

शिष्याचार्यौ विरुद्धं ननु(तु) मतमधुना साधयन्तौ प्रसिद्धौ
स्वाभीष्टाच्छास्त्रमन्यत्सुरसचिवमुखैः कल्पितं किं न विद्मः ।

तस्माद्ब्रह्मज्ञजैमिन्युपरचितमिदं त्याज्यमेतन्निरीशं
मैवं व्याघातहानौ मुनिवचसि मुधा बाह्यवद्दृष्टिदौस्स्थ्यात् ॥

सूत्राणामैदमर्थ्यं स्वरसगतिवशात्सम्प्रदायाच्च सिध्येत्
बह्वी(बंही)योभिः प्रमाणैः क्वचन बहुशिरः प्रत्ययश्शान्तिमेति ।
सन्दिग्धे वाक्यशेषप्रभृतिरभिदधे निर्णयोपायभूतः
षड्भिस्तात्पर्यलिङ्गैरपि खलु निखिलं दुर्णयं निर्णयन्ति ॥

सूत्रोक्तं नूनमन्यद्विदुरथ च मिथोऽव्याहतं वृत्तिकाराः
प्राज्ञैर्नारायणार्यैस्तदिह विदधिरे सम्मतास्सूत्रभेदाः ।
सामाचार्योक्तिरेषा समरमुखगता तत्र सत् सद्गृहीतेः
नत्वा तुत्व(नुत्वै)नमाह द्रमिडगुरुरपि ब्रह्मविद्वाक्यभाष्यम् ॥

**End:**

श्रीमद्रामानुजोक्तां स्मृतिमनुसरतामैकशास्त्र्यादिसिद्धे-
रव्याजोपायविद्यापथिकगतिविधौ न्यासि दिङ्मात्रमेतत् ।
शेषं चाशेषमित्थं शितमतिभिरनुप्रेक्ष्य संरक्षितव्यं
क्षुद्रक्षोभार्हतर्कोदितकुहककथावर्णिदुर्नाटकेभ्यः ॥

सङ्क्षिप्तं विस्तृतं वा सरसबहुमतं सावधानप्रियं वा
प्राधान्ये तत्प्रणीतं परफणितिपरिष्कारवृत्त्या स्थितं वा ।
शिक्षासौकर्यतुष्टिप्रचितगुरुजनानुग्रहेद्धं सुधीभिः
श्रद्धेयं नाथजुष्टश्रुतियुवतिशिरोभूषणं भाषणं नः ॥

तत्तत्प्रत्यर्थिवर्गप्रचकितनिगमस्तोमतत्त्वार्थचिन्ता-
विष्वग्वैघट्ट्यघट्टोन्मथनपटुधिया वेङ्कटेशेन क्लृप्ता ।
अक्षोद्या(द्या)तर्कलोष्टैरि(र)तिमहति पदेऽप्यत्यजन्ती स्वसीमां
मीमांसापादुकेयं मितिपथगतिकृन्मृद्नती कण्टकौघम् ॥

विख्यात(तो)वेदघण्टापथ इति वितर्तिं प्रस्तुतां प्रस्तुतार्थो-
मुत्पद्यन्तां पृथिव्यामुपनिषदगदङ्कारवाचः प्रवाचः ।
मिथ्यादृष्टिप्रवाहोदितकुमतिकथाकन्दळीकन्दळीनां
द्रष्टव्याळीकलिप्सादृढनिहितमतिर्दैत्यरोधी रुणद्धि ॥
शाक्यो(क्यौ)लूक्याक्षपादक्षपणककपिलामर्त्यवन्द्यप्रधानै-
रन्यैराम्नायचर्चाकवचधृतिकनद्रोमुखद्वीपिभिश्च ।
बद्दी(बंद्दी)यऽक्षोभितापि श्रुतिरिह बहुधा जायमानेन गोप्ता
कालेकालेऽभिगुप्ता कलहमतितरन्त्यक्षरा रक्षतान्नः ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदा-
न्ताचार्यस्य कृतिषु मीमांसापादुका सम्पूर्णा ॥

---

## No. 4460. मीमांसापादुका.

## MĪMĀṀSĀPĀDUKĀ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 60. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 3*a*. The other works herein are Padmākṣamālikāpratiṣṭhāvidhi 1*a*, Śrīcūrṇapratiṣṭhāvidhi 2*b*.

Complete.

Same work as the above.

## No. 4461. मीमांसामकरन्दः.

## MĪMĀṀSĀMAKARANDAḤ.

Substance, paper. Size, $8\frac{7}{8} \times 5\frac{1}{2}$ inches. Pages, 165. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

A treatise on the authoritative value of Artha-vādas and other similar divisions of the contents of the Vēdās: by Vēṅkaṭādhvarin.

Incomplete.

**Beginning :**

कीर्तिं नश्विरवर्तिनीं क्षितितले पुष्णातु कृष्णाम्बुदः
कश्चित्तापहरो गृहीतकमलः कल्लोलिनीवल्लभात् ।
धिन्वन् जीवनदानतो जगदिदं तन्वन्नदीनां श्रियं
प्राप्तस्साधुकदम्बजृम्भणकरः श्रीवेङ्कटक्ष्माधरम् ॥

अधिकरणधुतविरोधिन्याम्नायोद्धारशमितविबुधार्तौ ।
पुरुषोत्तमे हि चित्तं स्वामिनि जैमिनिमुनौ च मे रमते ॥

ते मीमांसाशास्त्रप्रमथनपरिकलितबुधजनानन्दाः ।
रामशरा इव भान्ति ग्रन्थाः शबरगुरुभट्टचरणानाम् ॥

प्रभाकरतिरस्कर्तुरुत्थिता पार्थसारथेः ।
भाति तत्त्वप्रकाशाय सद्गीता शास्त्रदीपिका ॥

काञ्चीमण्डलमण्डनस्य मखिनः कर्णाटभूभृद्गुरो-
स्तातार्यस्य दिगन्तकान्तयशसो यं भागिनेयं विदुः ।
अस्तोकाध्वरकर्तुरप्पयगुरोरप्येष विद्वन्मणेः
पुत्रः श्रीरघुनाथदीक्षितकविः पूर्णो गुणैरेधते ॥

तत्सुतो वेङ्कटाचार्यस्तर्कव्याकृतितन्त्रवित् ।
तनोति धीमान्मीमांसामकरन्दं सतां मुदे ॥

तन्त्राख्यनन्दनवनप्रथमाननाना-
ग्रन्थामरद्रुमवच(?)कुसुमावलीभ्यः ।
सारान् प्रगृह्य तनुते विबुधाळितुष्ट्यै
चेतोरुजश्शमकरं मकरन्दमेषः ॥

चिरन्तननिबन्धनेष्वहह सत्सु भूयस्स्वपि
प्रयच्छति सतामियं हृदि च(मत्कृतिं) मत्कृतिः

मुदे न किमुदेति भुव्युपवनं नवीनं नृणां
वनेषु हि पुरातनेष्वतिघनेषु जाग्रत्स्वपि ॥
लालित्यप्रमुखैर्गुणैः कतिपयैर्लब्धादरा गृह्णतां
दोषानादरणेन मामकगिरो धीरा दयाशीतळाः ।
स्वादीयस्त्वमुखैर्गुणैरगणयित्वेमं कळङ्कं स्फुटं
स्वीकुर्वन्ति न किं मुदा सुमनसो जैवातृकीयाः कलाः ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।

विधीनां प्रथमे पादे प्रामाण्यमुपवर्णितम् ।
तत्सम्यगर्थवादादेस्त्रिपाद्यां प्रतिपाद्यते ॥

यद्यप्याद्यपादे वेदापौरुषेयत्वप्रसाधनाद्विधीनामिव वेदैकदेशभूतानामर्थवादमन्त्रनामधेयानामपि प्रामाण्यं सिद्धं, तथाप्यर्थवादादीनां द्वारविशेषानिर्धारणेन सिद्धमपि प्रामाण्यम्.

**End:**

एवमपि प्राशस्त्ये लक्षणा दुर्वारैव; लक्षित एव प्राशस्त्ये हेतोस्समर्पणादित्यास्तां विस्तरः । तदर्थशास्त्राद्वाक्यनियमात् बुद्धशास्त्रादविद्यमानवचनादचेतनेऽर्थबन्धनार्थविप्रतिषेधात् स्वाध्यायवद्वचनादविज्ञेयादनित्यसंयोगान्मन्त्रानर्थक्यम्.

### No. 4462. मीमांसामकरन्दः.

### MĪMĀṀSĀMAKARANDAḤ.

**Substance**, palm-leaf. Size, 18⅝ × 1¼ inches. Pages, 62. Lines, 10 on a page. Character, Grantha and Telugu. Condition, much injured. Appearance, old.

Incomplete.

Same work as the above.

## No. 4463. मीमांसाविषयः.

## MĪMĀṀSĀVIṢAYAḤ·

Substance, palm-leaf. Size, 6½ × 1¼ inches. Pages, 60. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Similar to the above.

**Beginning :**

अदृ(ष्टे)धर्माधर्मशब्दप्रयोगः । तथा च धर्मस्त्वनुष्ठितः पुंसामित्यादौ तज्जनकविहितनिषिद्धक्रियायामपि तच्छब्दप्रयोगात् ताविह प्राधान्येन विचार्येते । अथ किं नाम धर्मत्वमधर्मत्वं वा ? न तावद्विहितक्रियात्वं, निषिद्धक्रियात्वम् ; तत्र विहितनिषिद्धक्रियादौ तदनापत्तेः ।

**End :**

वस्तुतः फलावच्छिन्नक्रियावृत्तिगमनत्वादिकमेव तत्तद्धातुशक्यतावच्छेदकामित्युक्तं प्राक् । तदेवं भवन्मते शक्त्यानन्त्य[ता]वत्पूर्वमेव व्युत्पत्त्यानन्त्यमपि * * * * * तावत्प्रातिपदिकार्थस्य ग्रामस्य तत्तत्संसर्गभेदेन वृत्तत्वभेदे चान्वयव्युत्पत्तिद्वयं पुनश्चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तेः.

---

## No. 4464. मीमांसाविषयः.

## MĪMĀṀSĀVIṢAYAḤ.

Pages, 46. Lines, 5 on a page.

Begins on fol. 40*a* of the MS. described under No. 4247.

Similar to the above.

Incomplete.

**Beginning :**

औदुम्बरो यूपो भवतीत्याणप्रत्ययप्रकृतेरुदुम्बरम(रोऽ)र्थः, प्रत्ययस्य जन्यत्वं, यूपशब्दस्य तत्कृतकाष्ठविशेषः, धातोर्भवनम्, आख्यातस्य लक्षण-

याश्रयत्वं, लटः वर्तमानत्वम् । तथा नैयायिकमते एवं शाब्दबोधः—औदुम्बराभिन्नो यूपः वर्तमानसत्तानिरूपिताश्रयत्ववानिति ।

**End:**

द्रव्यनिष्ठकरणत्ववती यागकरणिका ब्रह्मवर्चसभाव्यका भावनेति बोधः फलितः । ब्रह्मवर्चसनिष्ठभाव्यत्वस्य निरूपकधात्वर्थापेक्षायां यागनिष्ठकरणत्वस्य निरूपकापेक्षा.

---

No. **4465.** मीमांसाश्लोकवार्त्तिकव्याख्या—काशिका.

MĪMĀṀSĀŚLŌKAVĀRTTIKAVYĀKHYĀ: KĀŚIKĀ.

Substance, palm-leaf (Śrītāla). Size, $14\frac{3}{8} \times 1\frac{7}{8}$ inches. Pages, 362. Lines, 8 on a page. Character, Malayālam. Condition, injured. Appearance, old.

To the end of Vṛttikāragrantha.

A commentary on Kumārila's Mīmāṁsāślōkavārttika: by Sucarita-śrīmiśra.

**Beginning:**

वार्त्ति(क)कारः शिष्टाचारमनुविदधानो मङ्गलं तावत् करोति—

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयःप्राप्तिनिमित्ताय नमस्सोमार्धधारिणे ॥

दृष्टा हि शिष्टानां प्रवृत्तिस्सर्वकार्येषु मङ्गलपूर्विका। मङ्गलं च देवतास्तुतिनमस्कारादि । तस्य च नियोगतः फलवत्कार्यान्तरारम्भसंयोगात् साक्षादफलत्वाच्च फलवत्सान्निधावफलं तदङ्गमिति न्यायेन कार्यान्तरशेषत्वेऽवधृते सत्यारम्भस्य समाप्तिपर्यन्तत्वादपेक्षिताविघ्नपरिसमाप्तिः फलम् ; अपेक्षितविधेरनपेक्षितविधान(नं) दुर्बलमिति फलान्तरकल्पनाया दुर्बलत्वात् । अतो यथासाम्प्रदायिकमध्यायानध्यायदिस्वाध्यायाविघ्नार्थमेवमि(वे)दमपि ।

तदयमर्थः—विशुद्धौ ज्ञानदेहौ यस्य स तथोक्तः। विशुद्धं च भगवतो ज्ञानम्; रागादिभिर्ज्ञानकारणानामदूषितत्वात्। देहश्चा(स्या) योनिजत्वाद्द्विविधगर्भवेदनाविरहाच्च।

**End:**

अतो जात्याद्यस्तित्वबोधनादनर्खोदितो (?) निर्णयो युक्तः। स चायं बोधो न परमस्माकमेव, येऽपि तु जात्यादीनपलपन्ति तेषामप्यस्ति; तेऽपि हि न तद्बोधमनपलपन्तो जात्यादीनपलपितुमर्हन्तीति ॥

**Colophon:**

इत्युपाध्यायसुचरितश्रीमिश्रकृतौ काशिकाटीकायां वृत्तिकारग्रन्थस्समाप्तः ॥

---

## No. 4466. मीमांसासूत्रम्.

## MÍMÁMSÁSÚTRAM.

Substance, palm-leaf. Size, 15¾ × 1½ inches. Pages, 126. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

The original aphorisms of the Mīmāṁsā philosophy by Jaimini.

Complete in 12 Adhyāyas.

**Beginning:**

अथातो धर्मजिज्ञासा। चोदनालक्षणोऽर्थो धर्मः। तस्य निमित्तपरीष्टिः। सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्। औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशो व्यतिरेकश्चार्थेऽनुपलब्धे (तत्) प्रमाणं बादरायणस्यानपेक्षत्वात्। कर्मैके तत्र दर्शनात्। अस्थानात्। करोतिशब्दात्। सत्त्वान्तरे च यौगपद्यात्। प्रकृतिविकृत्योश्च।

**End:**

प्रभुत्वादार्त्विज्यं सर्ववर्णानां स्यात्। स्मृतेर्वा ब्राह्मणां(णानां) स्यात्। [च] फलचमसविधानाच्चेतरेषाम्। सान्नाय्येऽप्येवं प्रतिषेधस्सोमपीथहेतुत्वात्। चतुर्धा करणे च निर्देशात्। अन्वाहार्ये च दर्शनात् ॥

पो(जपा)श्च द्रव्यत्वेऽपि वनाख्या वा(वचनादिति)साम्नाय्येति चत्वारिं-
शत् ॥

**Colophon:**

द्वादशस्य चतुर्थः पादः ॥

## No. 4467. मीमांसासूत्रम्.

## MĪMĀṂSĀSŪTRAM.

Substance, paper. Size, 11 × 9 inches. Pages, 107. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 29*a*. The other work herein is Sōmakārikā 1*a*

Complete.

Same work as the above.

---

## No. 4468. वादकुतूहलम्.

## VĀDAKUTŪHALAM.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 126. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

A controversial tract on Mimāṁsā.

Incomplete.

Author unknown.

**Beginning:**

विशिष्टविधया तावत् सर्वत्र मत्वर्थलक्षणेति सिद्धान्तः ।

तत्रेयमुपपत्तिः—

सोमेन यजेतेत्यादौ भावनायां समानपदोपात्तयागस्य करणत्वेनान्वयेन सोमादेस्तत्र ना . . . . नापि यागे द्वयोः करणत्वेन यागसाध्यभावनाया अश्रुतत्वेन च न वैयधिकरण्येनान्वयः । अतो भिन्नार्थयोस्सामानाधिकरण्येनान्वयसिद्ध्यर्थं लक्षणा एष्टव्या सोमपदस्य लताविशेष .

. . धात्वर्थविधिश्शङ्क्यः; रूढिपरित्यागापेक्षया सैवोचिता; कारकाणां क्रिययैवान्वय इति नियमात् कथं यागादावन्वयानुपपत्त्या लक्षणा।

**End:**

समस्तानि कृष्णपक्षेषु सम्पठेदिति विधिविहितवेदाङ्गानामध्ययनमर्थ-ज्ञानफलकर्म (कम्); अन्यथा तेषां वैदिकस्वरवर्णादिनिर्णायक(त्वा)सम्भवात्। तन्निर्णयार्थत्वेनैव च तेषां वेदाङ्गत्वात्। अतो न दृष्टान्तस्य साध्यवैकल्यम्। स्तोभाक्षराध्ययने कौतुकादिप्रवृ . . . . . . लौकिकाध्ययने च व्यभिचारवारणार्थं विशेषणद्वय . - . . योरंशतो.

## No. 4469. विधिचमत्कारचन्द्रिका.

### VIDHICAMATKĀRACANDRIKĀ.

**Pages**, 32. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 1804.

A work discussing the nature and authority of scriptural commands.

Apūrvavidhyādyudāharaṇasamarthana—complete, but without beginning.

The left half of a leaf is lost.

Similar to the above.

By Nāyanārya, son of Śrīnivāsa.

**Beginning:**

यत्तु विधिरसायने न्यगादि—व्रीहीन् प्रोक्षतीति व्रीहीनवहन्तीति विधि(धी)नापूर्वनियमविधी; तद्विधेययोर्मन्त्रवर्णत एव प्राप्तत्वादिति। तदापात चमत्कारमात्रम्; व्रीहीणां मेऽथ सुमनस्यमान इत्यादौ व्रीहिपदस्य तत्र तत्रानु-वृत्तिदर्शनेन प्रकृतेऽपि अग्नीषोमाभ्यामिदं हविः प्रोक्षामीति मन्त्राणां व्रीहि-विषयकत्वनियमघटनया स्वरससिद्धतया तद्व्यावृत्त्यै यवसाधारण्यार्थमनयोः प्रकृते रा(आ)वश्यकतया अपूर्वनियमविधिभावप्रतिपादनस्याक्षुण्णत्वात।

अत एवाग्नीषोमीयं पशुमालभेतेत्याकारकवाक्येन पशोरेव हविष्ट्वेन चोदनात् न हृदयादीनां हविष्ट्वमिति पूर्वपक्षे परिप्राप्ते प्रकृतौ द्विर्हविषोऽवद्यतीति हविष एव अवदानसम्बन्धावगत्या प्रकृते यदि पशुर्हविस्स्यात्तस्यैवावदान-सम्बन्ध (:) श्रूयेत ।

**End :**

तस्मादेतद्वाक्यानर्थक्यभीत्या एकप्रयोजनेन चारितार्थ्ये सामान्य-वचनस्य कृत्वा अपरप्रयोजनसङ्गमेनेन षोडश्युत्तरवाक्यसार्थक्यस्यो . . . . . . . . आख्याताश्रवणाद्विशिष्य प्रयोजनकल्पने अनुप-पत्त्यभावाच(च्च) षोडश्युत्तर इत्यस्यानुवादत्वामिति पूर्वमेवोक्तम् ॥

**Colophon :**

इति श्रीवत्सकुलतिलकसर्वलो— . . . . . . . . . . वंशोद्भवश्रीनिवाससूनुनायनार्यविरचितायां विधिचमत्कारचन्द्रिकायामपूर्वविध्याद्युदाहरणसमर्थनम् ॥

## No. **4470.** विधित्रयपरित्राणम्.

## VIDHITRAYAPARITRĀṆAM.

**Substance, paper.** Size, $11\frac{1}{3} \times 8\frac{3}{4}$ inches. Pages, 54. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Subhāṣitakaustubha 29*a*, Kṛṣṇabhāvaśataka 35*a*, Kucaśataka 41*a*, Sītādaṇḍaka 49*a*, Rāmadaṇḍaka 49*b*, Kōmalādaṇḍaka 50*a*.

A treatise on the necessity of dividing Vedic commands into three kinds, namely, Apūrva, Niyama and Parisaṅkhyā.

By Vēṅkaṭādhvarin.

Incomplete.

**Beginning :**

पर्यायवेदचूडार्यश्चकास्तु हृदि मे सदा।
आत्रेयवेङ्कटाचार्यः कविविद्वच्छिखामणिः॥

श्रुत्या ग्राह्ये जन्म यस्मिन्विधीनास्स(नां स)र्वे वर्णारिसद्धिमन्तो यदङ्गे।
भक्त्या ध्येये तत्र नित्ये परास्मिन् देवे देप्या यतन्ते धि(?)॥

भद्रं तनोतु परमं परमेष्ठियज्ञे कॢप्तोदयं वरदनाम किमप्यपूर्वम्।
आत्मन्यवस्थितमिदं निजकीर्तनेन धत्ते स्थिरं फलमथापि यद-
व्यपायम्॥

विदधानमनन्यलभ्यमर्थं नियमं चाभ्युदयाय निर्वहन्तम्।
परिकॢप्तनिवृत्तिधर्मबोधं प्रभुमान्यं परिचिन्तये विधिं च॥

जैमु(मि)निमुनिरस भगवान् जयति प्रज्ञानिधिर्जगत्पूज्यः।
अकृतकसरस्वतीनां मङ्गलसूत्राणि यस्य सूत्राणि॥

प्रख्यातः प्रणतार्तिहृद्गुरुरिति श्रीभाष्यकर्तुर्मुनेः
यो माहानसिकस्तदुक्तिरसिकश्श्रीमान्यदत्राभवत्।

वंशे तत्र हि वादिहंसजलदाचार्यादिभिर्भूषिते
यज्वाभूद्रघुनाथदेशिकमणिः श्रीश्रीनिवासेष्टिनः॥

तनूभवः कवेस्तस्य तनोत्यत्रिकुलोद्भवः।
विधित्रयपरित्राणं वेङ्कटाचार्यदीक्षितः॥

* * * *

विस्तरो विधिरसायने(रि)तो नानुभाष्यत इहाखिलो मया।
तत्र कॢप्तमनुवादनं बुधैर्वीक्ष्य दूषणसमाधिरीक्ष्यताम्॥

अत्र यद्यपि पद्यानामभिप्रायो न दुर्ग्रहः।
तथापि बालबोधाय तन्वे तद्विवृतिं स्वयम्॥

इह खलु निगमनिचयविशदविलोकनसाधननयनधनसहस्रप्रणयनसमुज्जीवितवैदिकलोकस्य भगवतो जैमिन(निमुनिवर)स्य सूत्राण्यधीयानाः श्रोत्रियधूर्वहा अपूर्वविधिनयमीविधपरिसङ्ख्यावध्यीभधानान् त्रिविधान्विधीनधीयन्ते.

*　　*　　*　　*

अस्यायमभिप्राय :—

व्रीहीन्प्रोक्षतीत्यपूर्वविधिः; तदभावे दार्शपूर्णमासिकेषु व्रीहिषु प्रोक्षणस्य कुतोऽप्यप्राप्तेः। व्रीहीनवहन्तीति नियमविधिः; तदभावे पुरोडाशार्थमुपात्तानां व्रीहीणां तुषविमोकासिद्ध्यर्थं लोकसिद्धतत्कारणताकेषु अवहनननखविदलनादिषु समानपक्षपातादाक्षेपादवघातस्यापि विदलनादिवत्पक्षत एव प्राप्तेः। इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इति परिसङ्ख्याविधिः; तदभावे अगृभ्णन्रशनामित्याग्निचयनप्रकरणाम्नातस्य तत्प्रकरणस्थाश्वरशनाग्रहण इव तथाभूतगर्दभरशनाग्रहणेऽपि लिङ्गाविशेषेण प्राप्तेः।

**End:**

एवं नित्यप्राप्तौदासीन्यभिन्नाकिञ्चिन्निवृत्तिनियतं यस्य यद्विषयप्राप्तित्वावच्छिन्नं तत्र तत्प्राप्तिकारि विधिर्नियमविधिरिति लक्षणमपि युक्तमेव। अवहननस्य दार्शपूर्णमासिकेषु व्रीहिषु या प्राप्तिराक्षेपि किं वैधिवासाद्विविधापि नित्यप्राप्तौदासीन्यात्.

---

## No. **4471.** विधिदर्पणः.

## VIDHIDARPAṆAḤ.

**Pages, 242.** Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4419.

Deals with the meaning and value of Vedic commandments.

The first leaf has lost its right half.

By Kollūrī Nārāyaṇa-śāstrin.

Complete.

**Beginning :**

. . . योदि विनापि कालनियमं कामादिवर्गार्थिनां
सर्वेषां युगपच्चतुर्विधफलप्राप्तौ निदानात्मकः।
धमस्सद्भव . . . . . . . . . .
. . . . . . दरहितस्तं रामरूपं भजे ॥
आकृष्टे मुरवैरिनाभिकमले देवेन येनाब्जभूः
पारावारविहारकौतुकवता व . . . . . ।

* * * *

तं वन्दे करिराजशावमनिशं वाञ्छाधिकार्थप्रदम् ॥
कोल्लूरिकुलपाथोधिसुधाकरमहं भजे।
जनकं जननीं चापि लक्ष्माम्बां सोम . . ॥
(वीतमात्सर्यविदुषः प्रणम्य) शिरसा मुहुः।
तेषामनुज्ञां सम्प्राप्य करोमि विधिदर्पणम् ॥
वीषाकरकराक्रान्तिवर्जितं चरणाम्बुजम्।
सोमनाथमखीन्द्राणां गुरूणां च(शरणं भजे) ॥

. . . . . . . . . . प्रयाजवत् दर्शपूर्णमास-प्रकरणे श्रूयते व्रीहीन् प्रोक्षतीति। तत्र विचार्यते—किमिदं प्रोक्षणं गुणकर्म उत प्रधानकर्मेति।

**End :**

ततश्च प्रकृतोद्देश्यसम्बन्धित्वेन प्रकृतधात्वर्थप्रतियोगिकत्वेन प्रकृत- . . . . . . . . . . विधेयप्रकृतधात्वर्थानुष्ठानफलको विधि(:) परिसङ्ख्याविधिरिति लक्षणार्थः पर्यवस्यतीति सर्वं समञ्जसम् ॥

**Colophon:**

इति कोल्लूरिनारायणशास्त्रिविराचिते विधिदर्पणे विधित्रयनिरूपणं सम्पूर्णम् ॥

---

## No. 4472. विधिदर्पणः.
## VIDHIDARPANAḤ.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 20. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete and fragmentary

Same work as the above.

## No. 4473. विधिदर्पणः.
## VIDHIDARPAṆAḤ.

Substance, palm-leaf. Size, 17⅛ × 1⅛ inches. Pages, 152. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

## No. 4474. विधिरसायनव्याख्या—विधिरसायनसुखोपजीविनी.
## VIDHIRASĀYANAVYĀKHYĀ : VIDHIRASĀYANASUKHŌPAJĪVINĪ.

Substance, palm-leaf. Size, 14⅞ × 1⅛ inches. Pages, 184. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

The original text and the commentary are both by Appayadīkṣita.

The treatise regarding the three kinds of scriptural commandments. The commentary is called Vidhirasāyanasukhōpajivinī, and Vidhirasāyana is the name of the original work.

Incomplete.

**Beginning:**

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूप(ः)
श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ॥

जन्मस्थेमलयं समस्तजगतां यस्यैव लीलायितं
यस्मिन्नायतते भवास्थिरमहापाशक्षयः प्राणिनाम् ।
तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं
साम्बं ब्रह्म रसालमूलरसिकं साक्षात्क्रियासं सदा ॥

यत् कुमारिलमतानुसारिणा निर्मितं विधिरसायनं मया ।
पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विचार्यते ॥

प्रारिप्सितस्य प्रकरणस्याविघ्नेन समाप्तये सूत्रकारस्य महर्षेरनुस्मरण-रूपं मङ्गळमाचरन्नेव प्रकरणारम्भं तावदाक्षिप्य समाधत्ते—

विख्याता मुनिवर्यसूक्तिषु विधास्तिस्रो विधिस्रोतसा-
माचार्यैर्विशदं विभक्तविषयास्ताश्च व्यवस्थापिताः ।
किं तत्रास्ति विचार्यमार्यमथिते मार्गे निसर्गोज्ज्वले
नानोदाहरणैस्तु ताः प्रविशदीकर्तुं प्रवर्तामहे ॥

मुनिवर्यस्य भगवतो जैमिनेस्सूत्रेषु विधिर्वा स्यादपूर्वत्वान्नियमार्थो वा पुनश्श्रुतिः परिसङ्ख्या वा इत्येवमादिषु त्रयो विधिप्रकाराः प्रसिद्धाः—अपूर्वविधिर्नियमविधिः, परिसङ्ख्याविधिश्चेति । ते च भट्टपादैः परस्परा-सङ्कीर्णविषयतया स्पष्टमेवोपपादिताः । तत्र स्वत एव निरवद्ये ग्रन्थका-रैश्च बहुभिर्निरूपिते अपूर्वविध्यादिविभागे नूतनं किञ्चिद्विचारणीयं नास्त्येव ।

See under the next number for the end.

No. **4475.** विधिरसायनव्याख्या—विधिरसायनसुखोपजीविनी.

VIDHIRASĀYANAVYĀKHYĀ :
VIDHIRASĀYANASUKHŌPAJĪVĪNĪ.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 301. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

For the beginning, see under the previous number.

This manuscript is said to have been copied by Varadārya, a disciple of Anantārya, who was son of Vīrarāghava and who learnt the Bhāṣya and other works under Śrīnivāsāchārya.

Complete.

Same work as the above.

**End :**

नन्वेवमुत्तरेऽहं द्विरात्रस्य गृह्यत इति षोडशिग्रहनियमविधौ लक्षणस्याव्याप्तिः ; तत्र षोडशिग्रहप्राप्तिव्यतिरिक्तायास्तेन सह प्रकृतौ विकल्पितस्य षोडशिग्रहाभावस्य निवृत्तेरभावेन न षोडशिग्रहप्राप्तौ तदभावनिवृत्तिनियतत्वासम्भवात् तदिति चेन्नाभेदेऽपि व्याप्तिसत्त्वेन तत्सम्भवात् भेदगर्भव्याप्तेरस्य विवक्षितत्वात् ॥

**Colophon :**

इत्यप्पयदीक्षितकृतौ विधिरसायनसुखोपजीविनी समाप्ता ॥

श्रीनिवासार्यकरुणालब्धभाष्यादिसम्पदम् ।
वीरराघवगुरोस्सूनुमनन्तार्यमहं भजे ॥

काश्यपश्रीवरदार्येण लिखितेयं कृतिर्गुरोः ।
आज्ञया विष्णुभक्तेन तद्भक्तपरिचारिणा ॥

## No. 4476. विधिरसायनव्याख्या–विधिरसायनसुखोपजीविनी.

### VIDHIRASĀYANAVYĀKHYĀ : VIDHIRASĀYANASUKHŌPAJĪVINĪ.

**Pages**, 242. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 4410.

Contains only 35 stanzas.

**Same** work as the above.

---

## No. 4477. विधिसुधाकरः

### VIDHISUDHĀKARAḤ.

**Substance**, paper. Size, $8\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 106. Lines, 17 on on a page. Character, Telugu. Condition, good. Appearance, new.

On what is meant by Vidhi, Niṣēdha and Artha-vāda. By Anantācārya.

**Beginning**:

श्रीमद्रामानुजार्ये श्रुतिशिखरशिखाधाविमेधाविलास-
प्रोद्यद्व्याहारगुम्भैर्विदलितकुमुदाडम्बरं तं भजामि ।
यद्भाष्याम्भोधिगर्भप्रसृमरसुमहायुक्तिवीचीविहारा
वेलान्ते विक्षिपन्ति प्रतिकथकघटादूषणाळीतृणानि ॥
शेषार्यवंशवार्धीन्दुरनन्ताचार्यकोविदः ।
नत्वा नाथादिमाचार्यान् चक्रे विधिसुधाकरम् ॥

विधिनिषेधार्थ(वाद)रूपेण वाक्यं त्रिविधम् । तत्र प्रवर्तकं वाक्यं वीधिः—ओदनकामः पचेत, स्वर्गकामो यजेत इत्यादिलौकिकालौकिक-वाक्यानां प्रवृत्तिहेतुभूतकृतिसाध्यताबोधद्वारा प्रवर्तकत्वात् । अथ ब्रह्मवि-दाप्नोति परामित्याद्यर्थवादानामपि फलसाधनताबोधद्वारा प्रवर्तकत्वात्तत्राति-प्रसङ्गः.

**End:**

एवञ्च भिन्नशाखावाक्ययोरेकग्रन्थाविषययोरतुल्यबलत्ववत् आहवनीय-
न्यायेन विद्दष्टा . . . . . . णोदाहरणस्य च सार्थकं(क्यम्)
इति सर्वं समञ्जसम् ॥

---

## No. 4478. शास्त्रदीपिका.

## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 301. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains from the 2nd Pāda of the 1st Adhyāya to the end of the 5th Adhyāya.

A commentary on the Mīmāṁsāsūtras of Jaimini: by Pārthasārathi-miśra, son of Yajñātman.

**Beginning:**

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।

अथातो धर्मजिज्ञासेत्यत्र प्रमाणस्वरूपसाधनफलैस्साभासैर्धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः । तत्र प्रथमेऽध्याये प्रमाणं निरूप्यते—किं प्रमाणं धर्म इति । तेन यदेव किञ्चिद्धर्मप्रमाणनिरूपणमर्थवादमन्त्रस्मृतिनामधेयगोचर तत्सर्वमत्रैव सङ्गतम्; नह्यत्र चोदनाप्रामाण्यप्रसाधनं लक्षणार्थः; येन स्मृत्यादेरसङ्गतिस्स्यात् । किं तर्हि धर्मप्रमाणनिरूपणम्? तदुक्तं भाष्यकारेण—को धर्मः कथंलक्षणक इति । सर्वस्मिंश्चाध्याये तदेव क्रियत इति समस्तमध्यायं प्रमाणलक्षणमाचक्षत इति । तेन लक्षणसङ्गतिस्तावत्सिद्धा ।

See under the next number for the end.

## No. 4479. शास्त्रदीपिका.

## ŚĀSTRADĪPIKĀ.

Pages, 379. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4421.

From the 4th Pāda of the 6th Adhyāya to the end of the 12th Adhyāya.

Same work as the above.

See under the previous number for the beginning.

**End:**

राजसूयकयाज्यस्य विनश्यति यथा हविरिति चाब्राह्मणार्त्विज्यहविर्विनाशः स्मृतः। लिङ्गानि च दर्शितानि ब्राह्मणा(ना)मिदं हविः इत्येवमादीनि। तस्माद्ब्राह्मणानामेवार्त्विज्यमिति सिद्धम्॥

मध्येतन्त्रं यस्य येषां विधानं तेषु प्रोक्तो मुख्यतन्त्रप्रसङ्गः।
जिज्ञास्यो यो धर्म उक्तश्चतुर्धा सम्प्रज्ञातो लक्षणैर्द्वादशान्तैः॥

**Colophon:**

इति श्रीमहोपाध्यायश्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वादशस्याध्यायस्य चतुर्थः पादः। समाप्तश्चाध्यायः॥

समाप्ता शास्त्रदीपिका॥

---

## No. **4480.** शास्त्रदीपिका..

## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 32. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins from the 1st Pāda of the 3rd Adhyāya and breaks off in the 2nd Pāda thereof.

Same work as the above.

## No. **4481.** शास्त्रदीपिका.

## ŚĀSTRADĪPIKĀ.

Substance, paper. Size, $9\frac{3}{4} \times 3\frac{3}{4}$ inches. Pages, 73. Lines, 10 on a page. Character, Devanāgarī. Condition, fair. Appearance, old.

The 9th Adhyāya complete.

Same work as the above.

## No. 4482. शास्त्रदीपिका.
## ŚĀSTRADĪPIKĀ.

Substance, paper. Size, 11¼ × 4⅝ inches. Pages, 101. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Contains 2nd Adhyāya complete.

Same work as the above.

## No. 4483. शास्त्रदीपिका.
## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 194. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance .

From the 2nd Pāda of the 2nd Adhyāya to the end of the 4th Pāda thereof.

Same work as the above.

## No. 4484. शास्त्रदीपिका.
## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, 16½ × 1¾ inches. Pages, 143. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins in the course of the 2nd Pāda of the 5th Adhyāya, and ends with the 8th Adhyāya.

Nine leaves are wanting in the beginning.

Same work as the above.

## No. 4485. शास्त्रदीपिका.
## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, 18⅛ × 1¾ inches. Pages, 180. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins in the 2nd Pāda of the 1st Adhyāya and breaks off in the 2nd Pāda of 3rd Adhyāya.

Same work as the above.

## No. 4486. शास्त्रदीपिका.

## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{3}{4}$ inches. Pages, 165. Lines, 10 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins in the 2nd Pāda of the 1st Adhyāya and breaks off in the 4th Pāda of the 3rd Adhyāya.

Same work as the above.

## No. 4487. शास्त्रदीपिका.

## ŚĀSTRADĪPIKA.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 60. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Begins in the 2nd Pāda of the 1st Adhyāya and breaks off in the 3rd Pāda of the 1st Adhyāya.

Same work as the above.

## No. 4488. शास्त्रदीपिका.

## ŚĀSTRA DĪPIKĀ.

Substance, palm-leaf. Size, $16 \times 1\frac{5}{8}$ inches. Pages, 146. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Form the 2nd Pāda of the 3rd Adhyāya to the end of 4th Adhyāya.

Same work as the above.

## No. 4489. शास्त्रदीपिका.
## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, 18⅜ × 1⅜ inches. Pages, 96. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins in the 5th Adhyāya and breaks off in the 8th Pāda of the 6th Adhyāya.

Same work as the above.

## No. 4490. शास्त्रदीपिका.
## ŚĀSTRADĪPIKĀ.

Substance, paper. Size, 11 × 4¾ inches. Pages, 157. Lines, 10 on a page. Character, Devanagari. Condition, good. Appearance, old.

The 10th Adhyāya complete.

Same work as the above.

---

## No. 4491. शास्त्रदीपिका.
## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 106. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

This contains also some portions of the Mīmāṁsākaustubha.

Adhyāyas 7 and 8 complete. Breaks off in the 2nd Pāda of the 9th Adhyāya.

Same work as the above.

---

## No. 4492. शास्त्रदीपिका.
## ŚĀSTRADĪPIKA.

Substance, palm-leaf. Size, 16¾ × 1⅜ inches. Pages, 260. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

Adhyāyas 9 to 12 complete.

Same work as the above.

## No. 4493. शास्त्रदीपिका.

### ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 250. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, not new.

Wants beginning in the 1st Pada of the 3rd Adhyāya, and breaks off in the 4th Pāda of the 4th Adhyāya.

Same work as the above.

## No. 4494. शास्त्रदीपिका.

### ŚĀSTRADĪPIKĀ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{3}{4}$ inches. Pages, 154. Lines, 12 on a page. Character, Telugu. Condition, injured. Appearance, new.

From the 2nd Pāda of the 1st Adhyāya to the end of the 4th Pāda of the 3rd Adhyāya.

The 1st Pāda of the first Adhyāya is wanting, as in all the other copies in the library.

Same work as the above.

## No. 4495. शास्त्रदीपिका.

### ŚASTRADĪPIKĀ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 67. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 152*a*. The other work herein is Śāstradīpikā-vyākhyā (Prabhāmaṇḍala).

In the third Adhyāya the first two Pādas complete, the third Pāda incomplete.

Same work as the above.

## No. 4496. शास्त्रदीपिका.

## ŚĀSTRADĪPIKĀ.

Substance, palm-leaf (Śrītāla). Size, 10⅝ × 1¼ inches. Pages, 138. Lines, 13 on a page. Character, Grantha. Condition, injured. Appearance, old.

From the 2nd Pāda of the 4th Adhyāya to the end of the 6th Adhyāya.

Same work as the above.

## No. 4497. शास्त्रदीपिकाव्याख्या—न्यायकर्पूरवर्तिका.

## ŚĀSTRADĪPIKĀVYĀKHYĀ: NYĀYA KARPŪRAVĀRTIKĀ.

Substance, palm-leaf. Size, 15 × 1⅝ inches. Pages, 76. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

The first Pāda of the 2nd Adhyāya complete.

The first five leaves are broken.

A commentary on the Śāstradīpikā : by Rājacūḍāmaṇi-dīkṣita, son of Śrīnivāsa-dīkṣita.

**Beginning:**

दयुक्त इत्याह—अपूर्वस्येति । न च सर्वेषां फलभावनाकरणत्वेऽप्याग्नेयादिषट्कवदेकफलजनकत्वान्नानेकादृष्टकल्पनमिति वाच्यम्; तदैतद्वदेवानेकोत्पत्त्यपूर्वकल्पनावश्यम्भावादिति भावः । ननु श्रुतफलसम्बन्धोपपत्त्यर्थमनेककल्पनं नायुक्तम्; प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि—इति न्यायात् । अत उक्तमेककल्पनयेति । फलसाधनमिति । भावनाकरणतयेति शेषः । ननु वक्ष्यमाणभावार्थाधिकरणन्यायात् भावार्थस्यैव भावनाकरणत्वसिद्धौ तत्सामानाधिकरण्याच्छ्येनादीनां नामत्वम्; न ततः प्रागित्यत उक्तं सम्भवादिति ।

For the end, see under the next number.

## No. 4498. शास्त्रदीपिकाव्याख्या—न्यायकर्पूरवर्तिका.

## ŚĀSTRADĪPIKĀVYĀKHYĀ : NYĀYA-KARPŪRAVARTIKĀ.

**Substance**, paper. Size, 12 × 9⅜ inches. Pages, 727. **Lines**, 27 on a page. Character, Grantha. Condition, good. **Appearance**, new.

This manuscript is in 2 vols. The 1st volume begins in the 5th Pāda of the 3rd Adhyāya, and ends with the 1st Pāda of the 5th Adhayāya; it contains also some portions of the 2nd Pāda. The second volume is a continuation of the first volume and goes to the end of the 8th Adhyāya.

See under the previous number for the beginning.

**End:**

तस्मादिति । नन्वेवं कथं दर्वीहोमेष्वितिकर्तव्यताकाङ्क्षाशान्तिरिति चेद्व्यापारान्तरस्य मुखतोऽनुपदेशादतिदेशे च प्रमाणाभावादनुत्पन्नस्य करणत्वानुपपत्तिलभ्येनोत्पादनरूपेण व्यापारेण श्रुताभ्यां द्रव्यदेवताभ्यां च तत्राकाङ्क्षापरिपूर्तिरित्यनवद्यम् ॥

सूत्रार्थः स्पष्टः ॥

**Colophon:**

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्कविश्वामित्रवंशमुक्ताफललक्ष्मीभवस्वामिभट्टसुकृतपरिपाकाद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रषड्भाषावल्लभप्रतिदिनप्रबन्धपरमेश्वराष्टभाषासार्वभौमसाग्निचित्सर्वक्रतुविश्वजिदतिरात्रयाजिसत्यमङ्गळरत्नखेटश्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य श्रीमदर्धनारीश्वरदीक्षितगुरुचरणारविन्दलब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु शास्त्रदीपिकाव्याख्यायां कर्पूरवर्तिकाख्यायामष्टमस्याध्यायस्य चतुर्थः पादः ॥

सम्पूर्णश्चाध्यायः ॥

## No. 4499. शास्त्रदीपिकाव्याख्या—न्यायकर्पूरवर्तिका.

## ŚĀSTRADĪPIKĀVYĀKHYĀ: NYĀYA-KARPŪRAVARTIKĀ.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 639. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

From the 6th Pāda of the 3rd Adhyāya to the end of the 8th Adhyāya.

**Same work as the above.**

---

## No. 4500. शास्त्रदीपिकाव्याख्या—प्रभामण्डलः.

## ŚĀSTRADĪPIKĀVYĀKHYĀ: PRABHĀ-MAṆḌALAḤ.

Pages, 301. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4495.

Contains the 2nd and 3rd Adhyāyas complete.

A commentary on the Śāstradīpika: by Yagñanārāyaṇa-dīkṣita, son of Kōṇḍubhaṭṭōpādhyāya.

**Beginning:**

तानि द्वैधं गुणप्रधानभूतानि । अस्याधिकरणस्य सङ्गतिं वक्तुं वृत्ताधिकरणार्थमनुवदति—एवन्तावदित्यादिना तस्येत्यतः प्राक्तनेन ग्रन्थेन । तावच्छब्दो वाक्यालङ्कारे, वृत्तार्थकथनक्रमद्योतको वा । अस्त्यपूर्वमित्यनेनापूर्वाधिकरणार्थो दर्शितः । भावार्थाधिकरणवृत्तमर्थं दर्शयति—तच्चेति । चोऽवधारणार्थः ।

**End:**

अनीशानः अस्वामीत्यर्थः । न परिक्रय इति । संभवतीति शेषः । ननु भक्षस्याश्रुतत्वात् कथं तादर्थ्यमित्यत्राह—शेषस्य त्विति । ननु तथाप्यन्यैव प्रतिपत्तिरस्त्वित्यत्राह—योग्यतया चेति । न चैतावता एषां केषाञ्चिद्भक्षणमित्याह—कर्तृविशेषेति । न च तावता नि(य)मादृष्टकल्पनमपीत्याह—तदिति । दृष्टासंभवे अदृष्टकल्पनमिति भावः । दृष्ट-

मेवाह्—तेषामिति । ननु भक्षणेन कथं कौशलं भवतीत्याह्—भक्षणार्थीति । अधिकरणार्थमुपसंहरति—इति भक्षार्थेतेति ।

**Colophon :**

इति श्रीसकलपण्डितमण्डलाखण्डलचरकूरिकोण्डुभट्टोपाध्यायतनयेन श्रीपितामहयज्ञेश्वरभट्टोपाध्यायशिष्येण काश्यपगोत्रजबह्वृचाग्रेसरेण तिरुमलयज्वप्रियसहोदरेण गाङ्गाम्बिकेयेन श्रीयज्ञनारायणदीक्षितेन विरचिते शास्त्रदीपिकाव्याख्याने प्रभामण्डलाख्याने तृतीयस्याध्यायस्य चतुर्थः पादः ॥

## No. 4501. शास्त्रदीपिकाव्याख्या—मयूखमालिका.

### ŚĀSTRADĪPIKĀVYĀKHYĀ: MAYŪKHAMĀLIKĀ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 704. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

From the 2nd Pāda of the 1st Adhyāya to the end of the 7th Pāda of the 3rd Adhyāya.

A commentary on the Śāstradīpikā of Pārthasārathimiśra: by Sōmanātha, son of Sūru-bhaṭṭa and younger brother of Vēṅkaṭādri-yajvan.

**Beginning :**

आविष्करोतु विबुधैरभिनन्दनीयां वाचं स कोऽपि मम वल्लवसार्वभौमः ।
वंशोऽपि यत्परिगृहीततया बिभर्ति वाचालतां त्रिभुवनैकविमोहयित्रीम् ॥

अधिगत्य कलामखिलामग्रभवाद्वेङ्कटाद्रियज्वगुरोः ।
वचनैरनतिप्रचुरैर्व्याकुर्वे शास्त्रदीपिकां विशदाम् ॥

विबुधाः प्रणम्य मूर्ध्ना बहुधा वः प्रार्थये कृतावस्याम् ।
अर्पयत दृशं सूक्ष्मां निन्दत परतोऽभिनन्दत वा ॥

परिलिखितः किञ्चिदपि प्रकृतिर्भवति प्रमाद इति ।
अन्विष्य गुणकणानप्यभिनन्दत वीतमत्सरा विबुधाः ॥

आम्नायस्य . . . . . . . मुच्यते ।

नन्वर्थवादादिप्रामाण्यविचारस्य धर्मविचारात्मकत्वाभावात् कथं शास्त्रसङ्गतिरित्याशङ्क्य शास्त्रार्थप्रदर्शनपरप्रथमसूत्रार्थकथनेन शास्त्रसङ्गतिन्तावद्दर्शयति—अथात इति । अत्राथशब्द आनन्तर्यार्थकः । अतश्शब्दस्तु अनधीतवेदो वेदार्थभूतं धर्मं विचारयितुं न शक्नोतीति पूर्ववृत्ताध्ययनस्य विचारहेतुत्वकथनार्थः, तन्मुखेन अथशब्दस्यार्थान्तरशङ्कानिराकरणार्थश्च । सूत्रे च कर्तव्येति पदमध्याहर्तव्यम्; अत एव ग्रन्थकारेण जिज्ञास्यत्वेनेति विध्यर्थककृत्यप्रत्ययः प्रयुक्तः । ततश्च अथ वेदाध्ययनानन्तरम् । अतः पूर्ववृत्ताध्ययनाद्धेतोः । धर्मस्य जिज्ञासा विचारः । कर्तव्य इति सूत्रस्य श्रौतोऽर्थः ॥

* * * *

**Colophon:**

इति श्रीनिट्टलकुलतिलकसूरभट्टमहोपाध्यायतनूभवस्य वेङ्कटाद्रियज्वगुरुचरणानुजस्य सोमनाथसर्वतोमुखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां मयूखमालिकाख्यायां प्रथमस्याध्यायस्य द्वितीयः पादः ॥

See under the next number for the end.

## No. **4502.** शास्त्रदीपिकाव्याख्या—मयूखमालिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHAMĀLIKĀ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 360. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

From the 4th Adhyāya to the end of the 6th Adhyāya.

**Same work as the above.**

For the beginning, see under the previous number.

**End :**

चोदनेति । पशुसामान्यमिति। पशुशब्दस्य पशुत्वसामान्यार्थत्वं तन्त्ररत्ने प्रपञ्चितमिति भावः । नित्यमिति । यवानां प्रातिस्विकविधिविषयत्वात् तत्प्रकाशनसामर्थ्येन तत्र प्रकरणावगतं नित्यत्वं परित्यज्यते ; इह तु पश्वन्तराणां प्रातिस्विकविध्यभावात् प्रकरणावगतं नित्यत्वं विना कारणं न परित्याज्यमिति भावः । तस्मादिति । तथा च छागेनैव पशुयागे अधिकार इति भावः। अध्यायार्थमुपसंहरन् शिष्यहितार्थं वृत्तवर्तिष्यमाणषट्कद्वयार्थं संगृह्णाति—अधिकृतामिति ॥

**Colophon :**

इति श्रीनिद्दलकुलतिलकसूरिभट्टमहोपाध्यायतनूभवस्य वेङ्कटाद्रिसुयज्वगुरुचरणानुजस्य सोमनाथसर्वतोमुखयाजिनः कृतौ शास्त्रदीपिकाव्याख्यायां षष्ठस्याध्यायस्याष्टमः पादः ॥ समाप्तश्चाध्यायः ॥

## No. 4503. शास्त्रदीपिकाव्याख्या—मयूखमालिका.

## ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHAMĀLIKĀ.

**Substance**, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 214. **Lines**, 7 on a page. Character, Telugu. Condition, injured. **Appearance**, old.

Contains the 1st Adhyāya incomplete.

Same work as the above.

## No. 4504. शास्त्रदीपिकाव्याख्या—मयूखमालिका.

## ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHAMĀLIKĀ.

**Substance**, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 226. **Lines**, 10 on a page. Character, Telugu. Condition, much injured. **Appearance**, old.

In this manuscript, the first 6 Pādas in the 3rd Adhyāya are complete, and the 7th Pāda is incomplete.

## No. 4505. शास्त्रदीपिकाव्याख्या—मयूखमालिका.

## ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHAMĀLIKĀ.

**Substance**, palm-leaf. Size, 17 × $1\frac{3}{8}$ inches. Pages, 398. Lines, 11 on a page. Character, Grantha. Condition, injured. Appearance, old.

Many leaves are missing.

Adhyāyas 4 to 6 complete.

Same work as the above.

## No. 4506. शास्त्रदीपिकाव्याख्या—मयूखमालिका.

## ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHAMĀLIKĀ.

Substance, palm-leaf. Size, $17\frac{3}{8}$ × $1\frac{3}{8}$ inches. Pages, 210. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

The first three Pādas in the 4th Adhyāya complete.

Same work as the above.

## No. 4507. शास्त्रदीपिकाव्याख्या—मयूखमालिका.

## ŚĀSTRADĪPIKĀVYĀKHYĀ: MAYŪKHAMĀLIKĀ.

Substance, palm-leaf. Size, $17\frac{3}{8}$ × $1\frac{3}{8}$ inches. Pages, 248. Lines, 7 on a page. Character, Grantha. Condition, very much injured. Appearance, old.

The 2nd and 3rd Pādas of the 1st Adhyāya complete; the 4th Pāda incomplete.

Same work as the above.

No. **4508**. शास्त्रदीपिकाव्याख्या—मयूखमालिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHAMĀLIKĀ.

Substance, palm-leaf. Size, $19\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 251. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is **Prāyaścitta-viṣaya** 127*a*.

Contains the 3rd Adhyāya.

Same work as the above.

No. **4509.** शास्त्रदीपिकाव्याख्या—मयूखमालिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHAMĀLIKĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 178. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins in the 2nd Pāda of the 1st Adhyāya and breaks off in the 3rd Pāda of the 2nd Adhyāya.

Same work as the above.

---

No. **4510.** शास्त्रदीपिकाव्याख्या—मयूखावळी.

ŚĀSTRADĪPIKĀVYĀKHYĀ : MAYŪKHĀVALĪ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 270. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, not old.

The 1st Adhyāya complete.

A commentary on the Śāstradīpikā : by Appayya-dīkṣita.

**Beginning :**

सुदूरस्थं देशं हयहृदयविद्येव तुरगान्
नयत्याशु ग्रन्थान्महिततरशास्त्रेषु विषमान् ।
अधीतैवार्थं या सुहृदयमनस्सम्मतिपदं
विभोर्व्याख्यामुद्रां मनसि कलये तां पशुपतेः ॥

गुरुभिरुपदिष्टभावां व्याकुर्वे शास्त्रदीपिकामनघाम् ।
आकृष्टसकलसारां लघुभिर्वाक्यैः प्रसन्नगम्भीरैः ॥

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ।

प्रथमसूत्रसङ्कीर्तनेन त्रिपाद्यां करिष्यमाणस्यार्थवादादिप्रामाण्यविचारस्य शास्त्रसङ्गतिं दर्शयति—अथात इति ।

अथ वेदाध्ययनानन्तरम् । अतः अध्ययनस्य वृत्तत्वात् । धर्मस्यालौकिकश्रेयस्साधनस्य जिज्ञासा विचारः । कर्तव्य इति शाब्द्या सौत्रप्रतिज्ञया धर्मे यत्प्रमाणं तस्य यत् स्वरूपं साधनं फलं च, ये च तत्प्रमाणाद्याभासा बुद्धाद्यागमतच्चोदितचैत्यवन्दनादिस्वरूपतत्साधनतत्फलात्मकास्तत्तदाधिकरणपूर्वपक्ष्युत्प्रेक्षितार्थावच्छिन्नतत्तद्विषयवाक्यसमार्पितस्वरूपसाधनफलात्मकाश्च, तेषामप्यर्थाद्विचारः प्रतिज्ञातो भवति ; प्रमाणमुखेनैव धर्मस्य निर्णेयत्वात् । स्वरूपसाधनफलनिर्णयमन्तरेण अनुष्ठानद्वाराभ्युदयपर्यवसानासम्भवात् । आभासनिरूपणं विना तत्प्रहाणायोगाच्चेति भावः ।

**End :**

श्रुतिर्विध्यर्थवादमन्त्रनामधेयभेदेन चतुर्विधा । प्रथमपादे विधिः, द्वितीये मन्त्रार्थवादौ, चतुर्थे नामधेयं, तृतीये स्मृत्याचारौ इत्येवं कृत्स्नेन प्रथमाध्यायेन धर्मप्रमाणचिन्ता वृत्ता । इतः परं द्वितीये धर्मभेदस्य, तृतीये विनियोगस्य, चतुर्थे प्रयोगस्य, पञ्चमे क्रमस्य, षष्ठे फलस्य, सप्तमादिष्वतिदेशोहबाधतन्त्रप्रसङ्गानां चिन्ता वर्तिष्यत इत्यर्थः ।

विध्यर्थवादादीनां केषां चित् क्रतुभेदेनानुक्रमणं क्रमातिदेशादीनां केषां चिदादिशब्देन ग्रहणं च वसन्ततिलकावृत्तानुरोधात् ॥

**Colophon :**

इति शास्त्रदीपिकामयूखावळ्यां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

## No. 4511. सङ्कर्षभाट्टदीपिका.

## SAṄKARṢABHĀṬṬADĪPIKĀ.

Pages, 98. Lines, 10 on a page. Character, Telugu and Grantha.

Begins on fol. 193 of the MS. described under No. 4425.

A commentary on chapters 13 to 16 of the Mīmāṁsāsūtras, making up what is called the Saṅkarṣa-kāṇḍa or Dēvatā-kāṇḍa : by Bhāskarāgnicit.

Complete.

**Beginning:**

एवं द्वादशभिरध्यायैः प्रकृतिविकृतिभेदेन कतिपयान् न्यायान् संशोध्य तैरेव न्यायैः इतस्ततो विप्रकीर्णवेदवाक्यार्थनैदंपर्येण[न] सम्यङ्नि(ष्कृष्य नि)र्णेतुमेषा चतुष्टय्यारभ्यते । अत एव सङ्कर्षे न प्रत्यधिकरणं सङ्गत्यपेक्षा ।

अनुपयजतीति । ज्योतिष्टोमे सोमस्याग्ने वीहि इत्यनुयजतीति श्रुते वाक्ये सोमयागोद्देशेन मन्त्रविधिः.

**End:**

सूत्रे वाक्यावृत्तिः शास्त्रपरिसमाप्तिद्योतनार्था । तदेवं षोडशभिरध्यायैः षट्सप्तत्या पादैर्भगवता जैमिनिना निरूपितौ धर्माधर्मौ तदुक्तयैव दिशा विविच्य गुरुकुलादवगत्य स्नात्वा यथाश्रमं यथाशास्त्रं धर्माननुष्ठाय भगवत्यार्पितवतां क्रमेण चित्तशुद्धिविविदिषात्मज्ञानोदयैर्नित्यसुखाभिव्यक्तिरूपो मोक्षः फलति ।

एतदुत्तरापि व्यासपादप्रणीता चतुर्लक्षणी शारीरकमीमांसात्मज्ञानोपयोगिन्यपि अनुबन्धभेदादिभिर्भिन्नमेव शास्त्रमिति द्योतनाय वाक्यावृत्तिर्वाकारेण याज्यादिपदेन च मङ्गलं ध्वनितमिति सर्वं शिवम् ॥

जैमिनेर्विमलसूक्तितटिन्यां मग्नमाप शुचितां मम चेतः ।
तेन खेलतु पिनाकिपदाब्जे येन जन्मनिवहो न पुनस्स्यात् ॥

खण्डदेवकृतभाट्टदीपिका लक्षणैः कतिपयैरसंभृता ।
इत्युदीक्ष्य बुधभास्करोऽग्निचित् भारती बरिभरांबभूव ताम् ॥
(अद्यावधि कृतिरेषाद्यन्तविहीनेति दीपिकाख्यासीत् ।
षोडशकलाभिरधुना परिपूर्णा भाट्टचन्द्रिकात्वमगात् ॥)
आसीत् षोडशलक्षणी श्रुतिपदा या धर्ममीमांसिका
सङ्कर्षाख्यचतुर्थभागविधुरा कालेन साजायत ।
गायत्री त्रिपदात्मिकेव विबुधैरद्यापि पापठ्यते
तां पूर्णामतनोच्चक्रमेण महता गम्भीरजो भास्करः ॥

**Colophon:**

इति श्रीसङ्कर्षे भाट्टदीपिकायां षोडशाध्यायस्य चतुर्थः पादः ॥
षोडशोऽध्यायः ग्रन्थश्च समाप्तः ॥

---

No. **4512.** सेश्वरमीमांसा.

SĒŚVARAMĪMĀṀSĀ.

Substance, paper. Size, $12\frac{5}{8} \times 8\frac{1}{8}$ inches. Pages, 73. Lines, 37 on a page. Character, Telugu. Condition, good. Appearance, new.

On the relationship existing between the Pūrva-mīmāṁsā and the Uttara-mīmāṁsā : by Vēdānta-dēśika.

**Beginning:**

ईतमनवमर्थं यः
सफलयति वदान्यः स्वप्रसादेन देवः ।
निखिलनिगमवेद्ये सिध्यतु श्रीसखेऽस्मिन्
भगवति निरवद्ये भक्तिरात्यन्तिकी नः ॥
स जयति जैमिनिरादौ जयति पुनः काशकृत्स्नोऽपि ।
नारायणावतारो जयति परं बादरायणः श्रीमान् ॥

निर्मत्सरा निशमयन्त्विदमादरेण कर्माधिकारनयसूत्रगतिं समीचीम्।
शारीरकेण घटयत्ययमस्मदुक्त्या देवस्तुरङ्गवदनो जगदन्तरात्मा॥

अथातो धर्मजिज्ञासेत्यारभ्य अनावृत्तिश्शब्दादनावृत्तिश्शब्दादित्येवमन्तं विंशतिलक्षणं मीमांसाख्यमेकं शास्त्रम्। सा हि मीमांसा पदवाक्यार्थविचारात्मिका तद्विशेषनिर्णयार्था साङ्गाध्ययनसङ्गृहीतस्वाध्यायशब्दवाच्यवेदाख्याक्षरराश्यापातप्रतीतिविषयसप्रयोजकार्थविशेषविविदिषाप्रेरितपुरुषाधिकर्तव्याशेषव्यापारगोचरन्यायसङ्घातनिबन्धनात्मिकायाः त्रिकाण्ड्यास्सामान्यतो विषयप्रयोजनप्रवृत्तिप्रकारविशेषविशेषिताधिकार्यैक्यादेशविद्यासाधनत्वमिति नातिप्रसङ्गः.

* * * *

कर्मणि विचिचारयिषा दुर्वारा। तावन्मात्रात्तदसिद्धिनिश्चये तु निष्प्रत्यूहः शारीरकारम्भ इति विंशतिलक्षण्यां वक्ष्यमाणं कृत्स्नवेदार्थविचारं सहेतुकं प्रतिजानाति—अथातो धर्मजिज्ञासा। अथशब्दोऽत्रानन्तर्यार्थ एव; प्रसिद्धिप्रकर्षस्यान(नु)पपादत्वात्। मङ्गलत्वन्तु अथधर्मशब्दयोध्न(र)न्यार्य(र्थ)त्वेऽपि प्रती(दी)पादिवत्स्यात्.

* * * *

**Colophon:**

इति कवितार्किकसिंहस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सेश्वरमीमांसाख्ये धर्ममीमांसाभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ॥

परापरसमाख्यातदेवतावैभवेषु च।
समर्थयिष्यमाणेषु सफलेयमिति क्रिया॥
यद्वृत्तप्रमुखैर्येषां विधिशक्तिर्न हन्यते।
तेषां विधिपरत्वञ्च मन्त्राणामिह सिध्यति॥
पुमर्थशासने विभोः प्रशासनानुवर्तिनि।
प्ररोचनप्रकाशनप्रतारयेपिर्ह(कार एवमाहि)तः॥

**Colophon:**

इति कवितार्किकसिंहस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतौ सेश्वरमीमांसाख्ये धर्ममीमांसाभाष्ये प्रथमस्य द्वितीयः पादः ॥

**End:**

यद्यपि स्मार्तमात्रविषयैकशाखा नास्ति; तथाहि(पि) बह्वीषु शाखासूच्छिन्नासु इतस्तत एते पदार्थास्संभवन्ती(ति) ज्ञापनाय च निबन्धस्सप्रयोजनः। न च शाखास्सर्वत्र सर्वदा नोच्छिद्येरन्निति वक्तुं शक्यम्; सहस्रैकशतादिभेदानामिदानीमनुपलम्भात्; (अत ए)व स्मरन्ति च तेषामुत्प(त्स)न्नाः पाठाः प्रयोगादनुमीयन्त इति चेत् तत् किमे(मि)व युद्धे पाण्डवा(ना)म शैवाद्यैर्वेदमार्गाणां निर्भेदमन्ततोवकत्वं च सस्मरुः?

# 5. VĒDĀNTA.

## A.—ADVAITA PHILOSOPHY.

### No. 4513. अज्ञानध्वान्तचण्डभास्करः.

### AJÑĀNADHVĀNTACAṆḌABHĀSKARAḤ.

Substance, paper. Size, $8\frac{3}{8} \times 6\frac{1}{2}$ inches. Pages, 144. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1 and 63*a*. Two copies; the first complete, the second copy which is incomplete begins on fol. 63*a*.

An elementary treatise on Advaita-Vēdānta by Amarēśvaraśāstrin of the Kaṁbhaṁpāṭi family and pupil of Dakṣiṇāmūrtīśvara. The name of the work means that it is a powerful sun in relation to the darkness of ignorance. The transcription of this manuscript was completed on Sunday the bright half of the month Puṣya in the year Vyaya.

The subjects treated of in this treatise are given below :—

१. अनुबन्धविचारः.
२. जीवेश्वरविचारः.
३. जीवेश्वरस्वरूपविचारः.
४. सृष्टिविचारः.
५. पञ्चकोशविचारः.
६. भावनाभेदविचारः.
७. ज्ञानस्वरूपविचारः.
८. वासनाक्षयविचारः.
९. जीवन्मुक्तिस्वरूपविचारः.
१०. मोक्षविचारः.

**Beginning:**

यत्तत्त्वं निखिलस्य यत्र निवसत्येतत्समस्तं जगत्
यत्सत्त्वान्वयतोऽस्य सत्त्वमिह यद्भासाखिलस्यास्य धीः ।
यत्साक्षात्कृतिरात्मतत्त्वविषयाज्ञानापहारक्षमा
तत्तेजो हृदि धारयेऽहमभयं श्रीदक्षिणास्याभिधम् ॥

देवस्तत्त्वमसीति बोधयतु मां मुद्रावता पाणिने-
त्येवं प्राञ्जलिना मया सविनयं स्वप्नेऽर्थितस्येशितुः ।

यस्य श्रीकरुणाकटाक्षविभवप्राप्तात्मविद्या(द्यो ऽ)स्म्यहं
तं वन्दे मुनिवन्दनीयचरणं श्रीदक्षिणास्यं गुरुम् ॥

यद्वक्त्राम्बुजनिस्सृतं परमकं श्रीसूत्रभाष्यामृतं
पीत्वा मादृशजीवभङ्गनिचया नन्दन्ति मोक्षाङ्गणे ।

नानावादिमदेभभञ्जनमहाव्यग्रोग्रकण्ठीरवान्
वन्दे व्यासमुनीन्द्रशङ्करमुखान् सद्देशिकांस्तानहम् ॥

अद्वितीयापरिच्छिन्नसच्चिदानन्दमूर्तये ।
दक्षिणामूर्तिरूपाय मह्यमेव नमो नमः ॥

श्रीदक्षिणामूर्तिकटाक्षवीक्षणप्रध्वस्ततत्त्वावरणेन धीमता ।
अज्ञानविध्वान्तसुचण्डभास्करः प्रकाश्यते मोहतमोनिवृत्तये ॥

करालमायाभिधरात्रिशायिभिः कर्मातिदुश्शीतविकम्पितात्मभिः ।
अज्ञानविध्वान्तसुचण्डभास्करो मयोदितो विप्रवरैर्विलोक्यताम् ॥

इह जन्मनि जन्मानि(न्त)रे वा सम्यगनुष्ठितवेदोक्तनिष्कामकर्मोपासनाराधिताराध्यपादश्रीदक्षिणामूर्तीश्वरपरमानुग्रहपरिशुद्धहृदया दुश्चरितनित्यनिवृत्ता . . . . . . . . . . . . . .

जीवन्मुक्तान् पुरुषधौरेयान् ब्राह्मणानवलोक्य अज्ञानदुःखनिवृत्तिपूर्वकानन्दाविर्भावरूपं मोक्षं कामयमाना ब्राह्मणाः संसारदुःखसमुद्रं समुत्तीर्य मोक्षानन्दरूपं परं पारमासाद्य सुखिनो भवन्त्विति मनीषया स्वानुभवावष्टम्भेनाज्ञानध्वान्तचण्डभास्करसंज्ञं वेदान्तप्रकरणमारभमाणाः प्रथममनुबन्धचतुष्टयं विचारयामः—

तत्र तावत् बन्धनिवृत्तेरेव मुक्तिपदार्थत्वात् निवृत्तेश्च प्राप्तिपूर्वकत्वात् आदावात्मनो बन्धप्राप्तिर्विचार्यते ॥

**End:**

सम्यग्विचारयसि चेदेतद्विचारपरिपाकपरिप्राप्तसम्यक्प्रज्ञानौकासमारूढः तमःकूर्मं रजोमीनं क्रोधनक्रं कामशैवालं जन्ममरणतरङ्गं राग बुद्बुदं लोभफेनं मोहवेलं दुःखागाधजलप्रवाहगम्भीरमिमं मूलाज्ञानसंसारापारमहादुःखसमुद्रं समुत्तीर्य मोक्षसाम्राज्यानन्दरूपपरं पारमवाप्स्यसि ।

एतावानुपदेशः स्याद्वेदे श्रेयोऽर्थिनां नृणाम् ।
कृतकृत्यो भवेत्क्षिप्रमेतज्ज्ञात्वानुशासनम् ॥
ज्ञातमेव विजानाति विमुक्तत्वे विमुच्यते ।
निवर्तते निवृत्तन्तु(स्तु) त्विवश्शपथयाम्यहम् ॥

* * * *

करालमायाभिधरात्रिशायिभिः कर्माभिदुश्शीतविकम्पितात्मभिः ।
अज्ञानविध्वान्तसुचण्डभास्करो मयोदितो विप्रवरैर्विलोक्यताम् ॥

**Colophon:**

इति श्रीसर्वदेवतासार्वभौममोक्षसाम्राज्याधीश्वरश्रीदक्षिणामूर्तीश्वरचरणप्रणिधानप्रभावपरिलब्धपरमभाग्यसत्फलभूताद्वैतब्रह्मविद्यामहाधनेन कम्भम्पाटिकुलजलधिपूर्णसुधाकरेणामरेश्वरशास्त्रिणा स्वानुभवानुरोधेन विरचितं विचारदशकरूपमज्ञानध्वान्तचण्डभास्कराख्यं वेदान्तप्रकरणं समाप्तम् ॥

---

## No. 4514. अद्वैतदीपिका.

## ADVAITADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 263. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

This is a treatise on Advaita-Vēdānta; by Nṛsiṁhāśrama, a pupil of Jagannāthāśrama. He says, in the introduction, that he undertook to write this work at the command of Gīrvāṇēndrasarasvatī.

The first two Paricchēdas complete; the third Paricchēda incomplete.

**Beginning:**

यस्मादभूदभवनानुभवात्सुखाब्धे-
र्विश्वं मरीचिमरुवारिरसं(समं) मुरारेः ।
तस्यालयो निखिललोकसुमङ्गळानां
पुण्यं वपुः प्रकटमस्तु ममार्धसिंहम् ॥

यस्याज्ञावशवर्तिनोऽनुदिवसं ब्रह्मादिलोकाधिपा
यस्यानन्दशतांशभागिन इमे शक्रादयो निर्वृताः ।
तं सत्यानवधिप्रबोधवपुषं भूमानमाशास्महे
स्व(ा)न्ते श्रीनरसिंहमग्रहवतां दूरं सतामन्तिकम् ॥

यत्पादरेणुकलिलं सलिलं निपीय
मूकोऽपि मूकयति पण्डितमण्डलानि ।
तद्भागधेयममितस्वपदप्रबोधं
न(नि)र्धूतमोहविभवं गुरुमानतोऽस्मि ॥

कल्याणगुणसम्पूर्णं निर्वाणविभवालयम् ।
गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं भजे ॥

श्रीमद्गुरुपदद्वन्द्वध्यानानिर्धूतकल्मषः ।
कुर्वे तदाज्ञयाद्वैतदीपिकां भेदभेदिनीम् ॥
तत्र

श्रेयान् स्वधर्मो विगुणोऽपि यस्मादित्यब्रवीत्पार्थसुहृत्सुरेशः ।
तस्मादहं साक्षिविवेकमादौ गुरुप्रसादात्प्रकटीकरोमि ॥

अथाधीतसाङ्गस्वाध्यायस्य साधनचतुष्टयसम्पन्नस्यापातप्रतिपन्नब्रह्मात्मैक्यजिज्ञासोः तत्प्रतिपादकानि बहूनि वाक्यानि दृश्यन्ते—तत्त्वमस्यहं ब्रह्मास्मीत्येवमादीनि। तत्र त्वम्पदार्थं देहेन्द्रियमनोबुद्धिप्राणव्यतिरिक्तं मन्यमानास्तद्विलक्षणब्रह्मात्मैकत्वमसम्भा(व)यन्तस्तार्किकादयो वाक्यमविवक्षितार्थमन्यपरं वा मन्यन्ते ।

**End:**

चिन्मात्रविषयाधारमज्ञानं भेदविभ्रमे ।
हेतुर्दर्पणवत्तस्य निवृत्तौ कृतकृत्यता ॥

यन्माययापृथग्भूतसदानन्दैकविग्रहः ।
हरिरप्यहमीशानं तं भजे पुरुषोत्तमम् ॥

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE
MADRAS-4



**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवज्जगन्नाथाश्रमश्रीचरणशिष्यश्रीनृसिंहाश्रमकृता(या)मद्वैतदीपिकायां विभागप्रक्रियाख्यो द्वितीयः परिच्छेदः ॥

उपनिषदवबोधं बोधमानन्दकन्दं निजगुणगणकान्तं कान्तमम्भोजयोनेः ।
परिहृतपरसत्त्वं सत्त्वमेतस्य मूलं नरहरिवपुरैशं धाम कामं प्रपद्ये ॥

* * * *

औपनिषदत्वविशेषणकीर्तनञ्च ब्रह्मणो न स्वरूपाख्यानपरम्; किन्तु मानान्तरगोचरत्वव्यावृत्तिपरम् । त(था)हि न तावत्प्रत्यक्षं प्रमाणम्; रूपस्पर्शहीनतया बाह्यप्रत्यक्षागोचरत्वात् । मनसः केवलस्य भोक्तृतद्धर्ममात्रग्राहकत्वात् ब्रह्मापि भोक्तृभिन्नमिति चेन्न; सर्वज्ञसर्वात्मकब्रह्मणः तद्विपरीतभोक्तृतावन्मात्रत्वानुपपत्तेः । नन्वहमनुभवे.

## No. 4515. अद्वैतदीपिका.

### ADVAITADĪPIKĀ.

Substance, palm-leaf. Size, $18\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 116. Lines, on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Advaitadīpikāvivaraṇa 59*a*.

First Paricchēda complete.

Same work as the above.

---

## No. 4516. अद्वैतदीपिका.

### ADVAITADĪPIKĀ.

Pages, 130. Lines, 27 on a page.

Begins on fol. 1*a* of the MS. described under No. 4365.

Second Paricchēda complete.

Same work as the above.

## No. 4517. अद्वैतदीपिका.

## ADVAITADĪPIKĀ.

Substance, palm-leaf. Size, 13⅝ × 1⅜ inches. Pages, 211. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

The first Paricchēda complete, and the second incomplete.

Same work as the above.

---

## No. 4518. अद्वैतदीपिका.

## ADVAITADĪPIKĀ.

Pages, 70. Lines, 10 on a page.

Begins on fol. 59*a* of the MS. described under No. 4118.

Same work as the above.

Incomplete.

---

## No. 4519. अद्वैतदीपिकाविवरणम्.

## ADVAITADĪPIKĀVIVARAṆAM.

Pages, 250. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 4515.

The first Paricchēda complete, and the second incomplete.

A commentary on the Advaitadīpikā of Nṛsiṁhāśrama: by his pupil Nārāyaṇāśrama.

**Beginning:**

यज्जिज्ञासा यज्ञदानादिभिस्स्यात् श्रुत्या मत्या चिन्तया यत्प्रबोधः ।
यस्मिन् बुद्धे बाध्यतेऽनर्थमूलं तं भूमानं भावये स्वस्वरूपम् ॥

चेतश्चापलमिन्द्रियार्थविषयं त्यक्त्वा भजस्वा[भजन् वा]भयं
संसारार्णवतारकं नरहरेः पादाब्जरेणुप्लवम् ।
यो ध्यातो दितिजेन्द्रबालकमधास्सिन्धोर्गतं पर्वतै-
राक्रान्तं सितमुग्रभोगिभिरनायासेन पारेऽकरोत् ॥
यत्पादसेवा वितनोति पापं पुण्यं रिपुं मित्रमनेकमेकम् ।

अणुं महान्तं तमचिन्त्यवृत्तं श्रीनारसिंहं गुरुमानतोऽस्मि ॥
अबोधवार्तापि न यद्विनेयेष्वथाप्यबुद्धं जगदेव येन ।
शुद्धस्वरूपामलबोधरूपं प्रबोधपूर्णाख्यगुरुं नुमस्तम् ॥
गणेशानं(न) नमामि त्वां गुणान् फणितुमक्षमः ।
यत्ते प्रसादाद्वागीशशर्वाद्यास्सफलक्रियाः ॥

मातर्नमामि तव चारुपदारविन्दं तीर्थप्रभेदपरिलब्धनिजानुभावम् ।
गीर्वाणदारकवरभ्रमरीकुलाढ्यं विद्यामयामलमनोज्ञपरागपात्रम् ॥

अद्वैतदीपमनवद्यपरात्मबोधभासा भवप्रमुखमूलतमःप्रमोषम् ।
सम्प्राप्य दुर्लभदृशोऽपि हि मामकीनाः श्रेयो भजन्त्विति समूह्य कृतिं करोमि ॥

प्रारिप्सितस्य प्रकरणस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च प्रकरणप्रतिपाद्यस्याद्वितीयस्यात्मतत्त्वस्य चैतन्यस्याविर्भावप्रार्थनालक्षणं मङ्गलं कुर्वन् अर्थात् प्रकरणस्याधिकारिविषयप्रयोजनानि निर्दिशति—यस्मादिति । अर्धसिंहं(तस्य)वपुः स्वरूपं मम प्रकटमस्त्विति सम्बन्धः । मायोपाधिकं बिम्बप्रतिबिम्बभावात्मकम् अखण्डचैतन्यं बिम्बभावेनेश्वररूपं तदिदमुक्तमर्धसिंहमिति ; अर्धेन बिम्बरूपेण सिंहमीश्वराकारमित्यर्थः । अर्धाच्चार्धेन प्रतिबिम्बरूपेण नृशब्दवाच्यं जीवरूपमिति सिध्यति । तथाच श्रुतिः—

एष एव नृ एष एव हि सर्वत्र सर्वदा सर्वात्मा सिंहोऽसौ हि सर्वत्र सर्वदा सर्वात्मा सन् सर्वमत्ति नृसिंह एवैकलय इति ।

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमन्नृसिंहाश्रमपूज्यपादशिष्यश्रीनारायणाश्रमविरचिते अद्वैतदीपिकाविवरणे प्रथमः परिच्छेदः ॥

**End :**

यन्मते वस्तुत एवोपाधौ प्रतिबिम्बमस्ति, तन्मत एव . . . .
दोषः स्यादित्यत आह--तव मत इति ।

दर्पणच्छायादौ गन्धादेरभावात् तदनुपलम्भ इत्याशङ्क्य यद्गतं रूपं यत्र स्वसमानजातीयरूपान्तरारम्भकं, तद्गतगन्धस्यापि तत्सजातीय-गन्धान्तरारम्भकत्वनियमात्तत्र गन्धाधिकमावश्यकामित्या.

## No. 4520. अद्वैतदीपिकाविवरणम्.
## ADVAITADĪPIKĀVIVARAṆAM.

Substance, palm-leaf. Size, 13¾ × 1 inches. Pages, 348. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

## No. 4521. अद्वैतमकरन्दः.
## ADVAITAMAKARANDAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 118*a* of the MS. described under No. 23.

Complete in 30 stanzas.

A short treatise in support of the Advaita school of Vēdānta ; by Lakṣmīdhara.

**Beginning :**

कटाक्षकिरणाचान्तनमन्मोहाब्धये नमः ।
अनन्तानन्दकृष्णाय जगन्मङ्गळमूर्तये ॥
अहमस्मि सदा भामि कदाचिन्नाहमप्रियः ।
ब्रह्मैवाहमतस्सिद्ध(ः) सच्चिदानन्दलक्षणम्(ः) ॥
मय्येवोदेति चिद्व्योम्नि जगद्गन्धर्वपत्तनम् ।
अतोऽहं न कथं ब्रह्म सर्वज्ञं सर्वकारणम् ॥

**End:**

खं खवद्व्यापकं खादिनिदानं खादिसाक्षिणम् ।
प्रत्यक्चैतन्यमानन्दमद्वन्द्वं तम(द)हं महः ॥
लक्ष्मीधरकवेस्सूक्तिशरदम्भोजसम्भृतः ।
अद्वैतमकरन्दोऽयं विद्वद्भृङ्गैर्निपीयताम् ॥

**Colophon:**

अद्वैतमकरन्दस्समाप्तः ॥

---

No. **4522.** अद्वैतमकरन्दः—रसाभिव्यञ्जिकासहितः.

ADVAITAMAKARANDAḤ: WITH RASĀBHI-VYAÑJIKĀ.

Substance, palm-leaf (Śrītāla). Size, $8\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, **102**. Lines, 6 on a page. Character, Malayālam. Condition, **fair**. Appearance, new.

Same as the above: but the MS. contains, in addition, the commentary Rasābhivyañjikā by Svayaṁprakāśayati, pupil of Kaivalyānandayōgīndra.

Complete.

**Beginning:**

सेव्याय सर्वजगतामुपरिस्थिताय सेवानुरूपफलदाय सुखप्रदाय ।
सेवापरप्रणयविह्वलमानसाय ज्ञानप्रदाय गुरवे शिरसा नमामि ॥
नित्यं निरन्तरानन्दचिद्घनं ब्रह्म निर्मलम् ।
श्रुत्या तर्कानुभूतिभ्यामहमस्म्यद्वयं सदा ॥
अम्बागृहीतवामार्धं वन्दे चन्द्रकलाधरम् ।
लावण्यमधुराकारं कारुण्यरसवारिधिम् ॥
कैवल्यानन्दसन्दोह(योगीन्द्र)पादपद्मरजोरविः ।
राजते मे हृदाकाशे तमे(मो)ध्वान्तनिवर्तकः ॥
शुद्धानन्दपदाम्भोजमकरन्दनिषेवणात् ।
निर्वाणरसमास्वाद्य हृष्टाश्शिष्याळिपङ्क्तयः ॥

सच्चिदानन्दयोगीन्द्रा जायन्ते भुवि केचन ।
यत्कृपाबलतस्तीर्णो मया संसारवारिधिः ॥

इह खलु लक्ष्मीधरो नाम कश्चित्कवीन्द्रो निरन्तरनित्याद्यनुष्ठानशुद्धस्वान्ततया सञ्जातविवेकवैराग्यशमादिमुमुक्ष(।)वतः आत्मविविदिषया सन्त्यक्तलोकवेदधर्मवतः गुरुवरचरणोपसर्पणपुरस्सरं विधिवत् सम्यक् श्रुतवेदान्ततत्त्वे असम्भावनया प्रतिबन्ध(द्ध)ज्ञानतया अपरितुष्यतः क(कां)श्चित्पुरुषधौरेयानुपलभ्य सञ्जातकरुणस्तेषां करतलबिल्वफलवत्स्फुटं वेदान्तप्रतिपाद्यं ब्रह्म सच्चिदानन्दलक्षणं सर्वज्ञं सर्वोपादानं नित्यं सर्वगमद्वयं देहेन्द्रियप्राणमनोबुद्ध्यहङ्कारसाक्षिप्रत्यगभिन्नतया तर्कैस्सम्भावयितुं किञ्चित्प्रकरणमद्वैतमकरन्दाख्यमारभमाणश्चिकीर्षितस्य(।)विघ्नपरिसमाप्तये स्वेष्टदेवतानमस्काररूपं मङ्गळं स्वयमनुष्ठाय शिष्यशिक्षायै ग्रन्थतो निबध्नाति—कटाक्षेति ।

*    *    *    *

मङ्गलनिबर्हितसकलान्तरायः प्रथमं तत्त्वमस्यादिवाक्यैः तात्पर्ययुक्तैर्बोधितं प्रत्यगात्मनो ब्रह्मत्वं युक्त्या सम्भावयन्नाह—

अहमस्मि . . , . . . . . . . लक्षणः ।

अहम् अहङ्कारादिसाक्षी सद्रूपो भवामि आत्मन्यध्यस्ताहङ्कारादेस्सत्ताप्रदत्वात् सदा अवस्थात्रयेऽपि भवामि । जाग्रदि(ति)देहेन्द्रियादिसाक्षितया, स्वप्नेऽन्तःकरणादिवासनाप्रपञ्चसाक्षितया, सुषुप्तावज्ञानसाक्षितया च प्रकाशे ।

**End :**

यद्यप्यत्र प्रतिश्लोकं बहु वक्तव्यमस्ति, तथापि मन्दबुद्धीनामलसानां व्युत्पादना(य)प्रवृत्तेन मया ग्रन्थकाठिन्यगौरवभयादुपरतमिति ॥

अद्वैतमकरन्दस्य रसाभिव्याञ्जिका कृता ।
स्वयम्प्रकाशयतिना पुरुषोत्तमशासनात् ॥
आत्मानन्दरसास्वादमिच्छद्भिर्विबुधोत्तमैः ।
रसाभिव्यञ्जिका ह्येषा परिशील्या सदादरात् ॥

तापत्रयार्कसन्तप्ता मोक्षकामा मुदा सह ।
रसाभिव्यञ्जिकागङ्गामग्ना भवत सत्तमाः ॥
श्रीकैवल्यानन्दयोगीन्द्रपादपद्मद्वन्द्वे निस्रवन्मोक्षसारे ।
शुद्धैर्हंसैस्सेविते सुप्रसन्ने मच्चेतोऽद्धा भृङ्गलीलां विधत्ताम् ॥
चिदम्भो[नि]धिनिर्मिमग्नचित्तं गुणानां सतामालयं शुद्धसत्त्वप्रधानम् ।
नृणां बोधयन्तं परब्रह्मतत्त्वं शिवानन्दयोगीन्द्रमीडे सदाहम् ॥

**Colophon** :

इति श्रीमत्परमहंसपरिव्राजकाचार्यकैवल्यानन्दयोगीन्द्रपादकमलभृ-ङ्गायमान(ण)स्वयम्प्रकाशयतिना विरचिता रसाभिव्याञ्जिकाख्या समाप्तेय-मद्वैतमकरन्द(व्य)ाख्या ॥

---

## No. 4523. अद्वैतमकरन्दः—रसाभिव्यञ्जिकासहितः

### ADVAITAMAKARANDAḤ: WITH RASĀBHIVYAÑJIKĀ.

Substance, palm-leaf. Size, 15 × 1⅜ inches. Pages, 53. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Aṣṭāvakragītā (with commentary) fol. 29*a*.

Complete.

Some stray witty sayings are found noted on the last one or two pages.

Same work as the above.

---

## No. 4524. अद्वैतरत्नम (अभेदरत्नम्.)

### ADVAITARATNAM (ABHĒDARATNAM).

Substance, palm-leaf. Size, 13 × ⅜ to 1¼ inches Pages, 208. Lines, 4 to 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tattvavivēka fol. 92*a*.

A treatise on Advaita-Vēdanta criticising unfavourably the views of the Dvaita school; by Mallanārādhya of Kōṭīśavaṁśa.

**Beginning:**

विघ्नान्धकारहरणस्फुरणैकरूपं मिथ्याप्रपञ्चमनिरुक्त्युचितं विभेदम् ।
वन्देऽखिलप्रकृतिमव्ययमुक्तिरूपं विघ्नेश्वरं सकलविघ्ननिवृत्तयेऽहम ॥

कोटीश्वरं कोटिगुणैस्समेतं कोटीशवंशाख्यतरोश्च कन्दम् ।
कोट्यन्तरासङ्गमकोटिरूपं नमामि मद्वंशधुरीणमाद्यम् ॥

यदुपासनया वेदशिरोव्याख्यानवैखरी ।
आचार्यशङ्करादीनां तामुपासे सरस्वतीम ॥
श्रीविरूपाक्षमाराध्य पितन् विद्यागुरूनहम् ।
करोम्यभेदरत्नस्य रक्षां कुद्वैतिचोरतः ॥
अभेदस्य परित्राणे रत्नस्याचार्यशङ्कराः ।
यामिकास्तेन तन्मार्गोद्युक्तं हस्तेन वारणम् ॥
सम्प्रदायाज्ञतायातकुयुक्तिव्रातवारणम् ।
सम्प्रदायाध्वना कुर्वे किञ्चिद्बुद्ध्यनुसारतः ॥
आवाप्तविद्यावैमल्यहेतुर्विद्वत्परिश्रमः ।
अर्थाविस्मरणार्थोऽयं न व्यर्थो मत्परिश्रमः ॥

ननु न परमात्मा स्फुरणैकरूपः शास्त्रवेद्यत्वात् स्वप्रकाशत्वे मानाभावाच्च । अत्र(केचित् )—

वेदान्तशास्त्रं विमतं मूलमानविवर्जनात् ।
अनारभ्यं कुतो वेद्यं काकदन्तविचारवत् ॥

न च श्रवणविधिर्वेदान्तवाक्यविचारविधायकोऽस्तु मूलमानमिति वाच्यम् ।

**End:**

भक्तिमार्गस्तु प्रागेव प्रतिरुद्धः । तदेवमस्मन्मते श्रुतियुक्त्यधिगता जीवन्मुक्तिः प्रद्वेषमात्रेणापलपितुं न शक्यत इति सिद्धम् ॥

**Colophon :**

इत्यभेदरत्ने मुक्तिपरिच्छेदः समाप्तः ॥
कोटीशवंशाख्यपयोनिधेरभूत् श्रीमल्लणाराध्यनिशीथिनीपतिः ।
विकासिताशेषविपश्चिदुत्पलो भेदान्धकारस्य विभेदनक्षमः ॥
सोऽयमद्वैतरत्नाख्यं ग्रन्थं वाङ्मयपूजनम् ।
चक्रे कोटीशमुद्दिश्य तेन तुष्यतु शङ्करः ॥
भेदसंव्ययहेतुत्वाद्व्ययसंवत्सरे कृतः ।
अभेदाव्ययहेतुत्वादव्ययस्त्वव्ययाशिषा ॥

---

No. **4525.** अद्वैतरत्नव्याख्यानम्—तत्त्वदीपनम्.

ADVAITARATNAVYĀKHYĀNAM : TATTVADĪPANAM.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 206. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

The first Paricchēda complete, the second incomplete. Fol. 56 to 120 are lost.

A commentary on the Advaitaratna ; by Nṛsiṁhāśrama.

**Beginning :**

लक्षणादिपूर्वं पर्यालोचनया अद्वितीयस्यैव ब्रह्मण इदं लक्ष(ण)मित्युपपादितम् । इदानीं तत्परिशुद्ध्यर्थमाक्षिपति नन्विति । किं ब्रह्मणा . . . . . . णम् उतोपादानत्वम् । उभयं वेति किंशब्दार्थः । भावेति । सिद्धान्तरीत्योक्तम् । न च भावविलक्षणजन्यत्वात् सकर्तृकत्वमिति वाच्यम् । लाघवेन भावकार्यस्यैव तत्प्रयोजकत्वादिति भावः । स्वेष्टेति । स्वस्य यदिष्टं तत्साधनत्वज्ञानाभावेनेत्यर्थः ।

**End :**

उपासनारूपो धात्वर्थ इति शेषः । सातिशयत्वे दूषणान्तरमाह अक्ष . . ति । तटस्थं भिन्नमभ्युपेत्याप्याह—परोक्षेति । प्रत्य-

क्षम् । अन्यस्येति शेषः । जीवस्येति कर्मणि षष्ठी । तत्र जिज्ञासासूत्रे । द्वितीयसूत्रमपि तस्मिन्ननुगुणमित्याह—तत्र लक्षणेति । तस्य ब्रह्मण्यावृत्तरूपेण जगत्कारणत्वानुपा(पप)त्तेरित्यर्थः.

## No. 4526. अद्वैतरसमञ्जरी.

## ADVAITARASAMAÑJARĪ.

Substance, palm-leaf. Size, $9\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 20. Lines, 6 on a page. Character, Grantha. Condition, not good. Appearance, old.

Begins on fol. 31*a*. The other works herein are Ātmabōdha 1*a*, Brahmasūtra 9*a*, Samāsacakra 41*a*.

Complete.

Contains the leading principles of the Advaita-school of Vēdānta in easy verse. The author calls himself Nallāsudhī.

**Beginning:**

अद्वैतमेव परमार्थतया विवेक्तुमङ्गीकृतद्विपनराकृतिसन्निवेशः ।
अद्वैतगोचरमशेषविशेषमन्तराविष्करोतु वरदो मम विघ्नराजः ॥
अध्यासविस्फुरदनेकविदात्मभेदमज्ञानमाश्रितवतस्सुलभा न मुक्तिः ।
आदर्शगेहमभितः प्रतिबिम्बितान्तर्द्वारङ्गतस्य न बहिर्गतिरर्भकस्य ॥
शान्त्यादिसाधनवता पुरुषोत्तमेन सम्प्राप्यते निजपदं वरदेशिकोक्त्या ।
चोरैररण्यसरणिं गमितेन पुंसा देशो निजो हि तदभिज्ञगिरैव गम्यः ॥

**End:**

अज्ञानमेव न कृतो जगतः प्रसङ्गो जीवेशदेशिकविकल्पकथा तु दूरे ।
एकान्तनिर्मलचिदेकरसस्वभावं ब्रह्मैव केवलमहं परिपूर्णमस्मि ॥

नल्लासुधीनिबद्धेयमद्वैतरसमञ्जरी ।
अन्तर्मुखैर्विपश्चिद्भिरादरेणानुगृह्यताम् ॥

## No. 4527. अद्वैतसिद्धिः.

## ADVAITASIDDHIḤ.

Pages, 156. Lines, 16 on a page.

Begins on fol. 1*a* of the MS. described under No. 2211.

First Paricchēda only : complete.

A well-known polemical treatise on Advaita-Vēdānta.

It criticises the views of the Dvaita school and endeavours to establish the soundness of the Advaita school.

By Madhusūdanasarasvatī, pupil of Viśvēśvarasarasvatī.

**Beginning :**

मायाकल्पितमात्रतामुखमृषाद्वैतप्रपञ्चाश्रयः
सत्यज्ञानसुखात्मकश्रुतिशिखोत्थाखण्डधीगोचरः ।
मिथ्याबन्धविधूननेन परमानन्दैकतानात्मकं
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः ॥

श्रीरामविश्वेश्वरमाधवानामैक्येन साक्षात्कृतमाधवानाम् ।
स्पर्शेन निर्धूततमोरजे(जो)भ्यः पादोत्थितेभ्योऽस्तु नमो रजोभ्यः ॥

बहुभिर्विहिता बुधैः परार्थं विजयन्तेऽमितविस्तृता निबन्धाः ।
मम तु श्रम एष नूनमात्मंभरितां भावयितुं भविष्यतीह ॥

श्रद्धाधनेन मुनिना मधुसूदनेन सङ्गृह्य शास्त्रनिचयं रचितातियत्नात् ।
बोधाय वादिविजयाय च सत्व(द्व)राणामद्वैतसिद्धिरियमस्तु मुदे बुधानाम् ॥

तत्र अद्वैतसिद्धेर्द्वैतमिथ्यात्वसिद्धिपूर्वकत्वात् द्वैतमिथ्यात्वमेव प्रथममुपपादनीयम्; उपपादनञ्च स्वपक्षसाधनपरपक्षनिराकरणाभ्यां भवतीति तदुभयं वादजल्पवितण्डानामन्यतमां कथामाश्रित्य सम्पादनीयम्; तत्र विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वान्मध्यस्थेनादौ विप्रतिपत्तिः प्रदर्शनीया । यद्यपि विप्रतिपत्तिजन्यसंशयस्य न पक्षतासम्पादकतयोपयोगः, सिसाधयिषाविरहसहकृतमानाभावरूपायास्तस्यास्संशयाघटितत्वात्; अन्यथा

श्रुत्यात्मनिश्चयवतोऽनुमित्सया तदनुमानं न स्यात् वाद्यादीनां निश्चयवत्त्वेन संशयासंभवात् आहार्यसंशयस्यातिप्रसङ्गकत्वाच्च ।

* * * *

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीचरणानां शिष्यश्रीमधुसूदनसरस्वतीविरचितायामद्वैतसिद्धौ सपरिकरप्रकरप्रपञ्चमिथ्यात्वानिरूप(णं) नाम प्रथमः परिच्छेदः ॥

See under the next number for the end.

---

## No. 4528. अद्वैतसिद्धिः.

### ADVAITASIDDHIḤ.

Substance, palm-leaf (Śrītāla). Size, 19¾ × 2¼ inches. Pages, 374. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 20*a*. The other work herein is Vēdāntaparibhāṣā 1*a*.

The first two Paricchēdas complete, the third incomplete.

Same work as the above.

For the beginning, see under the previous number.

**End:**

व्यापकत्वबोधकानेकश्रुतिविरोधेन बुद्धेर्गुणेनेत्येतदनुसारेण चास्या एवाधिकाणुत्ववत्त्वात् । पुरुषस्येति षष्ठ्या राहोः शिर इत्यादिवदुपचरितार्थत्वाच्च । तथा च न व्युत्क्रमेणान्वयः ; तस्मादणुत्वं नात्मभेदकम् ।

आत्मनोऽणुत्वभङ्गः ॥

षष्ठि(स्थि)तानि ग्रन्थेषु प्रकटमुपदिष्टानि गुरुभि-
र्गुणो वा दोषो वा न मम परवाक्यानि वदतः ।
परं त्वस्मिन्नस्ति श्रमफलमिदं यन्निजधिया
श्रुतीनां युक्तीनामकलि गुरुवाचां च विषयः ॥

**Colophon:**

इति अद्वैतसिद्धौ आत्मनिरूपणं नाम द्वितीयः परिच्छेदः ॥

* * * *

नन्वेवमपि शब्दस्यापरोक्षज्ञानजनकत्वं किं स्वाभाविकम्? उतापरोक्षविषयनिमित्तकम्? नाद्योऽतिप्रसङ्गात् । न द्वितीयः जीवाः परमात्मने(नो) न भिद्यन्ते आत्मत्वादित्यादिना जायमानानुमितेश्श्रवणात् प्रागापाततो वेदान्तजन्याया भावा(वना)प्रबन्धजन्याया अनधीतवेदान्तजन्याया ऐक्यप्रतीतेश्चापरोक्ष्यापातात् श्रवणादेरनियमात् ॥

## No. 4529. अद्वैतसिद्धिः.
## ADVAITASIDDHIḤ.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 181. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

First Paricchēda incomplete.

Same work as the above.

---

## No. 4530. अद्वैतसिद्धिः.
## ADVAITASIDDHIḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 56. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants beginning and end.

Same work as the above.

---

## No. 4531. अद्वैतसिद्धिव्याख्या—लघुचन्द्रिका.
## ADVAITASIDDHIVYĀKHYĀ: LAGHUCANDRIKĀ.

Substance, palm-leaf. Size, 19½ × 1¾ inches. Pages, 542. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

A commentary on the Advaitasiddhi of Madhusūdanasarasvatī; by Śrī Brahmānandasarasvatī, pupil of Śrī Paramānandasarasvatī.

**Beginning :**

नमो नवघनश्यामकामकामितदेहिने ।
कमलाकामसौदामकणकामुकगेहिने ॥
श्रीनारायणतीर्थानां गुरूणां चरणस्मृतिः ।
भूयान्मे साध(धि)केष्टानामनिष्टानां च बाधिका ॥
अद्वैतसिद्धिव्याख्यानं ब्रह्मानन्देन भिक्षुणा ।
साङ्क्षिप्तचन्द्रिकार्थेन क्रियते लघुचन्द्रिका ॥

विष्णुः व्यापकः जीवस्वरूपः मोक्षं प्राप्त इव स्वयं विजयते । कीदृशो विष्णुर्मोक्षं प्राप्त इवेत्यत्राह—अखण्डधीगोचर इति । संसर्गविषयकमनोवृत्तिविशेषविषयीभूत इत्यर्थः । ननु तादृशधीविषयविषयत्वे मोक्षप्राप्तिं प्रति नोद्देश्यतावच्छेदकत्वसम्भवः; उद्देश्यतावच्छेदककालावच्छिन्नत्वस्य विधेयगतत्वेन व्युत्पत्तिसिद्धस्य प्रकृते बाधात् । यथा हि तादृशधीविषयीभूत आत्मा, तदा तस्य न मोक्षः तस्याविद्यारूपबन्धशून्यत्वरूपत्वात् । तदुक्तं वार्त्तिके—

अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः इति ।

See under the next number for the end.

No. **4532.** अद्वैतसिद्धिव्याख्या—लघुचन्द्रिका.

ADVAITASIDDHIVYĀKHYĀ : LAGHUCANDRIKĀ.

Substance, palm-leaf. Size, $21\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 342. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Same work as the above.

For the beginning, see under the previous number.

**End :**

तत्त्ववादी सत्यवादी मिथ्याप्रपञ्चे तादात्म्येन सत्यप्रकारकवचनशीलः माध्वः । शीलोक्त्या निर्युक्तिकवचनं दर्शितम् । अकाण्डे अनवसरे । दूष-

णशून्ये मन्मते ग्रामसिंहस्य शुनकस्य इष्टनैष्कर्म्यब्रह्मगानामिष्टादिपदाव्यवहितोत्तराणां(सां) सिद्धीनां सिद्धीति पदानां नामनामिनोरभेदोपचारात् इष्टसिद्ध्यादिग्रन्थलाभः; हिरण्यपूर्वं कशिपुं प्रचक्षत इतिवत् ब्रह्मगानामित्यन्ते लक्षणया वा तल्लाभः ॥

महानुभावधौरेयशिवरामाख्यवर्णिनः ।
एतद्ग्रन्थस्य कर्तारो लेखकाः केवलं वयम् ॥

श्रीनारायणतीर्थानां षट्छास्त्रीपारमीयुषाम् ।
चरणौ शरणीकृत्य तीर्णस्सारस्वतार्णवः ॥

भजे श्रीपरमानन्दसरस्वत्यङ्घ्रिपङ्कजम् ।
यत्कृपादृष्टिलेशेन तीर्णस्संसारसागरः ॥

यद्यत्सम्भवदुक्तिकं परवचः सम्भूष्य तद्भू(द्दू)षितं
व्याख्यातश्च निगूढभावगहनो वाणीसुधासागरः ।
सर्वं तच्छरदिन्दुसुन्दरमुखश्रीकृष्णलीलातनौ
मालाभावमवाप्य सज्जनमनोमालां समाकर्षतु ॥

एषा यद्यपि चन्द्रिकाखिलमनोराजीवराजेररि(विः)
ध्वान्तोच्छेदकरी(सरी)सृपमुखव्याघातमुद्राकरी ।
साधूनां सरलस्वभावकरुणाकूपारसारात्मनां
चेतश्चन्द्रमणीमणीषु रमणी जात्या तथापि स्फुटम् ॥

**Colophon:**

इति श्रीपरमानन्दसरस्वतीपूज्यपादशिष्यश्रीब्रह्मानन्दसरस्वतीविरचितायामद्वैतसिद्धिटीकायामद्वैत(चन्द्रिकाख्यायां लघुचन्द्रिकायां मुक्तिपरिच्छेदो नाम तुरीयः परिच्छेदः) समाप्तः ॥

## No. 4533. अद्वैतसिद्धिव्याख्या–लघुचन्द्रिका.

### ADVAITASIDDHIVYĀKHYĀ : LAGHUCANDRIKĀ.

Substance, paper. Size, 13⅛ × 8½ inches. Pages, 290. Lines, 27 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

The first Paricchēda complete.

Same work as the above.

---

## No. 4534. अद्वैतसिद्धिव्याख्या–लघुचन्द्रिका.

### ADVAITASIDDHIVYĀKHYĀ : LAGHUCANDRIKĀ.

Substance, palm-leaf. Size, 17⅝ × 1⅛ inches. Pages, 100. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

Same work as the above.

---

## No. 4535. अद्वैतसिद्धिव्याख्या–लघुचन्द्रिका.

### ADVAITASIDDHIVYĀKHYĀ : LAGHUCANDRIKĀ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 149. Lines, 8 on a page. Character, Telugu. Condition, not good. Appearance, new.

Incomplete.

Same work as the above.

---

## No. 4536. अद्वैतसिद्धिव्याख्या–अद्वैतचन्द्रिका.

### ADVAITASIDDHIVYĀKHYĀ : ADVAITACANDRIKĀ.

Pages, 65. Lines, 12 on a page.

Begins on fol. 52*a* of the MS. described under No. 4351.

Fourth Paricchēda only : complete.

Same work as the above, but the difference in the colophon is noteworthy.

**Colophon:**

इति श्रीपरमहंसानन्दसरस्वतीपूज्यपादशिष्यश्रीमद्बलभद्रानन्दसरस्वतीविरचितायामद्वैतसिद्धिटीकायामद्वैतचान्द्रिकायां चतुर्थः परिच्छेदः समाप्तः ॥

No. **4537.** अध्यारोपप्रकरणम्.

ADHYĀRŌPAPRAKARAṆAM.

Pages,, 16. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4343.

On the problem of the superposition of the unreal appearance on the reality.

**Beginning:**

अध्यारोपप्रकरणमुच्यते—

अध्यारोपापवादाभ्यां ब्रह्मस्वरूपस्य शास्त्रप्रतिपाद(द्य)त्वेनाध्यारोपः प्रथमतो निरूप्यते । वस्तुन्यवस्त्वारोपणमध्यारोपः--यथा शुक्तिकायां रजतस्य, रज्जौ सर्पस्य, स्थाणौ पुरुषस्य, मरुमरीचिकायां जलस्य, आकाशे नीलपीतादेरारोपणम्; तथा निष्प्रपञ्चात्मनि प्रपञ्चस्यारोपणमध्यारोपः । अयमध्यारोपः अधिष्ठानाज्ञानाद्भवति ।

**End:**

अविवेकी तु स्वस्मिन्नेवारोप्यान्यनिष्टान्यपि दुःखानि स्वस्मिन्नारोप(य)ति—पुत्रस्सुखी चेदहमपि; [चेत्]पुत्रे(त्रो)नष्टश्चेदहमपि नष्ट इति अविवेकी तापं प्राप्नोति(इति)तयोर्भेदः.

No. **4538.** अनुभववेदान्तप्रकरणम्.

ANUBHAVAVĒDĀNTAPRAKARAṆAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 200.

A short philosophical poem in which the author, Hastāmalaka, describes his own experience relating to the realization of the Brahman.

Complete.

**Beginning :**

. . . . . . मित्तं यथा यः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

यमग्न्यु—वन्नित्यबोधस्वरूपं मनश्चक्षुरादि(दी)न्यबोधात्मकानि ।

प्रवर्तन्त आश्रित्य निष्कम्पमेकं स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

मनश्चक्षुरादेर्वियुक्तस्स्वयं यो मनश्चक्षुरादेर्मनश्चक्षुरादिः ।

मनश्चक्षुरादेरगम्यस्वरूपः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

**End :**

(उपाधौ यथा) भेदता सन्मणीनां तथा भेदता बुद्धिभेदेषु तेषु ।

यथा चन्द्रिकाणां जले चञ्चलत्वं . . . . . . तवापीह विष्णो ।

**Colophon :**

इति हस्तामलकाचार्यविरचितमनुभववेदान्तप्रकरणं समाप्तम् ॥

---

## No. 4539. अनुभूतिप्रकाशिका.

## ANUBHŪTIPRAKĀŚIKĀ.

**Substance**, paper. Size, 11 × 8¾ inches. Pages, 228. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 6 to 13.

This is a work which gives in verse summaries of the teachings of some of the Upaniṣads; by Vidyāraṇyasvāmin. Burnell also mentions a work of the same name.

**Beginning:**

प्रजापतिस्त्वात्मविद्यां छान्दोग्ये बहुधाब्रवीत् ।
विरोचनाय चेन्द्राय तां वक्ष्ये सुखबुद्धये ॥

असंसारी य आत्मासावन्वेष्टव्यो मुमुक्षुभिः ।
प्रजापतिरिति प्राह प्रसङ्गेन स्वसंसदि ॥

यो निष्पापो जरामृत्युशोकक्षुत्तृड्विवर्जितः ।
सत्योऽस्य कामस्सङ्कल्पश्चासंसारी स ईश्वरः ॥

पापं कर्तुरकर्तात्मा चिन्मात्रः पापवान् कथम् ।
जरामृत्यू देहधर्मावित्येते न चितस्ततः ॥

शोकस्स्य(।)न्मनसो धर्मः क्षुत्तृष्णे प्राणगे उभे ।
चिद्रूपस्यात्मनो नैव सन्तश्शोकादयस्त्रयः ॥

**End:**

द्वैतस्य मायिकत्वेन तत्त्वमद्वैतमिष्यताम् ।
सन्मात्रो नित्य इत्यादिश्रुत्या तत्तु स्फुटीकृतम् ॥

अथर्वणेऽस्मिन् कैवल्यप्रमुखाश्श्रुतयस्स्फुटाः ।
श्रुतिव्याख्यानतस्तुष्याद्विद्यातीर्थमहेश्वरः ॥

**Colophon:**

इत्यनुभूतिप्रकाशे देवविद्याख्यस्त्रयोदशोऽध्यायः ॥
इत्यनुभूतिप्रकाशिकाख्यग्रन्थस्समाप्तिमगमत् ॥

---

No. **4540.** अपरोक्षानुभूतिः.

APARŌKṢĀNUBHŪTIḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 13. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, not old.

**Complete.**

A short treatise on Advaita-Vēdānta in which certain processes of direct self-realisation are explained.

By Śaṅkarācārya.

**Beginning:**

श्रीरामं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥

अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।
सद्भिरेषा प्रयत्नेन वीक्षिणीया मुहुर्मुहुः ॥

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।
साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयम् ॥

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।
यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥

नित्यमात्मस्वरूपं हि दृश्यते विपरीतगम् ।
एवं यो निश्चयस्सम्यक् विवेको वस्तुनस्स वै ॥

सदैव वासनात्यागश्शमोऽयमिति शब्दितः ।
निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥

विषयेभ्यः परा वृत्तिः परमोपरातिर्हि सा ।
सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ॥

**End:**

विधिरङ्गैस्समायुक्तो राजयोग उदाहृतः ।
किञ्चित्पक्कषायाणां हठयोगो न संयतः ॥

परिपक्कं मनो येषां केवलोऽयं च सिद्धिदः ।
गुरुदैवतभक्तानां सर्वेषां सुलभो जडात् ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितमपरोक्षानुभूतिप्रकरणं समाप्त(म्) ॥

## No. 4541. अपरोक्षानुभूतिः.

## APARŌKṢĀNUBHŪTIḤ.

Pages, 13. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 411.

Complete.

Same work as the above.

---

## No. 4542. अपरोक्षानुभूतिः.

## APARŌKṢĀNUBHŪTIḤ.

Pages 10. Lines, 7 on a page.

Begins on fol. 33*a* of the MS. described under No. 534.

Complete.

Same work as the above.

## No. 4543. अवधूतगीता.

## AVADHŪTAGĪTĀ.

Pages, 44. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 4369.

Complete in 7 Prakaraṇas.

A short exposition of the principles of Advaita-Vēdānta in the form of a dialogue between Dattātrēya and Gōrakṣa.

**Beginning:**

अस्य श्रीअवधूतगीतामन्त्रस्य अवधूत ऋषिः, अनुष्टुप्(भः)छन्दांसि, भगवान् निरञ्जनो देवता, निरञ्जनसिद्ध्यर्थे विनियोगः ।

ईश्वरानुग्रहादेव पुंसामद्वैतभावना ।
महाभयपरित्राणाद्विप्राणामुपजायते ॥

यदिदं पूरितं सर्वमात्मन्येवात्मनात्मनि ।
निराकारं कथं वन्दे को वा वन्द्यो मदन्यतः ॥

पञ्चभूतात्मकं विश्वं मरीचिजलसन्निभम् ।
कस्येहाभून्नमस्कारः योऽहमेको निरन्तरः ॥

आत्मैव केवलाभेदो भेदाभेदो न विद्यते ।
अस्ति नास्ति कथं ब्रूमो विस्मयः प्रतिभाति मे ॥

वेदान्तसारसर्वस्वं ज्ञानं विज्ञानमेव च ।
अहमात्मा निराकारः सर्वं वेद्मि स्वभावतः ॥

यो वै सर्वात्मको देवो निष्कम्पो गगनोपमः ।
स्वभावनिर्मलश्शुद्धः स एवाहं न संशयः ॥

अहमात्मा परो ह्यन्तः शुद्धो विज्ञानविग्रहः ।
सुखं दुःखं न जानामि कथा वापि प्रवर्तते ॥

**End:**

धर्मादौ मोक्षपर्यन्ते निबर्हास्सर्वदा वयम् ।
कथं रागविरागश्च(गौ च) कल्पयन्ति विपाश्चितः ॥

विन्दति विन्दति नहि नहि मन्त्रं नहि नहि छन्दोलक्षणतन्त्रम् ।
समरसमग्नो भावितपूतः प्रलपितमेतत्कथमवधूतः ॥

**Colophon:**

इत्यवधूतग्रन्थे दत्तात्रेयगोरख(क्ष)संवादे स्वात्मसंयुक्त्युपदेशे निर्वाण-निष्ठामाहात्म्यं नाम सप्तमप्रकरणम् ॥

सर्वं सम्पूर्णम् ॥

## No. 4544. अवधूतगीता.
## AVADHŪTAGĪTĀ.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 24. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Ṛbhugītā 12*a*, Mahāvākyaratnāvalī 14*a*, Jñānasāra 32*a*.

Seven Prakaraṇas, complete.

Same work as the above.

## No. 4545. अष्टावक्रदीपिका—सव्याख्या.
## AṢṬĀVAKRADĪPIKĀ WITH COMMENTARY.

Pages, 118. Lines, 5 on a page.

Begins on fol. 29*a* of the MS. described under No. 4523.

On the means of attaining the final emancipation of the soul.

The commentary is by Viśvēśvara.

**Beginning:**

मुक्तिमिच्छसि चेत्तात विषयान् विषवत् त्यज ।
क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥
सच्चिदानन्दमद्वैतं सर्वाधिष्ठानमुत्तमम् ।
नत्वाष्टावक्रसूक्तस्य दीपिका कथ्यते परा ॥

इह खलु ज्ञानविज्ञानसम्पन्नः परमकारुणिकोऽष्टावक्रमुनिर्मुक्तिकामनया समुपेतं कंचिच्छिष्यं शमदमाद्यधिकारस्वीकारोपदेशपूर्वकमात्मतत्त्वमुपदिशति—मुक्तिमिति । तातेति सानुग्रहसम्बोधने । हे शिष्य त्वं मुक्तिं सर्वानर्थनिवृत्तिं परमानन्दावाप्तिरूपामिच्छसि; तर्हि विषवत् यथा विषमनर्थहेतुत्वात्त्यज्यते तथा विषयान् देहादीननर्थहेतुभूतांस्त्यज; तत्राहं ममेत्यध्यासादासक्तिं मा कार्षीरित्यर्थः ।

**End:**

कियद्भिः श्लोकैरात्माग्निमध्यखैर्जीवात्मपरमात्मभेदाभिन्नात्मा द्वौ; अग्निः त्रयः, मध्ये खं मध्ये शून्या(न्यम्); अङ्कानां वामतो गतिरिति न्या-

यात् अन्ते द्वौ, मध्ये खम् आदौ त्रयः; द्व्यधिकैस्त्रि(स्त्रि)शतश्लोकैरित्यर्थः ।

श्लोकसङ्ख्यामुपसंहरति—अवधूतेति । अवधूतानुभूतिरूपो ग्रन्थः । तस्य सङ्ख्याक्रमो विद्यते येषु सङ्ख्याक्रम ईदृशा(:)श्लोका अमी कथिता इत्यर्थः ॥

**Colophon:**

इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रदीपिकायां व्याख्यानं समाप्तम् ॥

---

## No. 4546. असङ्गात्मविवरणम्.

## ASAṄGĀTMAVIVARAṆAM.

Pages, 18. Lines, 7 on a page.

Begins on fol. 98*a* of the MS. described under No. 582.

A tract intended to show that the soul is different from the mind and the intellect and all the other functions of consciousness, and that it forms their foundation and support.

The author is not known. A work of the name of Asaṅgātmaprakaraṇa is mentioned by Burnell.

Complete.

**Beginning:**

गम्बीजमन्त्रजाप्यानामभीष्टवरदाय च ।
नमः श्रीसाम्बपुत्राय तत्सुतभ्रातृरूपिणे ॥
विराडाद्यंशिभूताय प्रेरकाय च कर्मणः ।
विश्ववैश्वानरादीनां स्वरूपाय नमो नमः ॥
वि(व)र्तीया(द्या)सर्परूपात्संवित्सर्पावभासिका ।
सा पार्वती सदा पातु मामर्धशिवधारिणी ॥
अतिरिक्तोऽन्तःकरणादहंशब्देन गोचरः ।
न भिद्यते हि सन्मात्राज्जीवोऽयं पारमार्थिकः ॥

**End:**

लीयन्तेऽत्रैवात्मविदि यथा तत्ताश्रयं जलम् ॥
ईशानुज्ञां समाश्रित्य प्रविष्टं देवतादरात् ।
सप्राणबुद्धिवाचेदं कृतं दिव्यं समभ्यसेत् ॥

**Colophon:**

इत्यसङ्गात्मविवर(णप्रकरणं सं)पूर्णम् ॥

अव्यक्तासङ्गमचलमक्रियं तमसः परम् ।
सर्वेषां नस्साक्षिभूतं शिवं गुरुमहं भजे ॥
वासुदेवेन लिखितम् ॥

## No. **4547.** आत्मबोधः.

## ĀTMABŌDHAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 200

Complete.

A short treatise on the nature of the 'soul' and its oneness with the supreme self.

By Śaṅkarācārya.

**Beginning:**

शतमखपूजितपादं शतपथ(मधन)मनसाप्यगोचराकारम् ।
श्रि(सि)तजलरुहनिभनेतं(त्रं) शि(सी)तावामाङ्कमाश्रये रामम् ॥
तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥
बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम् ।
पाकस्य वह्निवज्ज्ञानं विना मोक्षो न सिध्यति ॥

**End:**

दिग्देशकालाद्यनपेक्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरञ्जनम् ।
य(:) स्वात्मतीर्थं भजते विनिष्क्रियः स सर्ववित् सर्वगतोऽमृतो भवेत् ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यशङ्कराचार्यविरचितमात्मबोधप्रकरणं समाप्त(म्) ॥

## No. **4548.** आत्मबोधः.

ĀTMABŌDHAḤ.

Pages, 11. Lines, 8 on a page.

Begins on fol. 106*b* of the MS. described under No. 4337.
Complete.
Same work as the above.

## No. **4549.** आत्मबोधः.

ĀTMABŌDHAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 45*a* of the MS. described under No. 432.
Complete.
Same work as the above.

## No. **4550.** आत्मबोधः.

ĀTMABŌDHAḤ.

Pages, 16. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4526.
Complete
Same work as the above.

## No. 4551. आत्मबोधः.
## ĀTMABŌDHAḤ.

Substance, paper. Size, $8\frac{5}{8} \times 6\frac{3}{4}$ inches. Pages, 9. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sahasranāmabhāṣyōpaniṣatsāmya 7*a*.

Complete.

Same work as the above.

## No. 4552. आत्मबोधः.
## ĀTMABŌDHAḤ.

Substance, palm-leaf. Size, $11\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 6. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 7*a*. The other works herein are Vākyavṛtti 1*a*, Dṛgdṛśyavivēka 3*a*, Mahāvākyavivaraṇa 5*a*.

Incomplete.

Same work as the above.

---

## No. 4553. आत्मबोधः.
## ĀTMABŌDHAḤ.

Pages, 14. Lines, 4 on a page.

Begins on fol. 13*a* of the MS. described under No. 401.

Complete.

Same work as the above.

---

## No. 4554. आत्मबोधः—सव्याख्यः.
## ĀTMABŌDHAḤ: WITH COMMENTARY.

Substance, paper. Size, $8\frac{1}{8} \times 6\frac{3}{8}$ inches. Pages, 15. Lines, 29 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Text same as in the above. The commentary is called Dīpikā.

**Beginning:**

वन्दे वरप्रदमहं वरवारणेन्द्रवक्त्रं सदा क्षितिभृदीश्वरजातनूजम् ।
विघ्नेश्वरं विबुधवन्दितपादपद्मं संसारसम्भवभयापहमानतानाम् ॥

शतमखपूजितपादं शमधनमनसाप्यगोचराकारम् ।
सितजलरुहानिभनेत्रं सीतावामाङ्कमाश्रये रामम् ॥

तत्रभवान् शङ्कराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्तसिद्धान्तसङ्ग्रथितमात्मबोधाख्यप्रकरणं दिदर्शयिषुः परमकृपालुराचार्यः प्रतिजानीते—तपोभिरिति ।

तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम् ।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते ॥

कृच्छ्रचान्द्रायणनित्यनैमित्तिकाद्यनुष्ठानरूपैस्तपोभिः क्षीणानि पापानि रागाद्यन्तःकरणदोषास्ते(येषां ते)षाम् । नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्—इति वचनात् । अत एव शान्तानाम् अक्षोभिताशयानाम् ।

**End:**

बाह्यतीर्थस्नायी तु किञ्चिज्ज्ञः प्रादेशिकः मरणधर्मा भवति । एतत्स्नायी तु तद्विपरीत इति आत्मतीर्थस्यान्यतीर्थस्य(च)न्योन्यवैलक्षण्यमुन्नेयम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पूज्यपादशिष्यशङ्करभगवत्पादाचार्यविरचितात्मबोधस्य प्रकरणस्य दीपिका समाप्ता ॥

## No. 4555. आत्मबोधः—सव्याख्यः.

### ĀTMABŌDHAḤ: WITH COMMENTARY.

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 32. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

## No. 4556. आत्मबोधः—सव्याख्यः.

### ĀTMABŌDHAḤ: WITH COMMENTARY.

Pages, 42. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4169.

Same work as the above.

From the colophon in the end it is made out that the author of the commentary is Viśvēśvarapaṇḍita.

Complete.

**Colophon:**

श्रीपरमहंसपरिव्राजकाचार्याद्वैतसिद्धान्तनिर्धारणगोविन्दभगवत्पादाचा-र्यशिष्यशङ्करभगवत्पादाचार्यविरचितात्मबोधस्य श्रीविश्वेश्वरपण्डितविरचि-तदीपिका समाप्ता ॥

## No 4557. आत्मबोधः—सव्याख्यः.

### ĀTMABŌDHAḤ: WITH COMMENTARY.

Substance, palm-leaf. Size, $17 \times 1\frac{3}{8}$ inches. Pages, 30. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, new.

The last five pages of the manuscript contain a commentary on the first stanza of Śrī-Bhāgavata.

Incomplete.

Same work as the above.

## No. 4558. आत्मबोधः—व्याख्यासहितः.

## ĀTMABŌDHAḤ: WITH COMMENTARY.

Substance, palm-leaf. Size, 15½ × 1⅛ inches. Pages, 63. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 10*b*. The other work herein is Ātmānātmavivēka 1*a*.

The colophon at the end designates the commentary as Vēdāntasāra, and attributes it to Śrīpadmapādācārya, a disciple of Śaṅkarācārya.

Complete.

**Beginning:**

तत्रभवान् शङ्कराचार्य उत्तमाधिकारिणां वेदान्तप्रस्थानत्रयं निर्माय तदवलोकनासमर्थानां मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्तसिद्धान्तसङ्ग[ह]थनमात्मबोधप्रकरणं दिदर्शयिषुः प्रतिजानीते—तपोभिरिति ।

**End:**

अत एव निरञ्जनम् । इतरतीर्थेषु तद्वैपरीत्यं द्रष्टव्यम् । तस्मादात्मतीर्थेरतस्य न किञ्चिदवशिष्यत इति भावः ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यशङ्कराचार्यशिष्यश्रीपद्मप(ा)दाचार्येण कृतं वेदान्तसाराख्यानव्याख्यानं सम्पूर्णम् ॥

## No. 4559. आत्मानात्मविवेकः.

## ĀTMĀNĀTMAVIVĒKAḤ.

Substance, palm-leaf. Size, 18⅜ × 1½ inches. Pages, 12. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 35*b*. The other works herein are Pañcīkaraṇavyākhyāna 1*a*, Jīvanmuktasañcāra 8*a*, Pañcabhramanirūpaṇa 8*b*, Pañcīkaraṇavārttika 10*a*, Vārttikābharaṇa (a commentary on

Pañcīkaraṇavārttika) 14*a*, Jñānānuṣṭhānaprakaraṇa 29*a*, Pañcaratna 29*b*. Pañcaratnavyākhyāna 30*a*, Praśnōttaramālā 32*b*, Yativarjyaviṣaya 34*a*, Daṇḍalakṣaṇa 41*a*, Tattvasārōpaniṣad 41*b*, Bhikṣukōpaniṣad 42*a*, Yatidharmāḥ 42*b*, Hastāmalakaślōka, 68*a*, Bhēdakhaṇḍana 68*b*, Svānubhavaprakaraṇa 71*b*, Yatividhi 73*a*, Yōgilakṣaṇa 81*a*, Sannyāsibhikṣāvidhi 84*a*.

A work on Advaita-Vēdānta which investigates into the nature of the difference between soul and matter.

By Śaṅkarācārya.

Complete.

**Beginning:**

आत्मानात्मविवेकः कथ्यते—

आत्मनः किं निमित्तं दुःखम्? शरीरपरिग्रहनिमित्तं दुःखम्; आत्मना सह वै शरीरस्य सतः प्रियाप्रिययोरपहतीति श्रुतेः। शरीरपरिग्रहः केन भवति? कर्मणा। कर्म केन भवति? रागादिभ्य. ।

**End:**

एवं नित्यसत्यशुद्धबुद्धमुक्तस्वभावं ब्रह्माहमस्मीति संशयासम्भावनाविपरीतभावनाराहित्येन यस्तु जानाति स जीवन्मुक्तो भवति ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितात्मानात्मविवेकस्समाप्तः ॥

## No. 4560. आत्मानात्मविवेकः.
## ĀTMĀNĀTMAVIVĒKAḤ.

Pages, 7. Lines, 16 on a page.

Begins on fol. 3*a* of the MS. described under No. 2118.

Attributed to Svayamprakāśayōgīndra.

Complete.

Similar to the above.

**Beginning:**

यं विनिद्रा जितश्वासास्सन्तुष्टास्संयतेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै विद्यात्मने नमः ॥

आत्मानात्मविवेकः कथ्यते—

आत्मा स्थूलसूक्ष्मकारणशरीरेभ्यो व्यतिरिक्तः, अवस्थात्रयसाक्षी, पञ्चकोशविलक्षणः, चतुर्विंशतितत्त्वाधारः, मायया प्रतीयमानाभ्यां (जीवेश्वराभ्यां) भिन्नः, नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दस्वरूपः ।

निर्मलो निश्चलः पूर्णः परमात्मा सनातनः ।
निर्विकारो नि(रा)कारः प्रत्यग्भूतस्स्वयम्प्रभुः ॥

अथानात्मा—स्थूलसूक्ष्मकारणशरीराणि । स्थूलशरीरं नामापञ्चीकृतमहाभूतकार्यप्रारब्धकर्मणा सञ्चितम् ।

**End:**

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥

इति भगवद्वचनाच्च ।

आत्मानात्मविवेकं तु कृत्वा तिष्ठति यः पुमान् ।
शिखी मुण्डी जटी वापि मुच्यते नात्र संशयः ॥

आत्मानात्मविवेकशून्यहृदयो ह्यत्यन्तमज्ञो जनः
स्वात्मानन्दमतिप्रबुद्धममलं त्वध्यस्य दारादिषु ।
त(उ)द्भूतं मनुते सदात्र रमते श्वा वै यथास्वादये(त्)
भूषास्ति(शुष्कास्थि)प्रचये स्वदन्तविवरादुद्भूतरक्तादिकम् ॥

अयमर्थोऽपनीयते ॥

ओं नमो ब्रह्मादिभ्यो = महद्भ्यः ॥
सर्वोपप्लवरहित = ब्रह्मैवाहमस्मि ॥
ओं शान्तिश्शान्तिश्शान्तिः ॥

**Colophon:**

इति स्वयम्प्रकाशयोगीन्द्रविरचितात्मानात्मविवेकस्सम्पूर्णमगमत् ॥

## No. 4561. आत्मानात्मविवेकः.

## ĀTMĀNĀTMAVIVĒKAḤ.

Pages, 20. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 4558.

Complete.

Same work as the above.

## No. 4562. आत्मानात्मविवेकः.

## ĀTMĀNĀTMAVIVĒKAḤ.

Pages, 9. Lines, 20 on a page.

Begins on fol. 181*b* of the MS. described under No. 4336.

Complete.

Same work as the above.

---

## No. 4563. आत्मानात्मविवेकः.

## ĀTMĀNĀTMAVIVĒKAḤ.

Pages, 13. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4337.

Complete.

Same work as the above.

## No. 4564. आनन्ददीपटीका–विशुद्धदृष्टिः.

## ĀNANDADĪPAṬĪKĀ: VIŚUDDHADṚṢṬIḤ.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 422. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, old.

Adhyāyas 1 and 2 complete.

A gloss on the Ānandadīpa of Śivānandayati; by his pupil Rāmanātha.

**Beginning:**

ध्यायन्तो . . . यन्तोऽप्यखिलसुरगुरोरप्यलभ्यं लभन्ते
तुल्यं यं वेदवाचश्चकितमभिदधत्यद्वितीयेन भक्त्या ।
यच्छक्तिर्विश्वविश्वं सृजति मुहुरवत्यत्त्यखण्डामलं तं
सत्यानन्दप्रकाशं सकलविरहितं शङ्करं विष्णुमीळे ॥

स्वाज्ञानसम्भवभवप्रभवप्रसूतसर्वप्रवृत्तिविलयो मम यत्प्रसादात् ।
तस्मै नमस्सकलभक्तविबोधनाय मुद्रां करेण वहते परमेश्वराय ॥

हेरम्बषण्मुखदिवाकरविष्णुरुद्रब्रह्मादिनामशतरत्नसुभूषिताङ्गी ।
ब्रह्माण्डपङ्क्तिशतभारनिबन्ध(द्ध)कण्ठी वाग्देवता परचितिर्मम सन्निधत्ताम् ॥

* * * *

नत्वा शिवानन्दयतीशमाद्यमानन्ददीपो यत आविरासीत् ।
विशुद्धदृष्टिं करवाणि हृष्यन् रामाभिधान(:) स्फुटमस्य टीकाम् ॥

* * * *

अथ किल परमकृपालवोऽस्मच्छ्रीगुरुचरणा आदरनैरन्तर्यानेकका-लासेवितशास्त्रोक्तलक्षणलक्षितश्रीगुरुचरणचरणपद्मपरिचर्यापरिश्रमपरिप्राप्ता-शेषशास्त्ररहस्यश्रवणमननिदिध्यासनसमाध्यनुष्ठानप्राप्तनित्याद्वितीयनिरति-शयपरमानन्दनित्यध्वस्तसमस्तसपरिकराज्ञानदेहत्रयावस्थात्रयादिसमस्तोपा-धिविनिर्मुक्तस्वात्माभिन्नपरब्रह्मविषयासन्दिग्धापरोक्षविज्ञानोन्मूलितस्वात्माज्ञा-नाशेषतत्कार्यनिवहप्राप्तसमस्तकामा अप्येतादृशस्वात्मतत्त्वानवबोधविजृम्भि-तस्थूलसूक्ष्मदेहद्वयानादितादात्म्याभिमानप्रस्तुतकर्तृत्वभोक्तृत्वप्रमातृत्वजाति-वर्णाश्रमवयोऽवस्थाद्यनेकानर्थव्राताध्यासप्रभवानन्दभवाजितपुण्यापुण्यमिश्रि-तानन्दकर्मप्रभवदेवतिर्यक्स्थावरमनुष्याद्यनेकगर्भवासाद्यपर्यन्तदुष्परिहरदु-स्सहदुःखोर्मिमालासहस्र.

प्रहृष्टहृदयास्तस्याल्पश्रवणेनैव बहुवारं समस्तशास्त्रश्रवणादिपरिश्रम-फलाज्ञाननिवृत्त्यानन्दावाप्तिप्रयोजननिमित्तागमिकनिस्सन्दिग्धापरोक्षात्मवि-ज्ञानसिद्धये सकलशास्त्ररहस्यसारस्नेहवर्धितमर्थतोऽप्यानन्ददीपाख्यं वेदोत्त-माङ्गप्रकरणं शारीरकमीमांसाच्छायानुसारेणारभमाणा अलौकिकशिष्टाचार-मूलमूलागममूलकप्रारिप्सितग्रन्थाप्रत्यूहपरिसमाप्तिप्रचय(गम)नसिद्धिफलक-विशिष्टप्रकरणप्रतिपाद्येष्टदेवतानमस्कारमङ्गळमाचरन्तो मुमुक्षुप्रवृत्त्यङ्गविष-यप्रयोजनाद्यनुबन्धचतुष्टयमेतन्मूलशारीरकसिद्धमर्थात् दर्शयन्ति---यं वेदा इति । विष्णवे नम इति योजना । स विष्णुर्नमस्कर्तुरात्मा अतिरिक्तो वा? नाद्यः कर्तृकर्मविरोधात् ।

**End:**

इयता प्र[ति]बन्धेन प्रतिपादितस्यार्थस्य प्रचयादिसिद्धये अध्यायान्तेऽपि परमात्मानं प्रत्यगभिन्नत्वेन प्रणमन्नर्थादुक्तवक्ष्यमाणाध्यायद्वयार्थं सङ्गृह्य दर्शयन्त्येकेन श्लोकेन यस्मादेतदिति ।

उक्तविशेषणयुक्ताः परमहंसा(:) स्थावरजङ्गमात्मकप्रपञ्चमात्राधिष्ठि-(ष्ठा)तारं यं स्वात्मत्वेन जानन्ति, यत्स्वरूपं युक्तिकुशला अपि वैशेषिकादयो न मन्वते तस्मै सर्वान्तर्यामिणे नम इत्यर्थः ॥

यद्भासा निगमार्थनिन्दनपरध्वान्ता विनष्टा भृशं
यत्रापुर्निगमान्ततत्परयतिप्रद्वेषपापावृताः ।
मूढा ज्ञानलवोद्धताश्शलभतामानन्ददीपाभिधे
तत्कर्त्रे यतिपद्मषण्डरवये शश्वन्नमश्शम्भवे ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छिवानन्दयतिपूज्यपादशिष्य-श्रीमद्रामनाथविदुषा विरचितायामानन्ददीपटीकायां विशुद्धदृष्टिसमाख्यायां द्वितीयोऽध्यायः ॥

## No. 4565. उपदेशसाहस्री—सव्याख्या.

## UPADEŚASĀHASRĪ: WITH COMMENTARY.

Substance, palm-leaf. Size, 19 × 1⅜ inches. Pages, 398. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

A work in verse and prose on how to attain the salvation of final self-emancipation; by Śaṅkarācārya. The poetical portion is divided into 19 chapters, and the prose portion into 3 parts. The commentary relating to the portion in verse is by Bōdhanidhi, a disciple of Vidyādhāmamuni. The author of the commentary on the prose portion cannot be made out with certainty, as it breaks off in the second Prakaraṇa.

**Beginning** of the metrical portion.

वन्दे वरप्रदमहं वरवारणेन्द्रवक्त्रं सदा क्षितिभृदीश्वरजातनूजम् ।
विघ्नेश्वरं विबुधवन्दितपादपद्मं संसारसम्भवभयापहमानतानाम् ॥

शतमघ(ख)पूजितपादं शतपथ(मधन)मनसाप्यगोचराकारम् ।
सितजलरुहनिभनेत्रं सीतावामाङ्कमाश्रये रामम् ॥

विष्णुं पञ्चात्मकं वन्दे भक्त्याष्टादशभेदया ।
साङ्गवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥
चैतन्यं सर्वगं सर्वं सर्वभूतगुहाशयम् ।
यत्सर्वविषयातीतं तस्मै सर्वविदे नमः ॥

चेतनमेव चैतन्यं ज्ञप्तिस्वरूपम् । स्वाविद्याकल्पितदिक्कालाकाशादि सर्वं व्याप्नोतीति सर्वगम् । सर्वगमित्युक्ते परमार्थतस्सर्वं तद्भिन्नमस्तीत्याशङ्का मा भूदित्याह सर्वमिति ।

**End** of the metrical portion:

एवं श्रुतिस्मृतिन्यायानुभवानुसारेण सर्ववेदान्तसारमुपपाद्य अधुना श्रोतणां तत्र विश्वासजननाय ब्रह्मात्मज्ञानप्राप्तेरन्तरङ्गज्ञापनाय च प्रवरगुणकीर्तनेनाचार्यान् नमस्करोति ।

विमथ्य वेदोदधितस्समुद्धृतं सुरैर्महाब्धेस्तु यथा महात्मभिः ।
तथामृतं ज्ञानमिदं हि यैः पुरा नमो गुरुभ्यः परमीक्षितं च यैः ॥

विमथ्य विचार्य । पूर्वपक्षसिद्धान्तपरिग्रहद्वारेण । . . . . . . तस्मान्मुमुक्षुभिः ब्रह्मात्मज्ञानार्थिभिः । गुरुभक्तैर्देवताभक्तैश्च यत्नेन भवितव्यमित्येवं वाक्यप्रत्ययानुसारेण ज्वरनाशप्रकरणस्य पदार्थविवरणं कृतं देवतागुरुभक्तिप्रेरितेन मया ॥

इति सप्तशतश्लोका यतीन्द्रश्रीमुखोद्गता(:) ।
विवृता गुरुभक्तेन मया ब्रह्मात्मबोधकाः ॥

उपास्य श्रद्धया श्रीमद्विद्याधाममुनेश्चिरम् ।
श्रीमत्पदाम्बुजं तस्य प्रसादान्न स्वबुद्धितः ॥

येन मे निखिलाद्द्वैतादाकृष्य मन आत्मनि ।
स्थापितं मुनिमुख्येन यावज्जीवं नमामि तम् ॥

यद्भाष्यसागरजयुक्तिमणिप्रकीर्णान्
प्राप्याधुना कतिपयान् कवयो भवन्ति ।
तस्मै नमो जनमनोज्ञदिवाकराय
कृत्स्नागमार्थनिलयाय यतीश्वराय ॥

**Colophon :**

इति श्रीमद्विद्याधामशिष्येण बोधनिधिना श्रद्धामात्रप्रेरितेन कृतमुपदेशग्रन्थविवरणं समाप्तम् ॥

यत्पादकमलासङ्गान्निर्वाणं प्राप्तवानहम् ।
सर्वान्तरात्मपूज्यांस्तान् प्रणमामि गरीयसः ॥

**Beginning** of the prose portion :

सर्वोपनिषत्सारसङ्ग्राहिका पद्यगद्यात्मिका हीयमुपदेशसाहस्री । तत्र पद्यभागं प्रागुक्तया परिपाट्या परिसमाप्य गद्यभागमवतारयन् भगवान्

भाष्यकारस्तावदोङ्कारश्चाथशब्दश्चेत्यादिस्मृतिप्रामाण्यादथशब्दोच्चारणरूपं मङ्गळाचरणं कृत्वा चिकीर्षितप्रतिज्ञां करोति—

अथ मोक्षज्ञानोपदेशविधिं व्याख्यास्यामः ।

तत्र प्रवृत्त्यङ्गत्वेनाधिकार्याद्यनुबन्धं सूचयति—

मुमुक्षूणां श्रद्दधानानामर्थिनामर्थाय । तेषामुपकाराय मोक्षार्थज्ञानोपदेशप्रकारकव्याख्याने स्थिते प्रथमं शिष्यानुशासनं प्रारिप्सुः शिष्याय कीदृशाय विद्या दातव्येत्याशङ्कायामाह—तदिदं मोक्षसाधनं ज्ञानं साधनसाध्यादनित्यात्सर्वस्माद्विरक्ताय त्यक्तपुत्रादित(त्रि)लोकैषणाय . .

. . . . परीक्षिताय ब्रूयात् ।

**End** of the prose portion :

यदि पुनरवगतेरवगन्तृविषयत्वमिष्यते तत्र को दोषः ? तत्राह—

(मू.)

अवगन्तृविषयत्वे चानवस्था पूर्ववदपरिहार्या स्यात् यथापूर्वम्.

---

## No. 4566. उपदेशसाहस्री—सव्याख्या.

### UPADĒŚASĀHASRĪ: WITH COMMENTARY.

Substance, palm-leaf. Size, $13\frac{1}{4} \times 2\frac{1}{4}$ inches. Pages, 220. Lines, 13 on a page. Character, Telugu. Condition, injured. Appearance, old.

The metrical portion almost complete.

Same work as the above.

## No. 4567. ऋभुगीता.

### ṚBHUGĪTĀ.

Substance, palm-leaf. Size, $12\frac{7}{8} \times 1\frac{5}{8}$ inches. Pages, 21. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 74*a*. The other works herein are Nikumbhilāyāgakalpa 1*a*, Pratyaṅgirākalpa 25*a*, Ākāśabhairavakalpa 50*a*, Svarṇākarṣaṇabhairavakalpa 62*a*.

Incomplete.

A short treatise stringing together and interpreting some of the more important of the authoritative sentences in the Upaniṣads so as to give support to the Advaita view of the Vēdānta. The work is written in the Purāṇic style.

**Beginning:**

चैतन्यमात्रं ब्रह्मैवात्मा केवलमद्वयम् ।
परानन्दैकरूपैर्वाखण्डैकरसः परः ॥

पुरा सर्वे ब्रह्मनिष्ठाः कदाचिन्मिलिताः पराः ।
सनत्कुमारमागत्य पप्रच्छुर्ज्ञानमुत्तमम् ॥

मुनयः—

भगवन् सर्वतत्त्वज्ञ आत्मज्ञानघनाघन ।
उक्तं भगवता सर्वमद्वैतं परमाद्भुतम् ॥

तथापि तृप्तिं नेष्यामो वर्षकोटिशतैरपि ।
ऋभु(भो)र्निदाघे यत्प्रोक्तं तदेवास्मिन् प्रबोधय ॥

तच्छ्रुत्वा वचनं तेषां परं सन्तोषमागतः ।
वक्तुमारभते योगी शुद्धात्मानं परामृतम् ॥

सनत्कुमारः—

शृणुध्वं मुनयस्सर्वे गोप्यं सर्वात्मना सदा ।
ऋभुगीतेति विख्याता ब्रह्मलोके स्थिता सदा ॥

ततः श्रुतन्तु युष्माकमादरात्प्रवदाम्यहम् ।
गोप्यं गोप्यं महागोप्यं गोप्यं गोप्यं पुनः पुनः ॥

* * * *

नमः कृत्वा निदाघोऽपि आत्मानात्मद्वयं मदम्(वद) ।
इति पृष्टो(ष्ट)ऋभुः प्राह आत्मा(त्मनो)निश्चयं व(त)दा

सर्ववर्जितचिन्मात्रसर्वानन्दमयं परम् ।
सर्वतेजःप्रकाशात्मा एकोवा(क आ)त्मा न संशयः ॥

See under the next number, for the end.

## No. 4568. ऋभुगीता.

## ṚBHUGĪTĀ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 4544.

Mahāvākyaprakaraṇa only.

Same work as the above.

See under the previous number for the beginning.

**End:**

एवमैक्यपरं गत्वा स्वस्वभावे भवोत्तम ॥
एतत्सर्वं महावाक्यं नास्ति नास्ति न संशयः ।
सर्वं नास्ति न सन्देहः सर्वं ब्रह्म न संशयः ॥
एकाकारमखण्डं तत् तदेवाहं न संशयः ।
ब्रह्मेदं ब्रह्मताकारं तद्ब्रह्माहं न संशयः ॥

**Colophon:**

इति ऋभुगीतासूपनिषत्सु ब्रह्मविद्यायां महावाक्यप्रकरणं सम्पूर्णम् ॥

---

## No. 4569. एकश्लोकः.

## EKAŚLŌKAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 28*b* of the MS. described under No. 1021.

Complete.

This is the single stanza said to have been addressed to a leper by Śaṅkarācārya with a view to liberate him from the bondage of recurring births by imparting to him the knowledge of the Vēdānta.

**Beginning** and **End**:

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।
चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मिन् प्रभो ॥

**Colophon**:

एकश्लोकी(कः) समाप्ता(प्तः) ॥

---

No. **4570.** एकश्लोकः—तत्त्वदीपनसहितः.

ĒKAŚLŌKḤ WITH TATTVADĪPANA.

Pages, 6. Lines, 7 on a page.

Begins on fol. 38*a* of the MS. described under No. 432.

The commentary is by Svayamprakāśayōgīndra, a disciple of Gōpālayōgīndra.

Complete.

**Beginning**:

श्रीमद्गोपालयोगीन्द्रप्रसादादेव केवलम् ।
व्याख्यानमेकश्लोकस्य क्रियते तत्त्वदीपनम् ॥

इह खलु भगवान् सर्वज्ञश्चन्द्रचूडः

अष्टवर्षे चतुर्वेदो द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरत्यगात् ॥

इत्यादिगुणविशिष्टो भगवदभिधानो दुर्वादिदर्वीकरमन्त्रराज(:) शङ्कराचार्यस्तीर्थैरिव त्रिभुवनं पावय(न्) सद्वैद्यैरिव संरक्षयन् चन्द्र इवा-

प्यापयन् कल्याणचरित्रै रत्नैरिव अलङ्कुर्वन् शश्वद्विश्वं विचचार । तत्र कदाचिद्ग्रामविशेषे कूश्माण्डमिव पाण्डुराङ्गमुलूकमिव सूर्या[व]लोकनाक्षमं लज्जया जनावलोकनाक्षमं मां त्राहि त्राहीति पुनः पुनः प्रणमन्तं कंचन कुष्ठिनं साधनचतुष्टयसम्पन्नमालोक्य परमकारुणिकत्वेन तावदेनं संसारसङ्कटान्मोचयन् कृतार्थीकुर्यामिति निश्चित्य—

तेषामहं समुद्धर्ता मृत्युसंसारसागरात्.

इति प्रतिज्ञापरिपालनार्थं तथा चकार ।

*　　*　　*　　*

वाक्यार्थं मनसि निधाय प्रश्नोत्तरश्लोकरूपेण निबबन्ध । तत्र प्रश्नव्याजेन तद्वाक्येनैव तत्त्वं बोधयितुं तमेव शिष्यं पृच्छति—किं ज्योतिरिति ।

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।

चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मिन् प्रभो ॥

तव किं ज्योतिः? केन ज्योतिषा अव(आ)लोकेन अन्धकारनिवृत्तिद्वारा तवेष्टदर्शनं भवेत्?

**End:**

तस्मादहं ब्रह्मा(स्मी)ति नित्यशुद्धबुद्धमुक्तपरमानन्दस्वभावं ब्रह्मैवास्मीति ज्ञानात्कृतकृत्यो भवेत् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोपालयोगीन्द्रशिष्यस्वयम्प्रकाशयोगीन्द्रविरचितैकश्लोकव्याख्या समाप्ता ॥

## No. **4571.** एकादशोत्तरशतवाक्यग्रन्थः.

## ĒKĀDAŚŌTTARAŚATAVĀKYAGRANTHAḤ.

Pages, 19. Lines, 22 on a page.

Begins on fol. 47*b* of the MS. described under No. 1021

Complete.

This gives, in 111 benedictory sentences based on Upaniṣdic ideas and passages, the essence of **Advaita-Vēdānta** : by Śaṅkarācārya.

**Beginning :**

शरीरत्रयव्यतिरिक्तावस्थात्रयनित्यनिर्विकारासङ्गस्वप्रकाशापरोक्षनित्यमुक्तसर्वान्तरसच्चिदानन्दसर्वगतपरिपूर्ण(I)परिच्छिन्नाद्वितीयशुद्धप्रत्यगात्मानुभवस्सम्यग्भूयात् ।

स्वप्ने स्थूलशरीराभावेऽपि सुषुप्तौ सूक्ष्मशरीराभावेऽपि समाधौ कारणशरीराभावेऽप्यवस्थात्रयेऽपि यश्चिद्रूपात्मा मणिसूत्रमिवानुस्यूततया निरन्तरं भासते स चिद्रूपात्मैवाहमस्मीत्यव(न्व)यव्यतिरेकाभ्यां शरीरत्रयव्यावृत्तिं तत्साक्षिचैतन्यस्यानुवृत्तिं च पश्यतो मम शरीरत्रयव्यतिरिक्तात्मानुभवस्सम्यग्भूयात् ।

**End :**

यस्य प्रसादादहमेव विष्णुर्मय्येव सकलं परिकल्पितं चेत्यात्मस्वरूपमहं विजानामीत्यस्य श्रीगुरोः पादारविन्दयोरचञ्चला भक्तिर्नि(रन्त)रं भूयात् ।

निरुपमनिगमान्तैर्नेति नेतीतिवाक्यै-
र्निरवधिकसुखाब्धौ नित्यमानन्दयामः ।

आहोवा(यदुत) किमिति पक्षे भेदबुद्धिर्जनानां
निमिषमपि मतिर्मे निष्कले किं न यातात् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पादपूज्याशिष्यश्रीमच्छङ्कराचार्यविरचित एकादशोत्तरशतवाक्यग्रन्थस्समाप्तः ॥

## No. 4572. कर्माकर्मविवेकनौका.

## KARMĀKARMAVIVĒKANAUKĀ.

Page, 1. Lines, 7 on a page.

Begins on fol. 30*b* of the MS. described under No. 4390.

A work explaining in detail the distinction between Karma and Brahman.

Incomplete.

**Beginning:**

नीरन्ध्रनीरसाविद्याकर्मारण्यदवानलम् ।
आत्मारामं हरिं वन्दे त्रिपान्नारायणाभिधम् ॥

नत्वा गुरुमविद्योत्थकर्माब्धिं तर्तुमिच्छताम् ।
कर्माकर्मविवेकाख्यनौकेयं क्रियते दृढा ॥

अकर्मप्रत्यगद्वैतत्रिपान्नारायणात्मनि ।
कर्मत्रयात्मिकाविद्या कल्पिता व्योम्नि नैल्यवत् ॥

भिद्यते सा पुनर्द्वेधा समष्टिव्यष्टिभेदतः ।
मूलाविद्या समष्ट्याख्या व्यष्टिस्तूलाभिधा मता ॥

**End:**

मूलाविद्यातुर्यभागो निवृत्तिज्ञानलक्षणः ।
शिष्टं भागत्रयं तस्याः प्रवृत्त्यज्ञानलक्षणम् ॥

मूलाविद्यासमारोपाधिष्ठा.

## No. 4573. कुतर्कखण्डनम्.

## KUTARKAKHAṆḌANAM.

Substance, palm-leaf. Size, 13½ × 1⅛ inches. Pages, 36. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

An Advaitic tract criticising unfavourably the Dvaita interpretation of certain Vedântic passages having an obvious Advaitic meaning.

**Beginning:**

प्रणम्य नृहरिं ब्रह्म वादिनां विजयो यथा ।
कुतर्कखण्डनं कुर्वे लक्ष्य . . . . . ॥

इह खल्वेकमेवाद्वितीयं, नेह नानास्ति किञ्चन, ब्रह्मविदाप्नोति परं, तरति शोकमात्मविदित्यादि(श्रुतिपर्या)लोचनायामद्वितीयब्रह्मज्ञानमेव मोक्षसाधनमित्यवगम्यते । तस्मादद्वितीयब्रह्मज्ञानाय वेदा(न्तविचा)रः कर्तव्य इति श्रोतव्यश्रुत्यनुसारिणो वेदान्तिनः प्राहुः । तदपरे न क्षमन्ते—लक्षणप्रमा(णयोर्मिथ्यात्वा)दस्य पारमार्थिकत्वेन अद्वितीयब्रह्मज्ञानस्य दुस्सम्पादत्वादिति ।

**End:**

प्रत्युत नेदं रजतमिति ज्ञानस्यैव रजतप्रतियेगिकविरहैकस्वभावविषयकतया प्रतियोगिज्ञानाधनिज्ञानत्वेन उपजीव्यज्ञानबाधकत्वानुपपत्तेः उपजीव्यरजतज्ञानस्यैव बाधकत्वेन स्वीकार्यत्वाच्च । तस्मान्न ज्ञानयोः पौर्वापर्यम्.

---

## No. 4574. गीतारहस्यार्थदर्पणः.

## GĪTĀRAHASYĀRTHADARPAṆAḤ.

Substance, paper. Size, 8½ × 6¾ inches. Pages, 25. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Ānandatāratamyakhaṇḍana 15*a*

An attempt to bring out the inner meaning of the Bhagavadgītā in the light of Advaita-Vēdānta.

**Beginning :**

श्रीभगवद्गीता तावद्भगवता श्रीकृष्णेन अर्जुनं प्रत्युपदिष्टा अष्टादशाध्यायपरिमिता चेत्येतत्सुप्रसिद्धमेव । तत्र तावत् प्रथमाध्यायोऽर्जुनविषादप्रतिपादकः । तस्य(।) एतस्यास्तु अध्ययने तदर्थग्रहणे तच्छ्रुतिजन्यज्ञानतत्फलावाप्तौ च [तु] अधिकारी स(द)सद्विवेकी अधर्मभीरुश्च ऐहिकामुष्मिकसुखविमुखः शमादिषट्कसम्पन्नः मुमुक्षुरेवेति निर्धारयितुं ब्रह्मविद्याश्रोतर्यर्जुने सदसद्विवेचनम् अधर्मभीरुत्वम् ऐहिकामुष्मिकसुखवैमुख्यं शमादिसम्पत्तिं च प्रदिशन् निर्धारयितुं प्रथमाध्याय आरभ्यते । द्वितीयाध्याय(स्सा)ङ्ख्ययोगप्रतिपादकः । सदसद्विवेकेन तज्जनिततीव्रवैराग्येण मुमुक्षया च सन्न्यस्तसर्वकर्मणः मोक्षैककामस्य ब्राह्मणस्य सदसद्विवेकादिसाधनसम्पत्सिद्धेः ।

**End :**

नैष्कर्म्यसिद्धिलक्षणं यज्ञस्य कर्मणश्च कर्तुश्च बुद्धेर्धृतेश्च सुखस्य च सात्त्विकत्वं राजसत्वं तामसत्वं च ब्राह्मणादीनां कर्माणि च । तैः प्रसन्नान्तःकरणस्य च ज्ञानं तद्वतो यतेः ज्ञाननिष्ठां च परमात्मस्वरूपवेदनप्रकारं ब्रह्मप्राप्तिं च एवमादिकं सर्वस्य गीताशास्त्रस्य सर्वोपनिषदां च अर्थं सर्वं सङ्गृह्य एकत्र प्रतिपादयितुमष्टादशाध्याय आरब्धः ॥

## No. 4575. गुणत्रयविवेकः.

## GUṆATRAYAVIVĒKAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 31*a* of the MS. described under No. 4390.

A work which explains the nature of the three 'qualities' of Sattva, Rajas and Tamas. Herein the author comes to the con-

clusion that this world is only a manifestation of these three qualities and is hence unreal, and that the supreme Brahman, who is alone real, can be reached by realising the identity of the individual soul with the Brahman.

By Svayaṁprakāśēndra, pupil of Vāsudēvēndra.

**Beginning:**

नत्वा वक्ष्ये रामचन्द्रं निर्गुणावाप्तिहेतुकम् ।
गुणत्रयविवेकाख्यं नृणां निर्गुणलब्धये ॥
श्रीरामचन्द्रे निर्मोये सत्ता सामान्यरूपिणी ।
गुणत्रयात्मिका माया कल्पिता रज्जुसर्पवत् ॥
कालत्रयेऽपि नास्त्येव मायामार्गे परात्मनि ।
तथापि भ्रान्तबुद्धीनां जगद्भाति यथार्थवत ॥
सप्तविंशतिधाभिन्नमायात्रिगुणमाश्रितम् ।
जगच्छ्रीरामचन्द्रस्तु जगन्मायाविलक्षणः ॥

* * * *

गुणत्रयं स्थूलसूक्ष्मविभागेन विविच्यते ।
स्थावरं तामसांशस्स्यात् राजसांशस्तु जङ्गमम् ॥
ब्रह्मादयस्सत्त्वभागा ज्ञानविज्ञानमूर्तयः ।
आदावेकं तमस्त्रेधा भिद्यते व्यवहारतः ॥

**End:**

सप्तविंशतिधाभिन्नमायागुणविकल्पितम् ॥
जगन्मायेति विज्ञाय मायागुणविलक्षणम् ।
त्रिपाद्विभूतिनिलयं रामचन्द्राख्यमद्वयम् ॥
परं ब्रह्माहमस्मीति भावनान्मुच्यते भवात् ।
यो मयोक्तेन मार्गेण मायागुणसमुद्भवम् ॥
विश्वं मिथ्येति विज्ञाय विश्वातीतं निरञ्जनम् ।
परं ब्रह्माहमस्मीति ब्रह्म संपद्यते हि सः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवेन्द्रशिष्यस्वयंप्रकाशेन्द्र-कृतं(तः)गुणत्रयाविवेकस्समाप्तः ॥

No. **4576.** जगन्मिथ्यात्वदीपिका.

JAGANMITHYĀTVADĪPIKĀ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 156. Lines, 8 on a page. Character, Grantha Condition, injured. Appearance, old.

A work treating of the unreality of the phenomenal world: by Rāmēndrayōgin.

Prakaraṇas 1 to 13 complete, 14th incomplete.

**Beginning:**

(यद्भू)षणं सकलभूतचयस्य सृष्टिर्यस्य स्मितं सकलभौ(ति)कसृष्टिरेषा ।
यन्मायया विलसितं जगदिन्द्रजालं तस्मै नमो भगवते (परमेश्वराय) ॥

(यत्र भा)न्ति त(त्र)यस्स्वप्नाः मायाशक्तिविजृम्भिताः ।
प्रबोधावधयस्तस्मै प्रत्यग्बोधात्मने नमः ॥

गुरून् प्रणम्य शिरसा गीर्वाणेन्द्र(मुनीश्वरान्) ।
(रामेन्द्र)योगी तनुते जगन्मिथ्यात्वदीपिकाम् ॥

अस्ति तावत्तात्पर्यनिर्णायकषड्विधलिङ्गोपेतसकलवेदान्तसिद्धमाद्वितीय-मानन्द . . . . . . . . . . . . . . . . . .
नि च ।

उपक्रमोपसंहाराद(व)भ्यासोऽपूर्वता फलम् ।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्ण(ये) ॥

* * * *

**Colophon:**

इति रामेन्द्रयोगिविरचितं ब्रह्माद्वैतप्रकरणं प्रथमम् ॥

**End :**

इत्यद्वितीयप्रकरणं त्रयोदशम् ॥

ननु सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् । आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्—इत्यादिश्रुत्या ब्रह्मणोऽद्वितीयत्वमेव तात्पर्येण प्रतिपाद्यते न जगन्मिथ्यात्वम् ; तत्र मिथ्याशब्दप्रयोगादर्शनादिति चेत् बाढम्—

* * * *

यदुपलब्धौ यदवश्यमुपलभ्यते, तत्त(द्)भिन्नसत्ताकमिति नियमाच्च. ज्ञानोपलब्धौ विषयस्य विषयोपलब्धौ ज्ञानस्याप्युपलभ्यमानत्वात् सर्वं ज्ञानाभिन्नसत्ताकमेवेति ज्ञानाद्वैतसिद्धिः । एवं प्रतियोगिकाले.

## No. 4577. जगन्मिथ्यात्वदीपिका.

## JAGANMITHYĀTVADĪPIKĀ.

Substance, palm-leaf (Śrītāla). Size, $19\frac{3}{8}$ × $1\frac{7}{8}$ inches. Pages, 3 Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Daśaślōkī (with commentary) 3*a*, Śāṇḍilyasūtrabhāṣya 19*a*.

Incomplete.

Same work as the above.

---

## No. 4578. जीवन्मुक्तसञ्चारः.

## JĪVANMUKTASAÑCĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 4559.

On the manner of life of the person who has attained feedom from the bondage of Karma even in this life on earth.

**Beginning:**

सङ्कल्परिपुजालानिच्छित्त्वा ज्ञानासिनात्मनः ।
असङ्कल्पं मनः कृत्वा विचरेदिह नीलयम्(लीलया) ॥
कर्मजालवने न्यस्य ज्ञानवह्निमखण्डितम् ।
निष्क्रियो निर्ममश्शुद्धो विचरेदिह लीलया ॥

**End:**

विस्मृ(स्तृ)त्य बहुभिश्श्लोकैस्तव बोधो यथा भवेत् ।
तथा सत्यं मया प्रोक्तं विचरेदिह लीलया ॥

---

No. **4579.** जीवन्मुक्तिविवेकः.

JĪVANMUKTIVIVĒKAḤ.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 122. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

A work wherein the attainmen of the salvation of self-emancipation is shown to be possible even in this life; by Vidyāraṇya.

This manuscript is stated to have belonged to Kōri-Veṅgaṇṇa-nāyakkan.

**Beginning:**

वक्ष्ये विविदिषान्यासं विद्वन्न्यासं च भेदतः ।
हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्रमात् ॥
सन्न्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा ।
प्रव्रजेदिति वेदोक्तस्तद्भेदस्तु पुराणगः ॥
विरक्तिर्द्विविधा प्रोक्ता तीव्रा तीव्रतरेति च ।
सत्यामेव तु तीव्रायां न्यसेद्योगे कुटीचके ॥
शक्तो बहूदके तीव्रतरायां हंससंज्ञिते ।
मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधने ॥

**End:**

तथा च स्मर्यते—

“ ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किञ्चित्कर्तव्यमस्ति चेन्न स तत्त्ववित् ॥”

इति ॥

जीवन्मुक्तिविवेकेन बन्धं हार्दं निवारयन् ।
पुमर्थमखिलं देयाद्विद्यातीर्थमहेश्वरः ॥

**Colophon:**

इति जीवन्मुक्तिविवेकस्समाप्तः ॥

## No. **4580.** जीवन्मुक्तिविवेकः.

JĪVANMUKTIVIVĒKAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 24. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Vidvatsannyāsanirūpaṇa alone complete.

Same work as the above.

---

## No. **4581.** ज्ञानतारावली.

JÑĀNATĀRĀVALĪ.

Pages, 3. Lines, 23 on a page.

Begins on fol. 21*a* of the MS. described under No. 1021.

Complete.

A collection of some original stanzas on the identity of the individual soul and the Supreme Soul.

By Cidrūpānandanātha otherwise called Śridēśikavaranarasiṁha.

**Beginning:**

यत्तु चराचरकारणमुपासते यन्मुमुक्षवस्सर्वे ।
येन प्रपूरितमिदं यस्मै कृतिमन्मनः प्रजागर्ति ॥

यस्मात्परामृताप्तिर्यस्य विकासादजाण्डसम्भूतिः ।
यस्मिन् विलीनमखिलं तदहमनिर्वाच्यमाश्रये किमपि ॥
आत्मन्ययि पश्य स्वं त्वदभिन्नत्वेन दृश्यते सर्वम् ।
यदासि त्वमस्ति सर्वं नासि यदा(दि)त्वं तदेव तदभावः ॥

**End:**

सर्वेषु चिदचिदात्मसु वस्तुषु सर्वत्र पूर्णतां पश्यन् ।
परमानन्दसुधाब्धौ स्वैरं त्वं विहर सर्वदा चात्मन् ॥
एषा संविल्लहरी तारावलिरस्तु तारणे दक्षः ।
तारावलिपतिशावकचूडस्य कृपावलोकनात्पुंसाम् ॥

**Colophon:**

इति श्रीदेशिकवरनरसिंहाख्यश्रीचिद्रूपानन्दनाथकृतौ ज्ञानतारावलि-स्समाप्ता ॥

---

## No. 4582. ज्ञानानुष्ठानप्रकरणम्.

## JÑĀNĀNUṢṬHĀNAPRAKARAṆAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 29*a* of the MS. described under No. 4559.

Incomplete.

On the practice of the wisdom of dispassion and renunciation.

**Beginning:**

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च ।
द्रष्टारश्चेत्कल्पयन्तु किं मे स्यादस्य कल्पना ॥
गुञ्जापुञ्जादि दह्येत नान्यारोपितवह्निना ।
नान्यारोपितसंसारधर्मानेवमहं भजे ॥

**End:**

नोदकैर्जायते सन्ध्या मन्त्रेणोच्चारणं न तु ।
सन्धीयते परे तत्त्वे सा सन्ध्या सन्धिरुच्यते ॥

## No. 4583. तत्त्वकौस्तुभः.

## TATTVAKAUSTUBHAḤ.

Substance, palm-leaf. Size, 16⅓ × 1⅜ inches. Pages, 21. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

This pamphlet is in support of the Advaita school and criticises unfavourably the Dvaita view of the Vēdānta; by Bhaṭṭōji-dīkṣita.

This work is said to have been undertaken at the instance of Kērali Vēṅkaṭēndra.

The first Prakaraṇa complete.

**Beginning:**

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्ति व(ब)रीव(भ)र्ति सञ्जरीहर्ति लीलया ॥
केरळि(ली)वेङ्कटेन्द्रस्य निदेशाद्विदुषां मुदे ।
ध्वान्तोच्छित्त्यै पटुतरस्तन्यते तत्त्वकौस्तुभः ॥
परि(फणि)भाषितभाष्याब्धेश्शब्दकौस्तुभ उद्धृतः ।
शाङ्करादथ भाष्याब्धेस्तत्त्वकौस्तुभमुद्धरे ॥

इह खलु केचित्पाञ्चरात्राद्यागमांस्तदनुसारिपुराणभागांश्चोपजीव्य तदधिकारित्वमव(ना)लोचयन्तः श्रौतस्मार्तमार्गं परित्यजन्ति, त्याजयन्ति च तान् सम्यक्छिक्ष(क्ष)यितुम् । तत्राद्यधिकारी तावन्निरूप्यते । अत्रायं सिद्धान्तः—

शापाद्वा गौतमादीनां पापाद्वा महतो नराः ।
ये गता वेदबाह्यत्वं ये च सङ्कीर्णयोनयः ॥
ते च क्रियन्ते तन्त्रादौ स्त्रीशूद्राश्च यथायथम् ।

तथा चाह कौर्मे चतुर्दशाध्याये—

तेषां मायावशाज्जातं गोवधं गौतमो मुनिः ।
केनापि हेतुना ज्ञात्वा शशापातीव कोपनः ॥

See under the next number for the end.

## No. 4584. तत्त्वकौस्तुभः.

## TATTVAKAUSTUBHAḤ.

Substance, palm-leaf. Size, 12 × 1⅓ inches. Pages, 40. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 8*a*. The other work herein is Kaliviḍambana 1*a*.

Breaks off in the second Paricchēda.

Same work as the above.

See under the previous number for the beginning.

**End:**

पिशाचीभाषया पिशाचीं बोधयितुं दिङ्मात्रमुक्तम्; न तु वास्तवाभिप्रायेणापीति क्षन्तव्यमे(वे)तीदं साहसिकत्वं गुणग्रा(गृ)ह्यैस्सूरिभिः ॥

**Colophon:**

इति तत्त्वकौस्तुभे प्रथमः परिच्छेदः ॥

द्वितीये तु परिच्छेदे मध्वाधिकरणस्थितिः ।
प्रदृश्य(दर्श्य)ते खण्ड्यते च प्रायशो विदुषां मुदे ॥

अथातो ब्रह्मजिज्ञासा—

वेदान्तशास्त्रं नारम्भणीयम्; विषयाभावात् ।

* * * *

तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि ।
देहात्मबुद्ध्या भूतानि भेदेनाज्ञो नु पश्यति ॥

स्कान्दे सूतसंहितायां षोडशाध्याये—

ब्रह्मविष्णुमहेशाख्या(:) शिवत्वेन रता अपि ।
परमात्मविभागेस्था न जीवव्यूहसंस्थिताः ॥

ब्रह्मविष्णुमहेशानास्तथा तेषां द्विजर्षयः ।
आविर्भावविशेषाणां पुण्यपापादयो न हि ॥ इति ॥

तस्माद्द्वैतसिद्धान्तावलम्बनमपहाय श्रुतीनामेकवाक्यता दुरुपपादेति स्थितम् ॥

---

## No. 4585. तत्त्वबोधः.

## TATTVABŌDHAḤ.

Pages, 7. Lines, 16 on a page.

Begins on fol. 7*a* of the MS. described under No. 2118.

This work gives a brief summary of Advaita-Vēdānta; by Vāsudēvēndra.

Complete.

**Beginning:**

वासुदेवेन्द्रयोगीन्द्रं नत्वा ज्ञानप्रदं गुरुम् ।
मुमुक्षूणां यथार्थाय तत्त्वबोधो विधीयते ॥

साधनचतुष्टयसम्पन्नाधिकारिणां मोक्षसाधनीभूततत्त्वविवेकप्रकारं वक्ष्यामः । साध(न)चतुष्टयं कीदृशमिति चेत्—नित्यानित्यविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वं चेति ।

**End:**

तस्मात्कारणात् ज्ञानी देहीं गङ्गायां वा चण्डालवाटिकायां विस्मृतिं प्राप्य पतति । ज्ञानानन्दं प्राप्तं तदेव सकलकर्मभ्यस्तीर्त्वा मुक्तस्सन् आनन्दो भूत्वा कृतार्थो भवति ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वासुदेवेन्द्रस्वामिकृतं तत्त्व-
बोधाख्यप्रकरणं सम्पूर्णमगमत् ॥

No. **4586.** तत्त्वम्पदार्थलक्ष्यैक्यशतकम्.

TATTVAṀPADĀRTHALAKṢYAIKYAŚATAKAM.

Pages, 10. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 4390.

Complete.

A work consisting of 100 of stanzas in praise of the Supreme Being, and incidentally establishing the identity of the things denoted by Tat and Tvam in the famous Upaniṣadic sentence Tattvamasi: by Rāmacandra, a pupil of Vāsudēvēndra.

**Beginning:**

अविद्यापादसर्वस्वध्वान्तमध्याह्नभास्करम् ।
प्रत्यक्परैक्यदातारं नौमि रामनिशाकरम् ॥

नत्वा गुरुपदं प्रत्यक्परमात्मैक्यमिच्छताम् ।
तत्त्वंपदार्थलक्ष्यैक्यशतकं क्रियते स्फुटम् ॥

निर्मायं ब्रह्मतारार्थं प्रत्यक्परचिदात्मकम् ।
सदा विजयते ब्रह्म त्रिपान्नारायणाभिधम् ॥

त्रिपान्नारायणे तुर्यतुरीये स्वेतरासहे ।
तत्स्वरूपाज्ञानदृग्भिर्मायापादः प्रकल्पितः ॥

**End:**

प्रत्यक्परचितोरैक्यात्साम्यतुर्यपदात्मकम् ।
मायारोपापवादादिदोषास्पृष्टमखण्डितम ॥

विभागकलनाशून्यं सत्तासामान्यचित्सुखम ।
त्रिपान्नारायणाख्यं तत्तुर्यतुर्यं विशिष्यते ।

यस्तत्त्वंपदलक्ष्यैक्यशतकार्थं गुरोर्मुखात् ।
आदराद्वेत्ति स मुनिस्तुर्यतुर्यपदं व्रजेत् ॥
श्रीवासुदेवेन्द्रशिष्यरामचन्द्रेन्द्रयोगिना ।
तत्त्वंपदगलक्ष्यैक्यशतकं सुखदं कृतम् ॥

---

## No. 4587. तत्त्वविवेकः.

## TATTVAVIVĒKAḤ.

Pages, 112. Lines, 6 on a page.

Begins on fol. 92*a* of the MS. described under No. 4524.

A critical dissertation on the Advaita-Vēdānta, in two Paricchēdas; by Nṛsiṁhāśramamuni, a pupil of Jagannāthāśrama.

Complete.

**Beginning**:

विश्वस्य योनिं विश्वेशं विज्ञानानन्दविग्रहम् ।
नरकेसरिणं वन्दे प्रत्यञ्चं पुरुषोत्तमम् ॥

साक्षात्कृतब्रह्मभासा प्रहसन्मुखपङ्कजम् ।
महीयांसमहं वन्दे गरीयांसं जगत्पतिम् ॥

गुरुणा करुणापूर्वमुपादिष्टाद्वयात्मनः ।
कुर्वे तत्त्वविवेकं तं वीक्ष्यतां नरकेसरी ॥

इह खलु कश्चिद्विपश्चित् कुतश्चिद्भाग्योदयान्निर्व्यळीकनित्यादिभिराराधिताराध्यपादानुग्रहादतिविमलमानस(:)स्वयमेवेत्थं जगत्तत्त्वमालोचयति । ननु कर्मणां स्वतन्त्रफलसाधनानां कथं मनोवैमल्यहेतुत्वम्? तथा च संस्कारकर्मतापत्तिरिति चेत् न तावदर्थविरोधः; नित्यादीनां पापनिवर्तनस्वभावत्वात्, ब्रह्मज्ञानोपकारकत्वेऽपि गुणकर्मतानङ्गीकारेण कर्मणा पितृलोक इति श्रुत्यवगतस्वतन्त्रफलसाधनत्वाविरोधाच्च ॥

**End:**

अत एव तस्या उद्देश्यत्वम्; नित्यसिद्धाविद्यानिवृत्तेरप्यभावप्रमाद-शायां लोके तदुपपत्तेः । तस्मात् सिद्धं जीवस्याद्वैतब्रह्मसाक्षात्कारात् भेदभ्रमनिवृत्त्या सच्चिदानन्दावाप्तिरिति ॥

जिज्ञासितव्यमनवद्यपुमर्थचित्तैः प्रज्ञासुखं स्वमहिमानवशेषयोनिम् ।
शास्त्रैकहृद्गतमशेषविधेयशेषि श्रेयोऽस्तु नो नरमृगाकृति मङ्गळाब्धिः ॥

तुष्यन्त्यव्यक्तवचसा मुग्धस्य पितरो ननु ।
मम त्वत्प्रीतये भूयाद्वाणीयं नरकेसरिन् ! ॥

काहं महीयसाशास्यं वात्सल्यं क गुरोरिदम् ।
अपि चण्डालकलशे काशते खलु भास्करः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यजगन्नाथाश्रमपूज्यपादशिष्यश्रीनर-सिंहाश्रममुनिविरचिते तत्त्वाविवेके द्वितीयः परिच्छेदः ॥

दलितद्वैतिदर्पौघे दातरि ज्ञानसम्पदाम् ।
ग्रन्थे तत्त्वविवेकाख्ये परिच्छेदद्वयं गतम् ॥

## No. 4588. तत्त्वविवेकः.

## TATTVAVIVĒKAḤ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 12. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

The first Paricchēda incomplete.

Begins on fol. 103*a*. The other work herein is Tattvavivēcanī 1*a*.

Same work as the above.

## No. 4589. तत्त्वविवेकदीपनम्.

## TATTVAVIVĒKADĪPANAM.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 216. Lines, 8 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

A commentary on the Tattvavivēka of Nṛsiṁhāśramamuni: by himself.

**Beginning:**

यदालिङ्ग्य प्रमाणानि बोधयन्त्यात्मनः स्फुटम् ।
प्रमेयं प्रचुरानन्दं तं वन्दे नृहरिं गुरुम् ॥

प्रेक्षावत्प्रवृत्त्यङ्गमभिधेयादि दर्शयन्नेव निर्विघ्नपरिसमाप्तिकामनया कृतं मङ्गळं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—विश्वस्येति । प्रत्यञ्चं पुरुषोत्तमं वन्द इत्यनेन जीवब्रह्माभेदः तत्त्वमस्यादिवाक्यार्थप्रकरणप्रतिपाद्यो दर्शितः । प्रत्यञ्चं जडानृताहङ्कारादिभ्यः प्रातिकूल्येन सत्यज्ञानानन्दस्वरूपतयाञ्चति प्रकाशत इति निष्कृष्टाहङ्कारादिचैतन्यं प्रत्यक् तदनेन शोधित(त)त्वंपदार्थ उक्तः ।

**End:**

स्वकृतिं परमेश्वराय निवेदयति—तुष्यन्तीति ।

स्वस्येदं सामर्थ्यं गुर्वायत्तमिति दर्शयन् गुरुं महीकरोति—काहमिति ।

यदीक्षणेन सन्नुन्नं मायाविक्रीडितं जगत् ।
श्रीनृसिंहस्य तस्यैषा कृतिः कल्याणदास्तु वः ॥

अरुचिरिह न कार्या साधवस्साध्वसाधु-
प्रकटनपटु चेतो मत्सरं वो यदि स्यात् ।
न हि कुशलपरीक्षादत्तचित्ताः कथञ्चि-
च्छतमखमणिमालां काचबुद्ध्योत्सृजन्ति ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यजगन्नाथाश्रमपूज्यपादशिष्यश्रीनृसिंहाश्रममुनिविरचिते तत्त्वविवेकदीपने द्वितीयः परिच्छेदः ॥

## No. 4590. तत्त्वविवेकदीपनम्.

## TATTVAVIVĒKADĪPANAM.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 292. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Tattvavivēkadīpana is also called Advaitaratnakōśa here.

Complete.

Same work as the above

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्यश्रीनरसिंहाश्रममुनिविरचिते अद्वैतरत्नकोशाख्ये तत्त्वविवेकदीपने द्वितीयः परिच्छेदः ॥

समाप्तश्चायं ग्रन्थः ॥

---

## No. 4591. तत्त्वविवेचनी.

## TATTVAVIVĒCANĪ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 354. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

This is a brief commentary on the Tattvavivēka of Nrsiṁhāśramamuni; by Agnihōtra, son of Dvādaśāhējya, disciple of Jnānēndrasarasvatī.

**Beginning :**

यदीक्षा जगदुत्पत्तिस्थितिसंहारकारणम् ।
यदात्मकमिदं वन्दे श्रीरामं तं पद(त)शालिम् ॥

ज्ञानेन्द्रापरनामानं दक्षिणामूर्तिदैवतम् ।
वासुदेवादिसाच्छिष्यं नमामि परमं गुरुम् ॥

भक्तभीतिकरं रूपं त्यक्त्वा रूपान्तरं श्रितम् ।
वासुदेवाभिदं(धं) सौम्यं पद(त)ञ्जलिमहं भजे ॥

श्रीज्ञानेन्द्रकृपापात्रं कृत्स्नतन्त्रविवेचकम् ।
श्रीमद्दण्डनृसिंहाख्यं सूरिं सङ्कलये गुरुम् ॥

नत्वा गुरून् नयस्मर्तॄन् द्वादशाहेज्यसूनुना ।
विविच्यतेऽग्निहोत्रेण टीका तत्त्वविवेचनी ॥

नृहरिमिति विग्रहविशेषोपहितस्वेष्टदेवतावाचकपदेन जगत्कारणं ब्रह्म लक्षयति । गुरुं नृहरित्वेनोपास इत्यर्थः । गुरौ देवतात्वभावनायाः फल-वत्त्वेन श्रवणात् । यद्वा नृशब्देन पुरुषवाचिना सर्वभूतान्युच्यन्ते ॥

* * * *

**Colophon:**

इति श्रीज्ञानेन्द्रसरस्वतीश्रीचरणारविन्दनिरन्तरनिषेविणा श्रीरामा-न्वयप्रसूतद्वादशाहेज्यसूनुनाग्निहोत्रमनीषिणा विरचितायां तत्त्वविवेकटिप्प-ण्यामद्वैतरत्नकोशपूरण्यामाद्यः परिच्छेदः ॥

दिगन्तरलुठत्कीर्तेर्लोकनाथसुधीशितुः ।
सुतस्य पुस्तकं भावि वेङ्कटेशविपश्चितः ॥

**End:**

नोपासनाविधिपरत्वमिति ब्रह्मपरतैवेत्येवंरूपस्येत्यर्थः । जिज्ञासादि . . . . . . दानुवचनेनेति श्रुतेरिति भावः । नृसिंहेति तदेव लीला श्रीनृसिंहाकृत्युपहितमित्यर्थः । तथा च नरमृगाकृतिपद-स्याभिधे.

## No. 4592. तत्त्वविवेचनी.
## TATTVAVIVĒCANĪ.

Pages, 204. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4588.

The first leaf is lost.

Same work as the above.

Incomplete.

---

## No. 4593. तत्त्वविषयकम्.
## TATTVAVIṢAYAKAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 57*b* of the MS. described under No. 757.

Incomplete.

On the Sāṅkhya view of the problem of the evolution of the universe.

**Beginning :**

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

ओङ्कारम्(:) । अथ प्रकृतिः । प्रकृतेर्महान् । महतोऽ(ह)ङ्कारः । अहङ्कारात्पञ्च तन्मात्राणि—शब्दस्पर्शरूपरसगन्धाः । पञ्च विषया(यी)णि । पृथिव्यादयश्च परमात्मनः समुत्पन्ना(:) । तत्र श्रुतिः—तस्माद्वा एतस्मादात्मन आकाशस्सम्भूतः ।

**End :**

वागध्यात्मं वक्तव्यमधिभूतमग्निस्तत्राधिदैवतम् ।
हस्तमध्यात्ममादातव्यमधिभूतमिन्द्रस्तत्राधिदैवतम् ।
पादमध्यात्मं गन्तव्यमधिभूतं विष्णुस्तत्राधिदैवतम् ।
पायुरध्यात्मं विसर्जितव्यमधिभूतं मित्रस्तत्राधिदैवतम् ।
गुह्यमध्यात्ममानन्दमधिभूतं प्रजापतिस्तत्राधिदैवतम् ।

## No. 4594. दशश्लोकी.

## DAŚAŚLŌKĪ.

Substance, palm-leaf. Size, $9\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 3. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 47*a*. The other work herein is Daśaślōkī-vyākhyā 1*a*.

Ten Ślōkas in which Śaṅkarācārya has explained the nature of the Ātman or 'soul' by the process of elimination.

Complete.

**Beginning:**

न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः ।
अनैकान्तिकत्वात्सुषुप्त्येकसिद्धस्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥

**End:**

न चैकं तदन्यद्द्वितीयं कुतस्स्यान्न वा केवलत्वं न चाकेवलत्वम् ।
न शून्यं न चाशून्यमद्वैतकत्वात्कथं सर्ववेदान्तसिद्धं ब्रवीमि ॥

**Colophon:**

दशश्लोकी समाप्ता ॥

---

## No. 4595. दशश्लोकी.

## DAŚAŚLŌKĪ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 64*a* of the MS. described under No. 2830.

Same work as the above.

Complete.

---

## No. 4596. दशश्लोकी.

## DAŚAŚLŌKĪ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 34*a* of the MS. described under No. 200.

The first 5 Ślōkas are wanting.

Same work as the above.

## No. 4597. दशश्लोकी.

## DAŚAŚLŌKĪ.

Pages 2. Lines, 8 on a page.

Begins on fol. 61*b* of the MS. described under No. 276.

Nine ślōkās only complete.

Same work as the above.

## No. 4598. दशश्लोकी.

## DAŚAŚLŌKĪ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 29*a* of the MS. described under No. 2645.

Same work as the above.

Complete.

## No. 4599. दशश्लोकी–सिद्धान्ततत्त्वबिन्दुसहिता.

## DAŚAŚLŌKĪ WITH SIDDHĀNTATATTVABINDU.

Substance, paper. Size, $12\frac{1}{8} \times 6$ inches Pages, 45. Lines, 14 on a page. Character, Dēvanāgarī. Condition, fair. Appearance, old.

Complete.

Same as the above with the commentary of Madhusūdanasarasvatī called Siddhāntatattvabindu.

**Beginning :**

श्रीमदाचार्यपादारविन्दद्वन्द्वमिहाश्रये ।
सिद्धान्तबिन्दुं विलिखाम्यविद्योत्तापनुत्तये ॥
श्रीशङ्कराचार्यनवावतारं विश्वेश्वरं विश्वगुरुं प्रणम्य ।
वेदान्तशास्त्रश्रवणालसानां बोधाय कुर्वे कमपि प्रबन्धम् ॥

इह खलु साक्षात् परम्परया वा सर्वाञ्जीवानुद्दिधीर्षुर्भगवान् श्रीशङ्करोऽनात्मभ्यो विवेकेन आत्मानं नित्यशुद्धबुद्धमुक्तस्वभावं सङ्क्षेपेण

बोधयितुं दशश्लोकीं प्रणिनिनाय । नन्विदङ्कारास्पदेभ्यो विवेकेनाहङ्कारास्पदमात्मानं सर्वो लोकोऽहमस्मीति प्रत्येति । दुःखं चानुभवति ।

* * * *

एवं स(ा)मान्यतोऽहम्प्रत्ययसिद्धे चिदात्मनि वादिविप्रतिपत्तिभिस्सन्दिग्धेऽहम्प्रत्ययस्यालं(लम्ब)नविशेषनिर्णयायाह भगवान् श्रीशङ्कराचार्यः—

न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा (न) तेषां समूहः ।
अनैकान्तिकत्वात्सुषुप्त्येकसिद्धस्तदेकोऽवसि(शि)ष्टः शिवः क(केव)लोऽहम् ॥

अस्यार्थः—

अहमहंप्रत्ययालम्बनमेकोऽद्वितीयोऽवशिष्टस्सर्वद्वैतबाधेऽप्यबाधितश्शिवः परमानन्दबोधस्तस्यैव मङ्गलरूपत्वात्केवलो निर्धर्मकस्तेनाद्वितीयः सर्वप्रमाणाबाध्यः परमानन्दबोध एवाहंप्रत्ययालम्बनमित्यौपनिषदपक्ष एव श्रेयानित्यर्थः । एतदुपपादनायेतरवादिमतानि निराकरिष्यन् प्रथमं देहात्मवादं निराकरोति—न भूमिर्न तोयं न तेजो न वायुर्न खमिति ।

**End :**

तदेवं वेदान्तवाक्यजन्याखण्डाकारवृत्त्याविद्यानिवृत्तौ तत्कल्पितसकलानर्थनिवृत्तौ परमानन्दरूपस्सन् कृतकृत्यो भवतीति सिद्धम् ॥

न स्तौमि तं व्यासमशेषमर्थं सम्यङ्न सूत्रैरपि यो बबन्ध ।
विनापि तैस्सङ्ग्रथिताखिलार्थं शंत(तं श)ङ्करं नौमि सुरेश्वरं च ॥

लघुरपि बह्वर्थवहश्चिन्तामणिरिव निबन्धोऽयम् ।
मधुसूदनेन मुनिना विहितो गुणिनां विनोदाय ॥

यदत्र सौष्ठवं किञ्चित्तद्गुरोरेव मे न हि ।
यदत्रासौष्ठवं किञ्चित्तन्ममैव गुरोर्न हि ॥

बहुयाचनया मयायमल्पो बलभद्रस्य कृते कृतो निबन्धः ।
यददुष्टमिहास्ति यच्च दुष्टं तदुदारास्सुधियो विचारयन्तु ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरभगवत्पादशिष्यश्रीमन्मधुसूदनमुनिवराविरचितास्सिद्धान्ततत्त्वाबिन्दुस्समाप्तः ॥

## No. 4600. दशश्लोकी–सिद्धान्ततत्त्वबिन्दुसहिता.

## DAŚAŚLŌKĪ: WITH SIDDHĀNTATATTVABINDU.

Pages, 42. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 534.

Complete.

Same work as the above.

## No. 4601. दशश्लोकी–सिद्धान्ततत्त्वबिन्दुसहिता.

## DAŚAŚLŌKĪ: WITH SIDDHĀNTATATTVABINDU.

Pages, 92. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4594.

Complete.

Same work as the above.

## No. 4602. दशश्लोकी–सिद्धान्ततत्त्वबिन्दुसहिता.

## DAŚAŚLŌKĪ: WITH SIDDHĀNTATATTVABINDU.

Pages, 22. Lines, 10 on a page.

Begins on fol. 3*a* of the MS. described under No. 4577.

Same work as the above.

## No. 4603. दशश्लोकी–सिद्धान्ततत्त्वबिन्दुसहिता.

## DAŚAŚLŌKĪ: WITH SIDDHĀNTATATTVABINDU.

Pages, 51. Lines, 7 on a page.

Begins on fol. 3*a* of the MS. described under No. 2645

Complete.

Same work as the above.

---

## No. 4604. दशश्लोकी–सिद्धान्ततत्त्वबिन्दुसहिता.

## DAŚAŚLŌKĪ: WITH SIDDHĀNTATATTVABINDU.

Substance, paper. Size, 9½ × 12 inches. Pages, 42. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Nyāyaratnāvalī (Siddhāntabinduṭīkā) 22*a*.

Complete.

Same work as the above.

---

## No. 4605. दृग्दृश्यविवेकः. ✓

## DṚGDṚŚYAVIVĒKAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 3*a* of the MS. described under No. 4552.

A short and easy treatise on the doctrines of the Advaita-Vēdānta with particular reference to the nature of the seen object and of the vision of the seeing soul; by Śaṅkarācārya.

Complete.

**Beginning:**

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुरिन्द्रो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

दृश्यं सर्वमनात्मा स्याद्दृगेवात्मविकारिणी ।
आत्मानात्मविवेकोऽयं कथितो ग्रन्थकोटिभिः ॥

**End:**

प्रातिभासिकजीवस्य लये स्युर्व्योवहारिकी(के) ।
तल्लये सच्चिदानन्दाः पर्यपश्य(वस्य)न्ति साक्षिणि

**Colophon:**

इति दृग्दृश्यविवेकस्समाप्तः ॥

## No. 4606. दृग्दृश्यविवेकः.

### DṚGDṚŚYAVIVĒKAḤ.

Pages, 6. Lines, 8 on a page.

Begins on fol. 104*a* of the MS. described under No. 4337. Complete.
Same work as the above.

---

## No. 4607. दृग्दृश्यविवेकः—सव्याख्यः.

### DṚGDṚŚYAVIVĒKAḤ: WITH COMMENTARY.

Substance, paper. Size, $8\frac{3}{8} \times 5\frac{3}{8}$ inches. Pages, 31. Lines, 7 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 41*a*. The other work herein is Dattaratnapradīpa 1*a*.

This commentary is different from the commentary noticed under the next number.

**Beginning:**

रूपं दृश्यं लोचनं दृङ्न दृश्यं दृक् च मानसम् ।
दृश्या धीवृत्तयस्साक्षी दृगेव न तु दृश्यते ॥

तत्र तावद्भगवान् शङ्कराचार्यः अविद्याविषधरमुषितप्रबोधस्य जगतोऽनुग्रहाय वाक्यसुधां नाम शास्त्रसङ्ग्रहं चकार—रूपमिति । रूपं दृश्यमेव भवति । तत्र लोचनं दृक् पश्यतीति दृक् लोचनं दृश्यमेव भवतीति ; तत्र मानसं दृग्दृश्यम् ।

**End:**

प्रातिभासिकजीवस्य लये स्युर्व्यावहारिके ।
तल्लये सच्चिदानन्दाः पर्यवस्यन्ति साक्षिणि ॥
यत्तु वाक्यसुधामेतां विवृत्य विशदैः पदैः ।
पुण्यं मयार्जितं किञ्चित्तद्ब्रह्माणि समर्पितम् ॥

यथा प्रातिभासिकस्य जीवस्य लये सच्चिदानन्दा व्यावहारिके पर्यवस्यन्ति । तल्लये व्यावहारिकलये साक्षिणि पर्यवस्यन्तीति सिद्धम् ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यविरचितं वाक्यसुधाप्रकरणं सम्पूर्णम् ॥

---

No. **4608.** दृग्दृश्यविवेकः—सव्याख्यः.

DṚGDṚŚYAVIVĒKAḤ WITH COMMENTARY.

**Pages**, 27. Lines, 20 on a page.

Begins on fol. 34*a* of the MS. described under No. 1021.

Complete.

Similar to the above.

From the colophons at the end of this work and the work described under the previous number, it is made out that Vākyasudhā is another name for Dṛgdṛśyavivēka.

**Beginning:**

ज्योतिश्शान्तमनन्तमेकमजरं मायातिगं शाश्वतं
नित्यं निर्विषयं निरन्तरसुखं यत्तत्पदं धीमहि ।

यन्मायागुणसंवृतं त्रिविधतामासाद्य जीवत्रयं
लोके भाति विचारतस्तु सकलं रामान्न किञ्चित्परम् ॥

इह लोके सांसारिकतापत्रयोपतापितान्तःकरणः कश्चित् ब्रह्मलोकादीन् सर्वान् कर्मनिर्मितानित्यानिति ज्ञात्वा तेभ्योऽत्यन्तमुद्विग्नमना निर्दुःखमुक्तिसुखं ब्रह्म ज्ञातुमिच्छुः परमकारुणिकं श्रोत्रियं ब्रह्मनिष्ठं त्यक्ताशेषक्रियं सद्गुरुं प्राप्योपहारपाणिस्सप्रपञ्चं परिपृच्छति—"स्वामिन्! सांसारिकबहुविधदुःखैस्सुखाभासैरात्मसुखसंरोधकैस्तन्मूलभूतात्मानात्मविवेकान्नितरां दुःखितोऽस्मि । अतो ममात्मविषयं विवेकं सम्यगुपदिश" इति विज्ञापितः परमकारुणिकत्वात्सद्गुरुर्वेदान्ततत्त्वं वाक्यसुधाख्यं प्रकरणमुपदेक्ष्यमाण आदौ तद्बुद्धिपरीक्षणार्थं सङ्क्षेपेणोपादिशीत—

दृश्यं सर्वमनात्मा स्याद्दृगेवात्माविकारिणी ।
आत्मानात्मविवेकोऽयं कथितो ग्रन्थकोटिभिः ॥

चक्षुर्मनोबुद्ध्यादीनां यद्यद्दृश्यं तत्तदनात्मा दृश्यत्वात् घटवत्; या दृगिव दृक् दृक्त्वेनैव परिसमाप्ता स आत्मा दृग्रूपत्वात् । सा दृगविकारिणी सर्वविकारशून्या । अनेन सङ्क्षेपप्रकारेण परिणामकोटिद्वयमुक्तमात्मानात्मविवेकं ज्ञातुमर्हसि ।

**End :**

तदा द्वितीयाभावात् केवलं ब्रह्मैव भवति । अयमेव सर्ववेदान्तसिद्धान्तः । एतत्प्रकरणं यस्सम्यगालोचयति स मुमुक्षुस्सन् जीवन्मुक्तो भवति कृतकृत्यो भवति ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पादपूज्यशिष्यश्रीमच्छङ्कराचार्यकृत[ा] वाक्यसुधाटीका समाप्ता ॥

## No. 4609. दृग्दृश्यविवेकः—सव्याख्यः

## DRGDRŚYAVIVĒKAḤ WITH COMMENTARY.

Pages, 9. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 200.

The commentary here is different from the two previous commentaries.

Incomplete.

**Beginning:**

रूपं दृश्यं लोचनं दृक्तद्दृश्यं दृक् च मानसम् ।
दृश्याधिवृत्तयस्साक्षी दृगेव न तु दृश्यते ॥

एवं प्रकारेण प्रतिपाद्यमानमर्थं सङ्क्षिप्य प्रथमश्लोकेन दर्शयित्वा इदानीं प्रथमश्लोकस्य प्रथमपादेन दर्शितमर्थं द्वितीयश्लोकेन स्पष्टयति ।

**End:**

चिदाभासस्थिता निद्रा विक्षेपावृत्तिकारिणी ।
आवृत्य जीवजगति पूर्वे नूले तु कल्पयेत् ॥
प्रतीतकाल एवैते स्थितत्वात्प्रातिभासिके ।
न हि स्वप्नप्र . . . . . . ॥

---

## No. 4610. नैष्कर्म्यसिद्धिः.

## NAIṢKARMYASIDDHIḤ.

Substance, palm-leaf. Size, $17\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 52. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other work herein is Naiṣkarmyasiddhivyākhyā 27*a*.

Complete.

Fol. 26 is missing.

This work lays down that the knowledge of the Brahman is the only means to cause the extinction of Karma and its fruits, and that salvation becomes possible only after the fruits of Karma have become extinct.

By Surēśvarācārya.

**Beginning:**

आब्रह्मस्तम्बपर्यन्तैस्सर्वैः प्राणिभिस्सर्वप्रकारस्यापि दुःखस्य स्वरसत एव जिहासितत्वात् तन्निवृत्त्यर्थो प्रवृत्तिस्स्वरसत एव । दुःखस्य च देहोपादानैकहेतुत्वाद्देहस्य च पूर्वोपचितपुण्यापुण्यमूलत्वादनुच्छित्तिः । तयोश्च विहितप्रतिषिद्धकर्ममूलकत्वादनिवृत्तिः । कर्मणश्च रागद्वेषात्मक(स्पद)-त्वात् रागद्वेषयोश्च शोभनाशोभनाध्यासनिबन्धनत्वात् । अध्यासस्य चाविचारितसिद्धद्वैतवस्तुनिमित्तत्वात् । द्वैतस्य च शुक्तिकारजतादिवत्सर्वस्यापि स्वतस्सिद्धाद्वितीयात्मानवबोधमात्रोपादानत्वात् अव्यावृत्तिः; अतस्सर्वानर्थहेतुरात्मानवबोध एव । सुखस्य च अनागमापायिनोऽपरतन्त्रस्यात्मस्वभावत्वात् तस्यानवबोधः पिधानम् । अतस्तस्यात्यन्तोच्छित्तावशेषपुरुषार्थपरिसमाप्तिः । अज्ञाननिवृत्तेश्च सम्यग्ज्ञानस्वरूपलाभमात्रहेतुत्वात्तदुपादानम् । अशेषानर्थहेत्वात्मानवबोधस्य चानागमिकप्रत्यक्षादिलौकिकप्रमाणाविषयत्वाद्वेदान्तागमवाक्यादेव सम्यग्ज्ञानम् । अतोऽशेषवेदान्तसारसङ्ग्रहप्रकरणमिदमारभ्यते । तत्राखिलहितार्थप्रचयाय प्रक(र)णार्थसंसूचनाय चाद्यश्लोकः—

खानिलाग्न्यब्धरित्र्यन्तं स्रक्फणीवोद्गतं यतः ।
ध्वान्तच्छिदे नमस्तस्मै हरये बुद्धिसाक्षिणे ॥

**End:**

वेदान्तोदरवर्ति भास्वदमलं ध्वान्तच्छिदस्मद्धियो
दिव्यं ज्ञानमतीन्द्रियेऽपि विषये व्याहन्यते न क्वचित् ।
यो नो न्यायशलाकयैव निखिलं संसारबीजं तमः
प्रोत्सार्याविरकार्षीद्गुरुगुरुः पूज्याय तस्मै नमः ॥

सम्बन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता ।
नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्यातास्या(सौ)भवेद्ध्रुवम् ॥

**Colophon:**

इति श्रीनैष्कर्म्यसिद्धिसम्बन्धोक्तौ चतुर्थोऽध्यायः ॥
प्रमोदूतोर्जदर्शेज्यवासरे पूर्णलेखनम् ।
नैष्कर्म्यसिद्धेरगमत्सम्बन्धोक्तेस्समापनम् ॥

---

## No. 4611. नैष्कर्म्यसिद्धिव्याख्या—चन्द्रिका.

## NAIṢKARMYASIDDHIVYĀKHYĀ : CANDRIKĀ.

Pages, 131. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 4610.
Complete.

A commentary on the Naiṣkarmyasiddhi of Surēśvarācārya ; by Jñānōttamamiśra, a resident of a village called Maṅgala in the Chōla country.

Copied by Tādipalle Vēṅkatādri and completed on the 15th of Puṣya-śuddha in the year Pramōdūta.

**Beginning:**

विष्णोस्तत्परमं धाम द्योतमानं निजश्रिया ।
अनस्तोदितमद्वैतमात्मभूतं पुनातु नः ॥
तेजस्त्रैयम्बकं भूयाद्भूयसे श्रेयसे मम ।
यदाचामति निश्शेषं भक्तानां भववारिधिम् ॥
नैष्कर्म्यसिद्ध्यभिधया सुधया सुधियां व्यधात् ।
योऽमृतत्वं नमामस्तं सुरेश्वरसुधानिधिम् ॥
तर्कोदग्रनखोद्भिन्नवादिदैत्यभुजान्तरः ।
प्रह्लादयतु नश्शश्वज्ज्ञानोत्तममृगोत्तमः ॥
चोळेषु मङ्गळमिति प्रथितार्थनाम्नि

ग्रामे वसन् पितृगुरोरभिधां दधानः ।
ज्ञानोत्तमस्सकलदर्शनपारदृश्वा
नैष्कर्म्यसिद्धिविवृतिं कुरुते यथावत् ॥

व्याचिख्यासितायाः श्लोकसन्दर्भरूपाया नैष्कर्म्यसिद्धेरधिकारिप्रयोजनतत्साधनसम्बन्धविषयाणामभावादनारम्भमाशङ्क्य स्वयमेव सम्बन्धोक्तिं कुर्वन् आचार्यः प्रकरणारम्भसिद्ध्यर्थं क्रमेण तानुपपादयति—आब्रह्म-स्तम्बपर्यन्तैरित्यादिना प्रकरणमिदमारभ्यत इत्यन्तेन ग्रन्थेन । तत्र तावदधिकारिणमुपपादयति—तन्निवृत्त्यर्थो प्रवृत्तिः स्वरसत एवेत्यन्तेन । आब्रह्म च स्तम्बपर्यन्ताश्चेत्याब्रह्मस्तम्बपर्यन्तास्तैश्चतुर्मुखप्रभृतिभिः स्तम्बावसानैः; प्राणिभिरिति यावत् । सर्वप्रकारस्याध्यात्मिकादिभेदभिन्नस्य । स्वरसत एव स्वभावत एव; शास्त्राधेयसंस्कारमन्तरेणेति यावत् ।

**End :**

नैष्कर्म्यसिद्धेर्व्याख्यानक्षमतात्पर्यपरिज्ञाने किं कारणमित्याकाङ्(क्षा)यां सम्बन्धोक्तिरेवेत्याह—

सम्बन्धोक्तिरियं साध्वी प्रतिश्लोकमुदाहृता ।
नैष्कर्म्यसिद्धेर्ज्ञात्वेमां व्याख्याता स भवेद्ध्रुवम् ॥

इति व(प)दकशतमकार्षीत् ॥

व(प)दकशतम(ह)तकौ(कु)मारिलसौगतगुर्वक्षपादकणभक्ष[यम]ः ।
वल(यमनियम)निलयधिषणो जयति श्रीसत्त्वबोधा[चा]र्यः ॥
वस्तु[प्र]ख्या(ति)विख्या(घा)तिवादितिमिरं नैष्कर्म्यसिद्धेस्स्फुटं
व्याख्याचन्द्रिकया विधूय सुधियस्सदृदृष्टिमुन्मीलयन् ।
अन्तस्संहृतशान्तिवेदनसुधो विद्योतते सर्वदा
सर्वज्ञाश्रमचन्द्रमास्त्रिजगतीसर्वज्ञचूडामणिः ॥

**Colophon :**

इति महोपाध्यायज्ञानोत्तममिश्रविरचितायां नैष्कर्म्यसिद्धिचन्द्रिकायां चतुर्थोऽध्यायः ॥

## No. 4613. पञ्चकोशविवेकः.

## PAÑCAKŌŚAVIVĒKAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 411.

Complete in 42 stanzas.

An explanatory essay in verse on the five sheaths of the soul, *viz.*, the Annamaya-kōśa, the Prāṇamaya-kōśa, the Manōmaya-kōśa, the Vijñānamaya-kōśa and the Ānandamaya-kōśa.

**Beginning:**

जीवात्मबोधं कुरुते मूलाज्ञानं तदुच्यते ।
तत्त्वमस्यादिवाक्योत्थं ज्ञानं मूलस्य घातुकम् ॥

शब्दादिविषयज्ञानं तूलाज्ञानं तदुच्यते ।
प्रत्यक्षादिप्रमाणोत्थं ज्ञानं तूलस्य घातुकम् ॥

यथा नक्तंदृशस्सूर्य[ः] प्रकाशो नावभासते ।
तथेदं परमाद्वैतं मनुष्याणां न भासते ॥

गुहाहितं ब्रह्म यत्तत्पञ्चकोशविवेकतः ।
रोद्धुं शक्यं ततः कोशमनेकं प्रविविच्यते ॥

देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः ।
ततः कर्ता ततो भोक्ता गुहाशयपरम्परा ॥

**End:**

पुत्रादेरविवक्षायां न पिता न पितामहः ।
तद्वन्नेशो नापि जीवः शक्तिकोशाविवक्षणे ॥

य इदं ब्रह्म वेदैष ब्रह्मैव भवति स्वयम् ।
ब्रह्मणो नास्ति जन्मातः पुनरेव न जायते ॥

**Colophon:**

इति श्रीपञ्चकोशविवेकः ॥

## No. 4613. पञ्चदशी.

## PAÑCADAŚĪ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 16. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 60*a*. The other works herein are Bhēdadhikkārasatkriyā 1*a*, Sītārāmastōtra 56*a*, Indrākṣīstōtra 57*b*.

Tṛptidīpa only complete.

A famous work by Vidyāraṇya on Advaita-Vēdānta.

This work is divided into 3 chapters styled Vivēka, Dīpa and Ānanda. Each chapter is again sub-divided into 5 sections as noted below:—

### VIVĒKA.

| | |
|---|---|
| Pratyaktattva .. .. .. | 1 |
| Pañcabhūta .. .. .. | 2 |
| Pañcakōśa .. .. .. | 3 |
| Dvaita .. .. .. | 4 |
| Mahāvākyārtha .. .. .. | 5 |

### DĪPA.

| | |
|---|---|
| Citradīpa .. .. .. | 1 |
| Tṛptidīpa .. .. .. | 2 |
| Kūṭasthadīpa .. .. .. | 3 |
| Dhyānadīpa .. .. .. | 4 |
| Nāṭakadīpa .. .. .. | 5 |

### ĀNANDA.

| | |
|---|---|
| Yōgānanda .. .. .. | 1 |
| Ātmānanda .. .. .. | 2 |
| Advaitānanda .. .. .. | 3 |
| Vidyānanda .. .. .. | 4 |
| Viṣayānanda .. .. .. | 5 |

The first stanza and the colophon in the end obviously belong to a commentary on this work.

**Beginning :**

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
क्रियते तृप्तिदीपस्य व्याख्यानं गुर्वनुग्रहात् ॥
आत्मानं चेद्विजानीयादहमस्मीति पूरुषः ।
किमिच्छन् कस्य कामाय शरीरमनुसञ्ज्वरेत् ॥
अस्याश्श्रुतेरभिप्रायस्सम्यगत्र विचार्यते ।
जीवन्मुक्तस्य या तृप्तिस्सा तेन विशदायते ॥
मायाभासेन जीवेशौ करोतीति श्रुतत्वतः ।
कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितम् ॥
ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ।
जाग्रदादिविमोक्षान्तस्संसारो जीवकल्पितः ॥
भ्रमाधिष्ठानभूतात्मा कूटस्थासङ्गचिद्वपुः ।
अन्योन्याध्यासतोऽसङ्गधीस्स जीवोऽत्र पूरुषः ॥

**End :**

अहो पुण्यमहो पुण्यं फलितं फलितं दृढम् ।
अस्य पुण्यस्य सम्पत्तेरहो वयमहो वयम् ॥
अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः ।
अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम् ॥
तृप्तिदीपमिमं नित्यं येऽनुसन्दधते बुधाः ।
ब्रह्मानन्दे निमज्जन्तस्ते तृप्यन्ति निरन्तरम् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिङ्करेण श्रीरामकृष्णाख्यविदुषा विरचिता तृप्तिदीपव्याख्या समाप्ता ॥

## No. 4614. पञ्चदशी.

## PAÑCADAŚĪ.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 15. Lines, 5 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 19*a*. The other works herein are Audgātra 1*a*, Gōtrapravaranirṇaya 8*a*, Brahmasūtra 14*a*, Gāyatrirāmāyaṇa 16*a*

Only the Ātmānanda section.

Same work as the above.

---

## No. 4615. पञ्चदशी–सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Pages, 36. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 2287.

Same as the above with the commentary of Rāmakṛṣṇa.

Contains Pratyaktattvavivēka and two pages of Dvaitavivēka.

**Beginning:**

नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने ।
सविलासमहामोहग्राहग्रासैककर्मणे ॥

(व्या.)—

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ।
प्रत्यक्तत्त्वविवेकस्य क्रियते पददीपिका ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारलक्षणमङ्गलमा(ला)चरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति, अर्थाद्विषयप्रयोजने सूचयति—नम इति ।

शं सुखं करोतीति शङ्करः परमात्मा; एष ह्येवानन्दयातीति श्रुतेः ।

For the end, see under the next number.

## No. 4616. पञ्चदशी--सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, paper. Size, 10⅜ × 6 inches. Pages, 263. Lines, 15 on a page. Character, Telugu. Condition, slightly injured Appearance, old.

Same work as the above.

See under the previous number for the beginning.

**End :**

फलितमाह—

(मू.)—

निरुपाधिब्रह्मतत्त्वे भासमाने स्वयम्प्रभे ।
अद्वैते त्रिपुटी नास्ति भूमानन्दोऽत उच्यते ॥

(व्या.)—

त्रिपुटीभानाभावाद्भूमानन्द इत्युच्यत इत्यर्थः ॥

ग्रन्थमुपसंहरति—

(मू.)—

ब्रह्मानन्दाभिधे ग्रन्थे पञ्चमाध्याय ईरितः ।
विषयानन्द एतेन द्वारेणान्तः प्रवेश्यताम् ॥
प्रि(प्री)याद्धरिर्हरोऽनेन ब्रह्मानन्देन सर्वदा ।
प्रीणयेत्प्राणिनस्सर्वानाश्रितान् बुद्धमानसान् ॥ इति ॥

(व्या.)—

स्पष्टः ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिङ्करेण श्रीरामकृष्णाख्यविदुषा विरचिता ब्रह्मानन्दे विषयानन्दव्याख्या नाम पञ्चमोऽध्यायः ॥

## No. 4617. पञ्चदशी–सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf (Srītāla). Size, $15\frac{3}{8} \times 2\frac{1}{2}$ inches. Pages, 50. Lines, 12 on a page. Character, Telugu. Condition, injured. Appearance, old.

Citradīpa complete, Tṛptidīpa incomplete.

Same work as the above.

## No. 4618. पञ्चदशी–सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 232. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains from the Pratyaktattvavivēka to the end of Citradīpa.

Breaks off in Tṛptidīpa.

Same work as the above.

---

## No. 4619. पञ्चदशी–सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 36. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

Citradīpa incomplete.

Same work as the above.

## No. 4620. पञ्चदशी–सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 16. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, not old.

Contains the commentary on Mahāvākyavivēka complete.

Begins on fol. 12*a*. The other works herein are Nārāyaṇāṣṭaka 1*a*, Vyāsaputrāṣṭaka 3*a*, Manīṣāpañcaka 4*a*, Kaupīnapañcaka 5*a*, Śivōhaṁpañcaka 5*b*, Vakratuṇḍāṣṭaka 6*a*, Dakṣiṇāmūrtyaṣṭaka 6*b*, Śivabhujaṅga 9*a*, Vēṅkatōśāṣṭaka 10*a*, Ambārdhabhujaṅga 10*b*, Mahāvākyavivaraṇa 17*a*, Dakṣiṇāmūrtyaṣṭakavyākhyā 22*a*, Kaivalyōpaniṣad 49*b*.

Same work as the above.

---

## No. **4621.** पञ्चदशी—सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 44. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a* and 11*b*. The other works herein are Mahāvākyavivaraṇa 7*a*, Vēdāntaviṣaya 22*b*.

Incomplete.

Same work as the above.

## No. **4622.** पञ्चदशी--सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $17 \times 1\frac{5}{8}$ inches. Pages, 240. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the commentary on the 5 Dīpa sections and on 3 Vivēka sections.

Breaks off in the fourth section of the Vivēka chapter.

Complete.

Same work as the above.

---

## No. **4623.** पञ्चदशी—सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{3}{4}$ inches. Pages, 306. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Citra-dīpa and Tṛpti-dīpa wanting.

Same work as the above.

## No. 4624. पञ्चदशी—सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $19\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 231. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

The commentary on the Citra, Tṛpti and Kūṭastha sections of the Dīpa chapter are wanting.

Same work as the above.

## No. 4625. पञ्चदशी—सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1$ inches. Pages, 312. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

The Vivēka chapter and the Viṣayānanda section of the Ānanda chapter are wanting.

Same work as the above.

## No. 4626. पञ्चदशी—सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $18 \times 1\frac{1}{2}$ inches. Pages, 183. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Same work as the above.

Citra, Tṛpti and Kūṭastha sections of the Dīpa chapter complete.

---

## No. 4627. पञ्चदशी—सव्याख्या.

## PAÑCADAŚĪ WITH COMMENTARY.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 121. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Wants fifty stanzas in the beginning.

Vivēka and Ānanda chapters complete.

## No. 4628. पञ्चभूतविकारः.

## PAÑCABHŪTAVIKĀRAḤ.

Substance, palm-leaf (Śrītāla). Size, 13⅞ × 1⅞ inches. Pages, 8. Lines, 7 on a page. Character, Malayālam. Condition, good. Appearance, old.

Begins on fol 3*b*. The other works herein are Siddhāntasaṅgraha 1*a*, Vivēkasāra 7*b*, Paramasiddhāntasāra 84*a*, Vēdāntasāra 102*a*.

On the manner in which the five elements become modified and manifest themselves in the evolution of the universe.

Complete.

**Beginning:**

अथ पुराणोक्तप्रकारेणापि सृष्टिरुच्यते—

आत्मा प्रकृतिश्चानादी । स आत्मा प्रकृतौ प्रतिबिम्बितः । (त)स्य पुरुष इति संज्ञा । सः प्रकृतिं प्रवर्तयति । स एव स[ः]प्रकृतिः सत्त्वरजस्तमोगुणैः विष्णुर्ब्रह्मा रुद्र इति संज्ञां प्राप्नोति ।

**End:**

चतुर्थे वाय्वंशे पञ्चलक्षणमस्ति । तत्किमिति चेत्? கிடத்தல், இருத்தல், நடத்தப்(ல்), நிறுத்தல், தாண்டல் । पञ्चमे आकाशांशे पञ्चलक्षणमस्ति । तत्किमिति चेत्? आशा, द्वेषः, भयं, लज्जा, मोहः—इति ॥

**Colophon:**

पञ्चभूतविकारः समाप्तः ॥

---

## No. 4629. पञ्चभ्रमनिरूपणम्.

## PAÑCABHRAMANIRŪPAṆAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No. 4559.

A tract which explains the various cosmic delusions arising from the supposed five states of Brahman.

**Beginning:**

विविधप्रपञ्चाकारेण भासत इति विराट्, अविरुद्धाकारैर्भासत इति वैराजः, देवतिर्यङ्मनुष्याकारैर्भासत इति वैश्वानरः, तेजोमयानि लिङ्गशरीराणि अस्य गर्भे वसन्तीति हिरण्यगर्भः ।

**End:**

पञ्चभ्रमाणां निवृत्तिकालमाह---बिम्बप्रतिबिम्बदृष्टान्तेन भेदभ्रमो निवर्तनीयः; स्फटिकलोहितदृष्टान्तेन पारमार्थिककर्तृत्वभ्रमो निवर्तनीयः; घटाकाशदृष्टान्तेन सङ्गीति भ्रमो निवर्तनीयः; रज्जुसर्पदृष्टान्तेन जगत्कारणस्य ब्रह्मणो विकारित्वभ्रमो निवर्तनीयः; स्वर्णलोहितदृष्टान्तेन कारणाद्भिन्नप्रपञ्चस्य सत्यत्वभ्रमो निवर्तनीयः; मरुमरीचिकादृष्टान्तेन.

मायामात्रमिदं द्वैतमद्वैतं पारमार्थिकम् ।

इति श्रुत्या साक्षात्प्रतिपादकत्वात्सर्वभ्रमो निवर्तनीयः ॥

## No. 4630. पञ्चरत्नम्.
## PAÑCARATNAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 200.

A collection of 5 stanzas in which Śaṅkarācarya has expended the identity of the soul with the Brahman by differentiating it from all other things than the Brahman, which are generally mistaken for the soul.

Complete

**Beginning:**

नाहं देहो नेन्द्रियाण्यन्तरङ्गं नाहङ्कारं(रः) प्राणवर्गो न बुद्धिः ।
दारापत्यक्षेत्रवित्तादिदूरं साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥

**End:**

मत्तो नान्यत्किञ्चिदत्रास्ति दृश्यं सत्यं बाह्यं वस्तु मायोपकॢप्तम् ।
आदर्शान्तर्भासमानस्य तुल्यं मय्यद्वैते भाति तस्माच्छिवोऽहम् ॥

**Colophon:**

आचार्यविरचितपञ्चरत्नप्रकरणं समाप्तम् ॥

## No. 4631. पञ्चरत्नम्.

## PAÑCARATNAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 29*b* of the MS. described under No. 4559.

Complete.

Same work as the above.

## No. 4632. पञ्चरत्नमालिकाव्याख्या—कल्पवल्ली.

## PAÑCARATNAMĀLIKĀVYĀKHYĀ : KALPAVALLĪ.

Pages, 9. Lines, 22 on a page.

Begins on fol. 57*a* of the MS. described under No. 1021.

Complete.

This Kalpavallī is a commentary on the Pañcaratna of Śaṅkarācārya.

**Beginning:**

यदज्ञानाज्जगत्सर्वं यस्मिन्नेवावभासते ।
विज्ञाने नास्ति यत्सर्वं तद्वन्दे ब्रह्म सर्वगम् ॥

अथ भगवान् शङ्कराचार्यस्त्रिलोकगुरुरज्ञानतिमिरभास्करस्वरूपस्समस्तद्वैतवादिगजकेसरी सच्चिदानन्दस्वरूपः परमात्मा लोके मन्दबुद्धीनामनुग्रहार्थं सर्ववेदान्तसारभूतं गुरोः प्रसादात्सिद्धमर्थमात्मानात्मविवेकपूर्वकं स्वानुभवं प्रकटयति पञ्चभिः श्लोकैः—नाहं देह इति । अयमर्थः—

अयं परिदृश्यमानः स्थूलदेह आत्मा न । कथमिति चेत्? तस्यानात्मत्वात् । अनात्मत्वं कथमिति चेत्? भूतकार्यत्वाज्जडत्वाद्दृश्यत्वाच्छुक्लशोणितादिजन्यत्वात् ।

**End:**

एवम्भूतात्मज्ञानं मम शिवत्वं कदा सम्भवतीति चेत्? यतो वीतरागगुरुवेदान्तेषु श्रद्धाभक्तिपरास्साधनचतुष्टयसम्पन्ना देहाभिमानरहिता

भक्तिज्ञानवैराग्यसम्पन्नाश्चेत्तेषां मुक्तिः करतलामलकवदिति निश्चितार्थो भवतीत्यर्थः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविन्दभगवत्पादपूज्यशिष्यश्रीमच्छङ्कराचार्यविरचिता पञ्चरत्नमालिकाकल्पवल्ली समाप्ता ॥

---

## No. 4633. पञ्चरत्नम्—दीधितिसहितम्.

## PAÑCARATNAM WITH DĪDHITI.

Substance, paper. Size, $8\frac{1}{3} \times 6\frac{1}{2}$ inches. Pages, 48. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 75*a*. The other work herein is Manīṣāpañcaka (with commentary) 1*a*

Complete.

The commentary here is different from the previous one.

**Beginning:**

नित्यशुद्धविमुक्तैकसच्चिदानन्दरूपिणे ।
स्वानुभूत्येकमानाय साक्षिणे ब्रह्मणे नमः ॥

प्रणम्य भगवत्पादान् गुरूनपि गरीयसः ।
श्रद्धया क्रियते पञ्चरत्नानां दीधितिर्मया ॥

इह खलु परमकारुणिकः श्रीमच्छङ्करभगवत्पादाचार्य इह जन्मनि

* * * *

कांश्चित्पुरुषधौरेयानुपलक्ष्य तेषामनायासेन निरन्तरस्वात्मानुसन्धानार्थं स्वानुभवं पञ्चभिः श्लोकैः प्रकटयति, तत्रापि देहाद्यनात्मवर्गनिरासेन प्रत्यगात्मनः परशिवाभेदं दर्शयति—

नाहं देहो नेन्द्रियाण्यन्तरङ्गं . . . . . . . ।
. . . . साक्षी नित्यः प्रत्यगात्मा शिवोऽहम् ॥

अत्र लोकायतिका देह एवात्मेति मन्यन्ते । कस्मात्? अन्वयव्यतिरेकाभ्यां चैतन्यस्य देह एवोपलम्भात् ।

**End:**

तस्मात्समस्तोपाध्यनवच्छिन्नानन्दचैतन्यैकरसमद्वितीयं ब्रह्मैवाहमस्मीत्यभिप्रायः ॥

**Colophon:**

सोपानपञ्चकव्याख्या[नं] समाप्ता ॥

---

## No. 4634. पञ्चरत्नव्याख्यानम्.

## PAÑCARATNAVYĀKHYĀNAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 4559.
Complete.
A commentary by Śaṅkarācārya on his Pañcaratna.

**Beginning:**

तत्र भगवान् शङ्कराचार्यः मन्दबुद्धीनामात्मबोधाख्यं प्रकरणं प्रदर्श्य तत्रापि मन्दबुद्धीनामनुग्रहार्थं गुरोः प्रसादात्सिद्धमात्मानात्मविवेकपूर्वकं स्वानुभवं प्रकटयति पञ्चभिः श्लोकैः—नाहमिति । नाहं स्थूलदेहः; कुतः? तस्यानात्म[क]त्वात् । अनात्मं(त्मत्वं) वा कुतः? भूतकार्यत्वात्; यद्यत् भूतकार्यं तत्तदनात्मा यथा घटः ।

**End:**

यस्मादिदमसत्यमद्वैते मयि सत्यमिव भाति, तस्माच्छिवोऽहमस्मीत्यर्थः ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितं पञ्चरत्नव्याख्यानं संपूर्णम् ॥

## No. 4635. पञ्चीकरणम्.

## PAÑCĪKARAṆAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 139*a* of the MS. described under No. 745.

On the manner according to which the elements undergo combination in the formation of gross bodies.

By Śaṅkarācārya.

Complete.

**Beginning :**

अथातः परमहंसपरिव्राजकानां समाधिविधिं व्याख्यास्यामः—

सच्छब्दवाच्यमविद्याशबलं ब्रह्म । ब्रह्मणोऽव्यक्तम् । अव्यक्तान्महत् । महतोऽहङ्कारः । अहङ्कारात्पञ्च तन्मात्राणि ः। पञ्चतन्मात्रेभ्यः पञ्च महाभूतानि । पञ्चमहाभूतेभ्योऽखिलं जगत् । अथ पञ्चमहाभूतानामेकैकं द्वेधा विभज्य तयोरेकैकभागं चतुर्धा विभज्य स्वार्धभागं निधाय इतरेषु पञ्चधा पञ्चीकरणं भवति ।

**End :**

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।
इति यस्य दृढा बुद्धिस्स मुक्तो नात्र संशयः ॥

**Colophon :**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं पञ्चीकरणं सम्पूर्णम् ॥

---

## No. 4636. पञ्चीकरणम्.
## PAÑCĪKARAṆAM.

Page, 1. Lines, 4 on a page.

Begins on fol. 31*a* of the MS. described under No. 4390.

By Sadāśivabrahmēndra, a disciple of Rāmacandrēndra.

Similar to the above.

There are only a few lines towards the end and they are given below :—

तथैव प्रत्यगभिन्ने ब्रह्मणि स्वाज्ञानजृम्भितनानारचनाध्वान्तं देशिकमुखोद्भूतवेदान्तश्रवणमनननिदिध्यासनजज्ञानप्रचण्डमार्ताण्डेन निर्मूल्य सर्वकलनाशून्यं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मैवास्मीति ब्रह्मैव संपद्यते ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रेन्द्रशिष्यसदाशिवब्रह्मेन्द्रकृतं पञ्चीकरणं सम्पूर्णम् ॥

---

No. **4637.** **पञ्चीकरणविवरणम्.**
PAÑCĪKARAṆAVIVARAṆAM.

Pages, 14. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4559.

Complete.

A commentary on the Pañcīkaraṇaprakaraṇa of Śaṅkarācārya; by Ānandajñāna, a disciple of Śuddhānanda.

**Beginning:**

यद्बोधादिदं भाति यद्बोधाद्विनिवर्तते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

अतीतानेकजन्मसु कृतसुकृतप्रसादासादितशुद्धबुद्धीनां विवेकवैराग्यशमदमादिसाधनसम्पन्नानां परित्यक्तसर्वकर्मणां मोक्षमात्रमाकाङ्क्षतां तदुपायभूतं तत्त्वज्ञानमापाततः श्रुतिमुखादवगतमपि सम्यगवाप्तुमिच्छतामतिलघुनोपायेन कथमुत्पद्यतामिति मन्वानस्सन्नाचार्यः . . . . . . . अध्यारोपापवादन्यायमनुसरन् प्रतिपत्तिसौकर्यार्थं प्रथमं स्थूलप्रपञ्चमुपन्यस्यति–पञ्चीकृतेति । पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सर्वं विराडित्युच्यते । अस्यायमर्थः ।

**End :**

वस्तुनस्स्वरूपेणैव परिशेषात् प्रत्यगात्मा सच्चिदानन्दात्मकः सत्यज्ञानानन्दादिस्वरूपं ब्रह्मैवेति सिद्धम् ॥

षड्विधं लिङ्गमाश्रित्य वेदान्ता यत्र निष्ठिताः ।
विधानप्रतिषेधाभ्यां तं वन्दे पुरुषोत्तमम ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दपूज्यपादशिष्यभगवदानन्दज्ञानविरचितं पञ्चकिरणाविवरणं समाप्तम् ॥

## No. 4638. पञ्चीकरणवार्त्तिकम्.

## PAÑCĪKARAṆAVĀRTIKAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 292.

An explanation of the Pañcīkaraṇa of Śaṅkarācārya; by Surēśvarācārya, a disciple of Saṅkarācārya.

Complete.

**Beginning:**

ओङ्कारस्सर्ववेदानां सारस्तत्त्वप्रकाशकः ।
तेन चित्तेन विज्ञानं मुमुक्षूणां प्रकाश्यते ॥
आसीदेकं परं ब्रह्म नित्यमुक्तमविक्रियम् ।
तत् स्वमायासमावेशाद्बीजमव्याकृतात्मकम् ॥
तस्मादाकाशमुत्पन्नं शब्दतन्मात्ररूपकम् ।
स्पर्शात्मकस्ततो वायुस्तेजो रूपात्मकं ततः ॥
आपो रसात्मिकास्तस्मात्ताभ्यो गन्धात्मिका मही ।
शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् ॥
शब्दस्पर्शरूपगुणैस्त्रिगुणं तेज उच्यते ।
शब्दस्पर्शरूपरसगुणैरापश्चतुर्गुणाः ॥
शब्दस्पर्शरूपरसगन्धैः पञ्चगुणा मही ॥

**End:**

अविद्यातिमिरातीतं सर्वाज्ञानाविवर्जितम् ।
आनन्दमचलं शुद्धं मनोवाचामगोचरम् ॥
वाच्यवाचकनिर्मुक्तं हेयोपादेयवार्जितम् ।
प्रज्ञानघनमानन्दं वैष्णवं पदमश्नुते ॥
इदं प्रकरणं यत्नाज्ज्ञातव्यं ब्रह्मवित्तमैः ।
अमानित्वाद्विनियमैर्गुरुभक्तिप्रसादतः ॥

इमां विद्यां प्रयत्नेन योगी सन्ध्यासु सर्वदा ।
समभ्यसेदिहामुत्र भोगानासक्तधीस्सुधीः ॥ इति ॥

**Colophon:**

इति श्रीसुरेश्वरवार्तिकाचार्यविरचितपञ्चीकरणवार्तिकं सम्पूर्णम् ॥

## No. 4639. पञ्चीकरणवार्त्तिकम्.

## PAÑCĪKARAṆAVĀRTIKAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 10*a* of the MS. described under No. 4559.

Complete.

Same work as the above.

---

## No. 4640. पञ्चीकरणवार्तिकम्.

## PAÑCĪKARAṆAVĀRTIKAM.

Substance, palm-leaf. Size, 18 × 1⅝ inches. Pages, 3. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यशिष्यश्रीमत्सुरेश्वराचार्यविरचितं पञ्चीकरणवार्त्तिकं सम्पूर्णम् ॥

---

## No. 4641. पञ्चीकरणवार्त्तिकव्याख्यानम्—वार्त्तिकाभरणम्.

## PAÑCĪKARAṆAVĀRTTIKAVYĀKHYĀNAM: VĀRTIKĀBHARAṆAM.

Pages, 30. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 4559.

A commentary on the Pañcīkaraṇavārttika of Sūrēśvarācārya; by Abhinavanārāyaṇēndrasarasvatī, a disciple of Jñānēndrasarasvatī who was the disciple of Kaivalyēndrasarasvatī.

**Beginning:**

इह खलु परमेश्वराराधनार्थमनुष्ठितैर्नित्य[त्व]ादिकर्मभिः परिशुद्धान्तःकरणानां . . . . . . . . . स समाधिरोङ्कारेण कथं कर्तव्य इत्याकाङ्क्षायां तं प्रकारं वक्तुं भगवता भाष्यकारेण पञ्चीकरणं नाम प्रकरणमुपदिष्टम् । तत्प्रकरणं व्याचिख्यासुर्भगवान् वार्त्तिककारः . . . . . प्रकरणस्यार्थं सङ्क्षेपेण श्रोतृबुद्धिसौकर्यार्थं कथयति—

ओङ्कारस्सर्ववेदानां . . मुमुक्षूणां प्रकाश्यते ॥ इति ।
तेन ओङ्कारेण चित्तसमाधानं प्रकाश्यत इति सम्बन्धः ।

**End:**

कृतश्रवणमननस्यैव निदिध्यासने अधिकारादिति ॥

अनया पञ्चीकृतवार्तिकाभरणरूपया कृत्या ।
कृष्णः प्रीतो भवताद्विबुधाश्चैनां समीक्ष्य मोदन्ताम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकैवल्येन्द्रसरस्वतीपूज्यपादशिष्यश्रीमज्ज्ञानेन्द्रसरस्वतीपूज्यपादशिष्यश्रीमदभिनवनारायणेन्द्रसरस्वतीविरचितं पञ्चीकरणवार्त्तिकाभरणं समाप्तम् ॥

## No. 4642. पञ्चीकरणवार्तिकव्याख्या.

### PAÑCĪKARAṆAVĀRTIKAVYĀKHYĀ.

**Pages, 6. Lines, 5 on a page.**

Begins on fol. 54*a* of the MS. described under No. 292.

Incomplete.

A commentary on the Pañcīkaraṇavārtika of Sūrēśvarācārya.

**Beginning:**

गौडपादाचार्यश्लोकव्याख्यानं क्रियते—.

कः श्लोकः, कथं वा क्रियते ?

अण्डब्रह्माण्डयोरैक्यं लिङ्गसूत्रात्मनोरपि ।

. . . . . . . . . . ॥

अथैक्यमुच्यते—

आत्माव्युत्पन्नभ्रान्तपुरुषस्याज्ञानमपहर्तुं विराड्ढिरण्यगर्भाव्याकृत-स्थूलसूक्ष्मकारणतनुत्र . . . . . . . . . . अव्यक्त-भावात् ।

**End:**

तत्कार्यं सर्वं विराडित्युच्यते । अयमात्मा न स्थूलदेहः । अस्मा-ज्जाग्रदवस्था भवति । . . (बा)ह्येन्द्रियसहितो बाह्येन्द्रियविषयैस्सह सञ्चारो जाग्रत्; इमं विराजं पुरुषमस्मादुत्पन्नां जाग्रदवस्थां पश्यन् विश्वसंज्ञो जीवो नेत्रस्थः । एतत्र्यमकारः.

---

## No. 4643. परमसिद्धान्तसारः.

## PARAMASIDDHĀNTASĀRAḤ.

Pages, 35. Lines, 9 on a page.

Begins on fol. 84*a* of the MS. described under No. 4628.

Incomplete.

Contains a brief summary of the leading principles of Advaita-Vēdānta; by a disciple of Svayaṁprakāśayati.

**Beginning:**

ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितम् ।

श्रीमत्स्वयम्प्रकाशाख्यं प्रणौमि जगतां गुरुम् ॥

देहो नाहं श्रोत्रवागादिकानि नाहं बुद्धिर्नाहमध्यासमूलम् ।
नाहं सत्यानन्दरूपश्चिदात्मा मायासाक्षी कृष्ण एवाहमस्मि ॥

अथ मोक्षस्य वाक्यार्थज्ञानाधीनत्वात्तस्य पदार्थज्ञानाधीनत्वात् तदर्थं तत्पदार्थं निरूपयामः—तत्पदार्थस्य लक्षणं द्विविधम्—तटस्थलक्षणं स्वरूपलक्षणं चेति । सृष्टिस्थितिकारणत्वं तटस्थलक्षणम्; तदुक्तं भगवता सूत्रकारेण—"जन्माद्यस्य यतः" इति । प्रधानस्य ब्रह्मणः सत्यज्ञानानन्दौ(न्दाः) स्वरूपलक्षणम्—उक्तं च "आनन्दादयः प्रधानस्य" इति । स च द्विविधः—वाच्यार्थो लक्ष्यार्थश्चेति । मायोपहितं चैतन्यं तत्पदवाच्यार्थः । मायानिर्मुक्तं चैतन्यं तत्पदलक्ष्यार्थः ।

**End:**

प्रकरणप्रतिपाद्यस्य प्रशंसनमर्थवादः । यथा तत्रैव—"येनाश्रुतं श्रुतं भवति, अमतं मतम्, अविज्ञातं विज्ञातम्" इति । अद्वितीयवस्तुप्रशंसनमर्थवादः । प्रकरणप्रतिपाद्यस्य दृष्टान्तैः प्रतिपादनमुपपत्तिः । यथा तत्रैव—"यथा सौम्यैक्ये(के)न मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिका इत्येव सत्यम्" इत्यादिवाक्यप्रतिपादितमृदादिदृष्टान्तैरद्वितीयवस्तुप्रतिपादनम् । एवं षड्विधता ॥

**Colophon:**

परमसिद्धान्तसारं(रः) समाप्तम्(ः) ॥

---

## No. 4644. परमार्थसारसङ्ग्रहः.
## PARAMĀRTHASĀRASAṄGRAHAḤ.

Pages, 4. Lines, 23 on a page.

Begins on fol. 7*b* of the MS. described under No. 1021.

Complete.

A short treatise in verse pointing out that the salvation of the soul results only through the realization of the Brahman.

By Śaṅkarācārya.

**Beginning:**

आत्मावबोधनपराः कुणपशरीराभिमानपरितुष्टाः ।
वारिजबुद्बुदरक्षां मूढाः कुर्वन्ति लोहबन्धेन ॥
जलमिव मृगतृष्णायां शुक्तौ रजतं यथा फणी रज्ज्वाम् ।
सत्यमिवासत्यमिदं कल्पितमाभाति मयि परानन्दे ॥
चिन्मात्रममलविषयमद्वयमानन्दमनुभवारूढम् ।
ब्रह्मैवास्मि तदन्यन्निगमं चास्तीति निश्चयो विदुषाम् ॥
मयि सुखबोधपयोधौ महति ब्रह्माण्डबुद्बुदसहस्रम् ।
मायामयेन मरुता भूत्वा भूत्वा मुहुस्तिरोधत्ते ॥

**End:**

यन्नित्यादिग्रन्थैरात्मा शक्यो मुमुक्षुभिर्ज्ञातुम् ।
प्रस्थानत्रयपठनं पर्वतखननेन मूषिकग्रहणम् ॥
जाते ब्रह्मणि चित्ते तिष्ठति तत्रैव चरति यः पश्चात् ।
पुनरपि तत्रैवास्ते निधिरिव नौस्तम्भकाक इति ॥

**Colophon:**

इति शङ्करभगवत्पूज्यपादकृतः परमार्थसारसङ्ग्रहस्समाप्तः ॥

## No. 4645. बोधार्या.

## BŌDHĀRYĀ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 276.

Complete.

A work consisting of 55 stanzas in the Āryā metre on the identity of the individual soul and the Supreme Soul.

**Beginning:**

कारुण्यसारसान्द्रा(:) काङ्क्षितवरदानकल्पकविशेषाः ।
श्रीगुरुकटाक्षपाताश्शिव शिव शमयन्ति चित्तसन्तापम् ॥

अस्ति स्वयमित्यस्मिन्नर्थे कस्यास्ति संशयः पुंसः ।
तत्रापि संशयश्चेत् संशय(शे)ते यस्स एव भवसि त्वम्
नाहमिति वेत्ति योऽसौ सत्यं ब्रह्मैव वेत्ति नास्तीति ।
अहमस्मीति विजानन् ब्रह्मैवासौ स्फुटं विजानाति ॥
ब्रह्म त्वमेव तस्मान्नाहं ब्रह्मेति मोहमात्रमिदम् ।
मोहेन भवति भेदः क्लेशास्सर्वे भवन्ति तन्मूलाः ॥

**End:**

संसारदावपावकसन्तप्तस्सकलसाधनोपेतः ।
स्वात्मनिरूपणनिपुणैर्वाक्यैश्शिष्यः प्रबोध्यते गुरुणा ॥
देशिकवरं दयालुं वन्देऽहं निहतसकलसन्देहम् ।
यच्चरणद्वन्द्वमिदमनुभवमुपदिशति तत्त्वमस्यर्थैः ॥

No. **4646.** ब्रह्मज्ञानविचारः.

BRAHMAJÑĀNAVICĀRAḤ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 22. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 31*a*. The other works herein are Nyāyādhvadīpikā 1*a*, Tattvadīpikā 17*a*.

Wants beginning and end.

A discussion regarding the nature and the acquisition of the knowledge of the Brahman.

**Beginning:**

(य)स्यायं निरतिशयप्रियस्स एवास्य प्रियतमो भवतीति न्यायसहकृतेन "भक्त्या लभ्यस्त्वनन्यया" "प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः" इत्यादिवचनोपबृंहितेनावगम्यते । यमित्यनेन वरणीयताहेतुगुणपरामर्शा त्तत्रापि गुरुलघुविकल्पानुपपत्तेः भक्त्येकलभ्यत्वानुपपत्तेश्च ध्यानस्यैव भक्तिरूपत्वसिद्धेश्च ।

**End:**

क्वचिल्लिङ्गवचनश्चोह्यते यथा—प्रास्मा अग्निं भरतेति मन्त्रेषु ता आलभे(ते)ति विहितान्(नां)पशून्(नां)प्राप्ते प्राग्निभ्योमिति क्वचित्रीण्यप्यूह्यन्ते यथा—आपो देवीरिति मन्त्रे आज्यं प्रोक्षणमिति सोमारौद्रचरौ.

## No. 4647. ब्रह्मप्रणवदीपिका.

## BRAHMAPRAṆAVADĪPIKĀ.

Pages, 26. Lines, 8 on a page.

Begins on fol. 12*a* of the MS. described under No. 4390.

Complete.

A short Advaita work in prose intended to establish that what is denoted by the syllable Ōṁ is the Supreme Brahman; by Rāmacandrēndra, a disciple of Vāsudēvēndra-sarasvatī.

**Beginning:**

जाग्रद्विश्वविराडादिकल्पनास्पदमाततम् ।
त्रिपान्नारायणं वन्दे तुर्यतुर्यपदोज्ज्वलम् ॥

नत्वा श्रीगुरुपादाब्जमध्यारोपापवादतः ।
तुर्यतुर्यप्रबोधार्थं ब्रह्मतारार्थ उच्यते ॥

असाधनमसाध्यमपदार्थमवाक्यार्थं निष्कलं निरवयवं निर्गुणममायममायाकार्यं सच्चिदानन्दलक्षणमेकमेवाद्वयं ब्रह्म सत्तासामान्यवैभवं ब्रह्मप्रणवार्थतुर्यतुर्यस्वरूपेणैव सदा विजयते ।

**End:**

तस्मादद्वयत्रिपात्तुर्यतुर्योऽस्मीति चरमसाक्षात्कारतः कर्मत्रयभोगावस्थानलक्षणानृतजडदुःखात्मकस्थूलसूक्ष्मकारणशरीरवासनाविरूपाविलयानिर्विकल्पकसमाध्याविर्भूतस्वेतराशेषविशेषशून्यनिर्मायत्रिपान्नारायणतुर्यतुर्यस्वरूपलक्षणविदेहकैवल्यरूपेण ब्रह्मात्मविद्वरिष्ठोऽवशिष्यते ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यवासुदेवेन्द्रसरस्वतीशिष्यश्रीरामच-न्द्रेन्द्रविरचितब्रह्मप्रणवदीपिका सम्पूर्णा ॥

ग्रन्थाश्चतुर्विंशत्यधिकचतुश्शतम् ॥

प्रत्यगद्वयसिद्धान्तगूढार्थस्फुटवादिनः ।
ब्रह्मात्मनिष्ठान् वन्दामि(न्देऽहं) रामचन्द्रेन्द्रदेशिकान् ॥

## No. 4648. ब्रह्मविन्महिमा.

## BRAHMAVINMAHIMĀ.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{1}{2}$ inches. Pages, 4. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 2*a*. The other works herein are Svānubhava-prakaraṇa 1*a*, Brahmasūtravṛtti (Brahmatattvaprakāśikā) 4*a*.

Complete.

On the greatness of those who have realized the Brahman.

**Beginning:**

नाहं तथाद्मीति श्रीमहाभागवते तृतीयस्कन्धे श्रीमन्नारायणेन भग-वता ब्रह्मविन्माहात्म्यं प्रस्तूयते—

नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन् हुतभुङ्मुखेन ।
यद्ब्राह्मणस्य मुखतश्चरतोऽनुघासं तुष्टस्य मय्यवसितैर्निजकर्मपाकैः ॥

अस्यार्थः—

अहं सर्वजगत्कारणभूतः सर्वात्मकः परमेश्वरः विताने क्रतावग्न्या-धानाद्यश्वमेधान्ते यागे हुतभुङ्मुखेन ।

**End:**

तस्माद्ब्रह्मविदे देयं (हव्यं कव्यं च) किश्चनेत्यादिवचनप्रामाण्या-ज्ज्ञानी त्वात्मैव मे मतमिति ज्ञानिना(नः) परमेश्वरात्मकत्वाच्च । अतो ब्रह्मवित्तर्पणेन सर्वजगत्तर्पणफलं सिध्यति ॥

## No. 4649. ब्रह्मसूत्रम्.

## BRAHMASŪTRAM.

Substance, paper. Size, $11\frac{1}{4} \times 7\frac{1}{8}$ inches. Pages, 15. Lines, 25 on a page. Character, Telugu. Condition, injured. Appearance, new.

Begins on fol. 395*b*. The other work herein is Brahmasūtra-bhāṣya 1*a*.

Complete.

The well-known body of original aphorisms known as Vēdānta-sūtra, Śārīrakasūtra, Brahmamīmāṁsā, and Uttaramīmāṁsā.

**Beginning:**

अथातो ब्रह्मजिज्ञासा । जन्माद्यस्य यतः । शास्त्रयोनित्वात् । तत्तु समन्वयात् । ईक्षतेर्नाशब्दम् । गौणश्चेन्नात्मशब्दात् ।

**End:**

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः । विकारावर्ति च तथा हि स्थितिमाह । दर्शयतश्चैव(वं) प्रत्यक्षानुमाने । भोगमात्रसाम्यलिङ्गाच्च । अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥

सूत्राणि द्वाविंशतिः ॥ इ . . . . .

**Colophon:**

इति चतुर्थाध्यायस्य चतुर्थः पादस्समाप्तः ॥

---

## No. 4650. ब्रह्मसूत्रम्.

## BRAHMASŪTRAM.

Pages, 12. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 534.

Same work as the above.

## No. 4651. ब्रह्मसूत्रम्.

## BRAHMASŪTRAM.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 32. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vaiyāsikanyāyamālā 27*a*.

Complete.

Same work as the above.

## No. 4652. ब्रह्मसूत्रम्.

## BRAHMASŪTRAM.

Pages, 44. Lines, 6 on a page.

Begins on fol. 9*a* of the MS. described under No. 4526.

Complete.

Same work as the above.

---

## No. 4653. ब्रह्मसूत्रम्.

## BRAHMASŪTRAM.

Pages, 17. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 1608.

Complete.

Same work as the above.

---

## No. 4654. ब्रह्मसूत्रम्.

## BRAHMASŪTRAM.

Pages, 16. Lines, 6 on a page.

Begins on fol. 34*a* of the MS. described under No. 455.

Wants beginning and end.

## No. 4655. ब्रह्मसूत्रम्.
## BRAHMASŪTRAM.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 25. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Same work as the above.

## No. 4656. ब्रह्मसूत्रम्.
## BRAHMASŪTRAM.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 20. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vēdāntasāra 15*a*.

Complete.

Same work as the above.

## No. 4657. ब्रह्मसूत्रम्.
## BRAHMASŪTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 4614.

Incomplete.

Contains the first two Pādas of the first Adhyāya complete.

---

## No. 4658. ब्रह्मसूत्रचन्द्रिका.
## BRAHMASŪTRACANDRIKĀ.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{3}{4}$ inches. Pages, 235. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

From the first Adhyāya to the end of the first Pāda in the third Adhyāya.

A brief summary of a commentary on the Brahmasūtras.

**Beginning:**

प्रणम्य परमात्मानं सच्चिदानन्दविग्रहम् ।
कुर्वेऽहमतिसंक्षेपाद्ब्रह्मसूत्रस्य चन्द्रिकाम् ॥

अथातो ब्रह्मजिज्ञासा—

अथ नित्यानित्यवस्तुविवेकैहिकामुष्मिकफलभोगविरागशमदमादिसम्पन्मुमुक्षात्मकसाधनचतुष्टयसम्पत्त्यनन्तरम् । अतः स्वर्गादिकर्मफलस्यानित्यताया मोक्षनित्यतायाश्च श्रुत्यादिसमधिगम्यत्वेन साधनचतुष्टयसम्पत्तेस्सम्भवात् । ब्रह्मजिज्ञासा ब्रह्मविचारः कर्तव्य इत्यर्थः ।

**End:**

एतस्मादपि हेतोरनुशयिनां व्रीह्यादिशरीरं न सुखदुःखभोगायतनं प्रभवतीति गम्यत इत्यर्थः ॥

इदं सूत्रचतुष्टयमेकमधिकरणम् । अस्मिन् पादे सूत्राणि सप्तविंशतिः । अधिकरणानि षट् ॥

**Colophon:**

इति ब्रह्मसूत्रचन्द्रिकायां तृतीये साधनाध्याये वैराग्यपादः प्रथमः ॥

---

## No. 4659. ब्रह्मसूत्रभाष्यम्.
## BRAHMASŪTRABHĀṢYAM.

Substance, paper. Size, $11\frac{1}{4} \times 7\frac{1}{8}$ inches. Pages, 418. Lines, 21 on a page. Character, Telugu. Condition, injured. Appearance, not new.

Written on one side only.

The well-known commentary of Śaṅkarācārya on the Brahmasūtras.

Continued in the next volume. This volume contains the commentary on the first Adhyāya and the first Pāda of the second Adhyāya.

The second volume opens with the second Pāda and goes on to the end.

**Beginning:**

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभाव-योरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासस्तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम् । तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मो(र्मां)श्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तस्सत्यानृते मिथुनीकृत्याहमिदं ममेति नैसर्गिकोऽयं लोकव्यवहारः । आह—कोऽयमध्यासो नामेति । उच्यते—स्मृतिरूपः परत्र पूर्वदृष्टावभासः । तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति । केचित्तु—यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति । अन्ये तु—यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते ।

* * * *

यथा चायमर्थस्सर्वेषां वेदान्तानां, तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः । अस्य च वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्य इदमादिमं सूत्रम्—

अथातो ब्रह्मजिज्ञासा ।

त(अ)त्राथशब्दः आनन्तर्यार्थः परिगृह्यते, नाधिकारार्थः; ब्रह्मजिज्ञासाया अनधिकार्यत्वात् । मङ्गलार्थस्य च वाक्यार्थेन समन्वयाभावात् अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति ।

For the end, see under the next number.

## No. 4660. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Pages, 394. Lines, 24 on a page.

Begins on fol. 1*b* of the MS. described under No. 4649.

From the second Pāda of the second Adhyāya to the end.

Same work as the above.

For the beginning, see under the previous number.

**End:**

तदाश्रयणेनैव हि सगुणशरणिनामप्यनावृत्तिसिद्धिरिति । अनावृत्ति-
श्शब्दादनावृत्तिश्शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ॥

**Colophon:**

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्करभगवतः कृतौ श्रीम-
च्छारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

समाप्तोऽयं शङ्करभाष्यरूपो ग्रन्थः ॥

## No. **4661.** ब्रह्मसूत्रभाष्यम्.

### BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf (Śrītāla). Size, $19\frac{3}{8} \times 2$ inches. Pages, 386. Lines, 10 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

## No. **4662.** ब्रह्मसूत्रभाष्यम्.

### BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 508. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhagavadgītā-bhāṣya 255*a*.

Folios 226 to 338 are lost; otherwise complete.

Same work as the above.

## No. 4663. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Pages, 148. Lines, 24 on a page.

Begins on fol. 25*a* of the MS. described under No. 2287.

From the beginning to the end of the 27th Sūtra of the third Pāda of the first Adhyāya; breaks off in the course of the comment on the 28th Sūtra.

Same work as the above.

---

## No. 4664. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Pages, 88. Lines, 6 on a page.

Begins on fol. 50*a* of the MS. described under No. 1249.

The first leaf is wanting. Breaks off in the course of the comment on the 18th Sūtra of the first Pāda of the first Adhyāya.

Same work as the above.

## No. 4665. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 192. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

From the first Adhyāya to the end of the first Pāda of the second Adhyāya.

Same work as the above.

---

## No. 4666. ब्रह्मसूत्रभाष्यव्याख्या—पञ्चपादिका.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : PAÑCAPĀDIKĀ.

Substance, palm-leaf. Size, 18½ × 1¼ inches. Pages, 49. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Mānasāra 26*a*.

Even the first Pāda of the first Adhyāya is incomplete.

A commentary on the Brahmasūtrabhāṣya of Śaṅkarācārya : by Padmapādācārya.

**Beginning:**

अनाद्यानन्दकूटस्थज्ञानानन्तसदात्मने ।
अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः ॥
नम(:)श्रुतिशिरःपद्मषण्डमार्ताण्डमूर्तये ।
बादरायणसंज्ञाय मुनये शमवेश्मने ॥

नमाम्यभोगिपरिवारसम्पदं निरस्तभूतिमनु(पु)मर्धविग्रहम् ।
अनुग्रमुन्मृदितकाळलाञ्छनं विनाविनायकमपूर्वशङ्करम् ॥

यद्वक्त्रमानससरःप्रतिलब्धजन्म-
भाष्यारविन्दमकरन्दरसं पिबन्ति ।
प्रत्याशमुन्मुखविनीतविनेयभृङ्गा-
स्तान् भाष्यवित्तकगुरून् प्रणमामि मूर्ध्ना ॥

(पदा)दिवृत्तभारेण गरिमाणं बिभर्ति यत् ।
भाष्यं प्रसन्नगम्भीरं तद्व्याख्यां श्रद्धयारभे ॥

युष्मदस्मदित्याद्यहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इत्यन्तं भाष्यम् । अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इत्यनेन पर्यवस्यच्छास्त्रस्य विषयः प्रयोजनं चार्थात्प्रथमसूत्रेण सूत्रिते इति प्रतिपादयति । एतच्च तस्मात् ब्रह्म जिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरं दर्शयिष्यामः ।

**End:**

नन्वेतत्सूत्रं श्रवणविधिमूलमिति कथं गम्यत इति तत्राह—श्रुतिसूत्रयोरिति । "तद्विजिज्ञासस्व, श्रोतव्यः" इत्यादिश्रुतौ सूत्रे विचारकर्तव्यतापरत्वस्य(।)विशेषादित्यर्थः । श्रवणस्याङ्गित्वं मननादेरङ्गत्वं चो-

त्तम्; तत्र वैपरीत्यं किं न स्यादित्यत आह—मननेति । आत्मैकत्वविद्याप्रतिपत्तय इत्येतद्व्याख्यानसमये वक्ष्यत इत्यर्थः । ननु श्रवणे विधेरेवासम्भवात्कथं तन्मूलं सूत्रमिति चोदयति—ननु श्रोतव्य इति । किमपूर्वविधिः? उत नियमः? आहो परिसङ्ख्याविधिः? इति विकल्प्याद्यं दूषयति—श्रवणादीनामिति.

---

## No. 4667. पञ्चपादिकाविवरणम्.

## PAÑCAPĀDIKĀVIVARAṆAM.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 446. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

An explanatory gloss on the Pañcapādikā of Padmapādācārya; by Prakāśātman.

Complete.

**Beginning:**

पालने विमलसत्त्ववृत्तये जन्मकर्मणि रजोजुषे लये ।
तामसाय जगतः पराकृतद्वैतजालवपुषे नमस्सते ॥

यस्याः प्रसादमवलम्ब्य जगद्गुरूणामप्यस्खलद्वहुगुणाः प्रसरन्ति वाचः ।
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा भूयात्समग्रवरदैव सरस्वती नः ॥

* * * *

उद्धृत्य वेदपयसः कमलामिवाब्धेरालिङ्गिताखिलजगत्प्रभवैकमूर्तिम् ।
विद्यामशेषजगतां सुखदामदाद्यः तं शङ्करं विमलभाष्यकृतं नमामि ॥

वन्दे तमात्मसम्बुद्धस्फुरद्ब्रह्मावबोधतः ।
अर्थतोऽपि न नाम्नैव यें(योऽ)नन्यानुभवो गुरुः ॥

प्रकाशात्मयतिस्सम्यक् प्राप्तं विद्याशुशुत्सया ।
यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकाम् ॥

विदितसकलवै(वे)द्यैर्न प्रशंसन्ति लोके
प्रथितमपि महद्भिः किं पुनर्मादृशे नः ।
इति विफलसमेऽस्मिन् वाग्व्ययेऽहं प्रवृत्तः
स्वमतिविमलतायै क्षन्तुमर्हन्ति सन्तः ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चाभिलषितदेवतापूजानमस्कारः कर्तव्यः । शास्त्रार्थश्च तत्त्वम्पदार्थविवेकोपायलभ्यः प्रत्यग्ब्रह्मणोरेकत्वलक्षणः सङ्क्षेपतो दर्शनीयः; कृत्स्नस्य भाष्यस्य तत्र तात्पर्यकथनायेति तदुभयं श्रुत्यर्थाभ्यां सङ्क्षेपतो दर्शयति—अनाद्यानन्देति । कृत्स्नस्य भाष्यस्य ब्रह्मात्मैकत्वे तात्पर्यमत्र प्रदर्शितम्; उत्तरत्र विभज्य तात्पर्यप्रदर्शनात् ।

**End:**

तस्मिंश्चापरोक्ष्येऽवभासमाने प्रमाण(प्रमा)त्राद्यपायात् सर्वो व्यवहारो निवर्तेत इति श्लोकार्थः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्यानुभवपूज्यपादशिष्यस्य प्रकाशात्मभगवतः कृतौ पञ्चपादिकाविवरणे समन्वयसूत्रं समाप्तम् ॥

विवरणं समाप्तम् ॥

---

## No. 4668. पञ्चपादिकाविवरणम्.

## PAÑCAPĀDIKĀVIVARAṆAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 260. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

The first three Varṇakas complete, and the 4th incomplete.

Wants beginning.

Same work as the above.

## No. 4669. पञ्चपादिकाविवरणम्—भावप्रकाशिका.

## PAÑCAPĀDIKĀVIVARAṆAM : BHĀVAPRAKĀŚIKĀ.

Pages, 300. Lines, 7 on a page.

Begins on fol. 45*a* of the MS. described under No. 4120.

Complete.

Similar to the above.

By Nṛsiṁhāśramamuni, a disciple of Jagannāthāśrama.

**Beginning :**

यत्सत्यचैतन्यसुखानुलिप्तं विश्वं हि तत्स्फारमितीव भाति ।
स मां निरस्ताखिलभेद आत्मा पायादबोधाद्विपदो नृसिंहः ॥
श्रीमद्गुरुपदद्वन्द्वमद्वैतात्मप्रसिद्धये ।
. . . . यान्निगूढात्मन् जनं परम् ॥
श्रीमद्गुरुकृपालेशादद्वैतब्रह्मगोचरे ।
क्वचित्क्वचिद्विवरणे गूढो भावः प्रकाश्यते ॥

निर्विशेषब्रह्मप्रतिपादकग्रन्थकरणस्य तत्प्रतिपत्तिं विनायोगात् तस्याश्च यमेव वृणुते तेन लभ्य इत्यादिशास्त्रात्परमात्मप्रसादा . . . . . . . . योजने दर्शयन् परमात्मानं नमस्कारोति—पालन इति। सते परमात्मने तस्मै न कदाचिदपि केनापि बाधाभावेन तदयोग्यतया सत्पदार्थत्वात्। नमः स्वापकर्षबोधानुकूलो व्यापारविशेषः। अस्त्विति शेषः। ननु नमस्कर्तुरसत्त्वे मुक्त्ययोगात् तदर्थात्मज्ञानतत्त्व . . . . ग्रन्थकरणतद्धेत्वात्मविद्यावैयर्थ्येन तदङ्गनमस्कारवैयर्थ्यात् ।

**End :**

प्रस्तोष्यमाणवर्णकस्य अनन्तरवर्णकापद(वश्य)वक्त(व्य)मर्थमाह—लोके पदानामित्यादिना ।

अत्र च ग्रन्थकारस्याशय . . . . . . लिख्यते—
अहं . . . . विहारदूरं परमात्म(त)त्त्वम् ।
अहो गुरूणां चरणारविन्दप्रभावभाजां सुलभं समस्तम् ॥

क्वतिरियमनवद्या नैव वासीन्न जाने मम हृदयनिबद्धो यस्तमोदूरचारी ।
. . . . . न्मां चकास्ति नरमृगवपुरीशो दृग्भिरेनां पुनातु ॥

यदि च विकृतिरत्राल्पीयसी भूयसी वा कियदपि मम नैनस्संस्तवो वा गुणेन ।
अपितु भवत एतौ किं ग्रहग्रस्त . . . तत्र वेदाः प्रमाणम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्यनृसिंहाश्रममुनिविरचितायां पञ्चपादिकाविवरणभावार्थप्रकाशि . . . स्समाप्तः ॥

No. **4670.** पञ्चपादिकाविवरणव्याख्यानम्—तत्त्वदीपनम्.

PAÑCAPĀDIKĀVIVARAṆAVYĀKHYĀNAM: TATTVADĪPANAM.

Substance, palm-leaf. Size, 17⅝ × 1⅜ inches. Pages, 58. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the 9th Varṇaka only: complete.

A commentary on the Pañcapādikāvivaraṇa of Prakāśatman; by Akhaṇḍānanda-muni.

**Beginning:**

ज्ञानसाध्यत्वं वक्तव्यम्; न च तदुपपद्यते; ज्ञानस्य ज्ञेयनिश्चायकत्वादित्याशयेन शङ्कते—ननु ज्ञानेति । किं तत्र मुख्यसाध्यत्वस्यासम्भवश्चोद्यते उतामुख्यस्य? आद्यस्त्वङ्गीक्रियत इत्याह—तत्राहेति ।

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्याखण्डानन्दानुभूतिपूज्यपादशिष्येण अखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपने अष्टमवर्णकं समाप्तम् ॥

भूतार्थप्रतिपादने प्रयोजनाभावात् सापेक्षत्वप्रसङ्गाच्च विधिशेषतयैव वेदस्य प्रामाण्यं पूर्वं प्रत्यक्षेपि; तत्रापि विधिशेषत्वशङ्का प्रतिक्षिप्यत इति पौनरुक्त्यमाशङ्क्य वृत्तानुद्रवणपुरस्सरं प्रमेयभेदं दर्शयति—लोक इत्यादिना । सिद्धे सङ्गत्यग्रहणादेवाबोधकत्वं नेत्याह—भूत इति ।

**End:**

तर्हि हिरण्यदा अमृतत्वं भजन्त इति श्रुतिबलात् कर्मणैव मोक्ष इति शङ्कां निरस्यति—फलेति । ज्ञानोत्तरकालमपि प्रमातृत्वं किं न स्यादित्याशङ्क्यान्तःकरणैक्याध्यासंसाधनं तस्मिन्नसत्येव भवतीति, नान्यथेत्यभिसन्धायाह—तदेवेति । ज्ञाने सत्यपि प्रमातृत्वादिकं दृष्टमित्याशङ्क्य तात्पर्यमाह—अद्वितीयेति । सकलशास्त्रव्यवस्थासिद्ध्यर्थं सोपाधिकं निरुपाधिकं चानूदितमिति द्रष्टव्यम् ॥

तत्त्वदीपनमालेयं भवपादसमर्पिता ।
विदुषां प्रीणनायास्तु तर्कमौक्तिकभास्वरा ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्याखण्डानन्दानुभूतिपूज्यपादशिष्येणाखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपने समन्वयसूत्रं समाप्तम् ॥

---

## No. 4671. ब्रह्मसूत्रभाष्यव्याख्यानम्–ब्रह्मविद्याभरणम्.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀNAM : BRAHMAVIDYĀBHARAṆAM.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 34. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, not very old.

From the end of the 2nd Pāda to the beginning of the 3rd Pāda of the first Adhyāya.

A gloss on Śaṅkarācārya's commentary on the Brahmasūtra: by Advaitānanda, a disciple of Rāmānandatīrtha, who was himself a disciple of Bhūmānanda.

**Beginning :**

. . त्रे पूर्वपक्षे(तु) दृश्यत्वादिपदानां प्रधानविषयत्वादेतत्प्रकरणे प्रतिपाद्यमानस्य परमात्मनो निर्विशेषता न सिध्यति । सिद्धान्ते तु परमात्मविषयतया निर्विषयतासिद्धिसविशेषप्रधानेऽपि पादे निर्विशेषवाक्यविचारः सङ्गतिविशेषात् प्र(कृ)त(:) । सा च सङ्गतिरपि पूर्वत्रादृष्टत्वाद्यभिलापसम्भवेऽपीत्यादिवाक्येन भाष्य एव पूर्वपक्षावसरे दर्शिता ॥

* * * *

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भूमानन्दशिष्यरामानन्दतीर्थमुखारविन्दनिर्गतशारीरकसूत्रभाष्यार्थस्वर्धुनीप्रवाहनिमज्जनमहितस्याद्वैतानन्दस्य कृतौ शारीरकभाष्यव्याख्यायां ब्रह्मविद्याभरणाभिधायां प्रथमस्याध्यायस्य द्वितीयः पादः ॥

**End :**

वाक्यार्थस्य लिङ्गविशेषेण वचनविशेषेण चाप्रस्तुतत्वात् । यदि त्वथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सर्वान्का.

## No. 4672. ब्रह्मसूत्रभाष्यव्याख्या—भामती.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀMATĪ.

Substance, palm-leaf (Śrītāla). Size, 16½ × 2 inches. Pages, 293. Lines, 10 on a page. Character, Telugu and Grantha. Condition, slightly injured. Appearance, old.

The first and second Pādas of the first Adhyāya complete ; the third Pāda incomplete.

A commentary on the Brahmasūtrabhāṣya of Śaṅkarācārya ; by Vācaspati-miśra.

**Beginning :**

अनिर्वाच्याविद्याद्वितयसाचिवस्य प्रभवतो
विवर्ता यस्यैते वियदनिलतेजोऽबवनयः ।

यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं
नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥
निश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि ।
स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रळयः ॥
षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥
मार्ताण्डतिलकस्वामिमहागणपतीन् वयम् ।
विश्ववन्द्यान् नमस्यामः सर्वसिद्धिविधायिनः ॥
ब्रह्मसूत्रकृते तस्मै व्यासायापरवेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥
नत्वा विशुद्धविज्ञानं शङ्करं करुणानिधिम् ।
भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥
आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् ।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥

अथ यदसन्दिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरम्; यथा समनस्केन्द्रियसन्निकृष्टस्फीतालोकमध्यवर्तिघटः करटदन्ता वा तथा चेदं ब्रह्मेति व्यापकविरुद्धोपलब्धिः ।

See under the next number for the end.

## No. 4673. ब्रह्मसूत्रभाष्यव्याख्या—भामती.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀMATĪ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 350. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

In the first Adhyāya, the first two Pādas complete, but the third Pāda incomplete; in the second Adhyāya, the first Pāda complete though the beginning is wanting, the second Pāda incomplete.

Same work as the above.

See under the previous number for the beginning

**End :**

**Colophon :**

इति श्रीमद्वाचस्पतिमिश्रविरचिते श्रीशङ्करभगवत्पादकृतशारीर(क)-भाष्यविभागे द्वितीयस्याध्यायस्य प्रथमः पादः ॥

* * * *

नासतो दृष्टत्वात् । इतश्चानुपपन्नो वैनाशिकसमय इति । अस्थि-रात् कार्योत्पत्तिमिच्छन्तो वैनाशिका अर्थादभावादेव भावोत्पत्तिमाहुः । उक्तमेतदधस्तात् । निरपेक्षात्कार्योत्पत्तौ पुरुषकर्मवैयर्थ्यम् ; नापेक्षतायाश्च क्षणस्याभेद्य . . . नोपकृतत्वानुपपत्तेरनुपकारिणि चापेक्षानुपपत्तेरक्षणि-कत्वप्रसङ्गः । सापेक्षत्वानपेक्षत्वयोश्चान्यतरनिषेधस्यान्यतरविधान.

## No. 4674. ब्रह्मसूत्रभाष्यव्याख्या–भामती.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀMATĪ.

Substance, palm-leaf. Size, 18¾ × 1⅜ inches. Pages, 264. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

The first twenty leaves are lost; so the codex begins in the course of the Janmādyadhikaraṇa.

Contains the first Adhyāya.

Same work as the above.

---

## No. 4675. ब्रह्मसूत्रभाष्यव्याख्या–भामती.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀMATĪ.

Substance, paper. Size, 11¼ × 7 inches. Pages, 220. Lines, 21 on a page. Character, Telugu. Condition, injured. Appearance, not new.

To the end of the 8th Sūtra of the second Pāda of the first Adhyāya.

Same work as the above.

## No. 4676. ब्रह्मसूत्रभाष्यव्याख्या—भामती.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀMATĪ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 274. Lines, 8 on a page. Character, Telugu. Condition, fair. Appearance, old.

The first Pāda of the first Adhyāya complete ; the second Pāda incomplete.

Same work as the above.

## No. 4677. भामतीव्याख्या—वेदान्तकल्पतरुः.

## BHĀMATĪVYĀKHYĀ : VĒDĀNTAKALPATARUḤ.

Substance, palm-leaf. Size, $19\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 230. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the first Adhyāya only : complete.

A commentary on the Bhāmatī of Vācaspati-Miśra : by Amalānanda.

**Beginning :**

यदज्ञातं जीवैर्बहुविधजगद्विभ्रमधरं
वियद्यद्वद्वालैस्स्थलमलिनतायोगि कलितम् ।
तम(मु)न्निद्रज्ञानप्रततसुखसद्ब्रह्म परमं
नमस्यामः प्रत्यक्छ्रुतिशतशिरोभिः प्रकटितम् ॥

* * * *

वेदान्तार्थतदाभासक्षीरनीरविवेकिनम् ।
नमामि भगवत्पादपरहंसधुरन्धरम् ॥

स्वयम्प्रभसुखं ब्रह्म दयारचितविग्रहम् ।
यथार्थानुभवानन्दपदगीतं गुरुं न(नु)मः ॥

विद्याप्रश्रयसंयमाश्शुभफला यत्सन्निधिस्थानतः
पुंसां हस्तगता भवन्ति सहसा कारुण्यवीक्षावशात् ।
आनन्दात्मयतीश्वरं तमनिशं वन्दे गुरूणां गुरुं
लब्धं यत्पदपद्मयुग्ममनघं पुण्यैध(र)नन्तैर्मया ॥

ग्रन्थग्रन्थ्यभिधास्स्फुटन्ति मुकुला यस्योदये कौमुदा
व्याकुर्वत्यपि यत्र मोहतिमिरं लोकस्य संशाम्यति ।
प्रोद्यत्तारकदिव्यदीप्तिपरमव्योमापि नी(राज्य)ते
गोभिर्यस्य सुखप्रकाशशशिनं तं नौमि विद्यागुरुम् ॥

वैदिकमार्गे वाचस्पतिरपि (सम्यक्) सुरक्षितं चक्रे ।
नयविजितवादिदैत्यस्स जयति विबुधेश्वराचार्यः ॥

रूढोऽयं वेदकाण्डान्नयमयविटपो भूरिशाखाविचारः
सद्वर्णानन्तपर्णस्समुदितपरमब्रह्मबोधप्रसूनः ।
साक्षाद्धस्ताप(चे)यं ददमृतफलं जीवविश्वेशवीन्द्रः
संसारार्कोत्थतापप्रशमननिपुणस्तन्यते कल्पवृक्षः ॥

श्रीमच्छारीरकमीमांसाव्याख्यायाः प्रारिप्सिताया अविघ्नपरिसमाप्त्यादिसिद्धये शास्त्रप्रतिपाद्यां परां देवतां प्रणमन् शास्त्रीयं विषयादि दर्शयति—अनिर्वाच्येति ।

एका हि या अविद्या सानादिभावरूपा देवताधिकरणे वक्ष्यते; अन्या पूर्वपूर्वभ्रमसंस्कारः । तदविद्याद्वयं सत्यासत्याभ्यामनिर्वाच्यं सचिवस्सहकारी यस्य तत्र ।

**End :**

इह खल्वेकविज्ञानात्सर्वविज्ञानं प्रतिज्ञातं नासदादिषु परेषु कल्पते; अतो न किश्चनेत्यनभिव्यक्तिरणिम्न इति सूक्ष्मता चोक्तेति । अध्यायार्थं

सङ्कलयति—प्रतिज्ञेति प्रथमसूत्रे, विचारप्रतिज्ञालक्षणं, द्वितीये, लक्ष्यमानं तृतीये, समन्वयः चतुर्थे, सर(र्वे)तत्रैवेति । शिष्टायां . . . . . द्यां नान्यत्रेति । चतुर्थपाद इत्येतत्सर्वमध्यायेन साधितमित्यर्थः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकश्रीमदनुभवानन्दपूज्यपादशिष्यभगवदमलानन्दविरचिते प्रथमाध्यायस्य चतुर्थः पादः ॥

No. **4678.** वेदान्तकल्पतरुव्याख्या—परिमलः.

VĒDĀNTAKALPATARUVYĀKHYĀ : PARIMALAḤ.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 350. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

The third and fourth Pādas of the first Adhyāya complete; the first Pāda of the second Adhyāya incomplete; in the third Adhyāya the third Pāda complete, but the fourth Pāda incomplete.

A commentary on the Kalpataru of Amalānanda; by Appayadīkṣita.

**Beginning:**

. . . णि विरोध इहापि तुल्यः । असम्भवत्वपरिहारश्चेति विशेषः । न हि विग्रहवत्या देवताया इव . . . . . . . . वताया विग्रहभेदैरनेकत्र क्रतुदेशे सन्निधानमुपपादयितुमशक्यम् । न च विग्रहवतोऽङ्गस्य सन्निधाननियमः; विग्रहरहितस्यापि . . . सादेस्सन्निधाननियमदर्शनेन विशेषणवैयर्थ्यात् । उक्तनियमस्य प्रवसद्यजमाने व्यभिचारेण विग्रहरहिताङ्गस्य सन्निधाननियमदर्शनाच्च ॥

* * * *

**Colophon:**

इति वेदान्तकल्पतरुपरिमले प्रथमस्याध्यायस्य तृतीयः पादः ॥

* * * *

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोः अप्पयदीक्षितस्य कृतौ श्रीवेदान्तकल्पतरुपरिमले तृतीयाध्यायस्य तृतीयः पादः ॥

**End:**

आरण्यु(ण्यको)पनिषदि त्रिदण्डत्यागपूर्वकमेकदण्डग्रहणस्योक्तत्वाच्च—

"त्रिदण्डस्य परित्याग एकदण्डस्य धारणम् ।
एकस्मिन् दृश्यते वाक्ये तस्मादस्य प्रधानता ॥"

इति व्यासस्मृतावारण्यु(ण्यको)पनिषद्वचनावत्व(ल)म्बनेनैव परमहंसानामेकदण्डस्यामुख्यत्वशङ्काया निराकृतत्वाच्च । तस्मात्तदमुख्यत्वस्मरणं कुटीचकादिविषयं योज्यम् । तथा सति पलाशं बैल्वमौदुम्बरदण्डमजिनम्.

---

No. **4679.** ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ:
BHĀṢYARATNAPRABHĀ.

Substance, paper. Size, $11\frac{1}{8} \times 4\frac{7}{8}$ inches. Pages, 276. Lines, 12 on a page. Character, Telugu. Condition, fair. Appearance, old.

Adhyāyas 1 and 2 complete.

Breaks off in the first Pāda of the third Adhyāya.

A commentary on the Brahmasūtrabhāṣya of Śaṅkarācārya; by Gōvindānanda.

**Beginning:**

यमिह कारुणिकं शरणं गतोऽप्यरिसहोदर आप महत्पदम् ।
तमहमाशु हरिं परमाश्रये जनकजाङ्कमनन्तसुखाकृतिम् ॥

श्रीगौर्या सकलार्थदं निजपदाम्भोजेन मुक्तिप्रदं
प्रौढं विघ्नवनं हरन्तमनघश्रीढुण्डितुण्डासिना ।

वन्दे चर्मकपालिकोपकरणैर्वैराग्यसौख्यात्परं
नास्तीति प्रदिशन्तमन्तविधुरं श्रीकाळिकेशं शिवम् ॥

यत्कृपालवमात्रेण मूको भवति पण्डितः ।
वेदशास्त्रशरीरां तां वाणीं वीणाकरां भजे ॥

कामाक्षीदत्तदुग्धप्रचुरसुरनुतप्राज्यभोज्याधिपूज्य-
श्रीगौरीनायकाभिन्प्रकटनशिवरामार्थलब्धात्मबोधैः ।

श्रीमद्गोपालसद्भिः प्रकटितपरमाद्वैतभासा सितास्य-
श्रीमद्गोविन्दवाणीचरणकमलगो निर्वृतोऽहं यथाळिः ॥

मोक्षपुर्यां श्रीकाञ्च्यां कामाक्ष्या दत्तं पायसं देवैरपि स्तुतं प्राज्यं सम्पूर्णं प्रकृष्टाज्ययुक्तं वा यद्भोज्यमन्नं तेनाधिपूज्याः श्रीशिवरामयोगिनः । किञ्च शिवश्चासौ रामश्चेति स्वनाम्ना श्रीगौरीनायकयोरभेदं प्रकटयति । तेभ्यो गुरुभ्यो लब्ध आत्मबोधो यैः श्रीमद्गोपालसरस्वतीभिरित्यर्थः ।

श्रीशङ्करं भाष्यकृतं प्रणम्य व्यासं हरिं सूत्रकृतं च वच्मि ।
श्रीभाष्यतीर्थे परहंसतुष्ट्यै वाग्जालबन्धच्छिदमभ्युपायम् ॥

अत्र भाष्ये कठिनवाग्रूपेण जालेन यो बन्धः जालबन्धः । पक्षिणामिव परमहंसानां क्लेशसन्नाशकमभीष्टमुपायं वच्मीत्यर्थः ॥

विस्तृतग्रन्थवीक्षायामलसं यस्य मानसम् ।
व्याख्या तदर्थमारब्धा भाष्यरत्नप्रभाभिधा ॥

श्रीमच्छारीरकं भाष्यं प्राप्य वाक् शुद्धिमाप्नुयात् ।
इति श्रमो मे सफलो गाङ्गं रथ्योदकं यथा ॥

यदज्ञानसमुद्भूतमिन्द्रजालमिदं जगत् ।
सत्यज्ञानसुखानन्तं तदहं ब्रह्म निर्भयम् ॥

इह खलु स्वाध्यायोऽध्येतव्य इति नित्याध्ययनविधिनाधीतसाङ्ग-स्वाध्याये तद्विजिज्ञासस्व, सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः आत्मा वारे द्रष्टव्यः श्रोतव्य इति श्रवणविधिरुपलभ्यते । तस्यार्थः—अमृतत्वकामेनाद्वैतात्मविचार एव वेदान्तवाक्यैः कर्तव्य इति ।

* * * *

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोविन्दानन्दभगवत्कृतौ शारीरकव्याख्यायां भाष्यरत्नप्रभायां द्वितीयस्याध्यायस्य चतुर्थः पादः ॥

See under the next number for the end.

## No. 4680. ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀṢYARATNAPRABHĀ.

Substance, paper. Size, 13¼ × 8½ inches. Pages, 262. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the third and fourth Adhyāyas complete.

Same work as the above.

See under the previous number for the beginning.

**End:**

इह सूत्रस्यैवाभ्यासाच्छास्त्रसमाप्तिर्द्योत्यत इत्याह—अनावृत्तिश्शब्दादिति । एवं समायो(सो)क्त्या ब्रह्मात्मैक्यस्य वेदान्तप्रमाणकत्वमवधारितम्; वाक्यार्थज्ञाने स्मृतितर्कादिसर्वप्रकाररोधस्स(म्यक्) परिहृतः; साधनसम्पत्तिश्च दर्शिता । तस्माद्विवेकादिसाधनसम्पन्नस्य श्रवणाद्यावृत्तिनिरस्तप(प्र)तिबन्धस्याखण्डात्मबोधात् समूलबन्धध्वंसे सत्याविर्भूतनिष्कलङ्कानन्तसम्प्रकाशचिदानन्दात्मनावस्थानमिति सिद्धम् ॥

नानाविधग्रन्थजातं वीक्ष्य सम्यग्यथामति ।<br>
शारीरकस्य भाष्यस्य कृता व्याख्या सतां मुदे ॥

अन्तर्यामी जगत्साक्षी सर्वकर्ता रघूद्वहः ।
अतो . . . त्य स्यादेष ह्येवेति शासनात् ॥
वक्षस्यक्ष्णोश्च पार्श्वे करतलयुग(ले)कौस्तुभाभां दयां च ।
सीतां कोदण्डदीक्षा . . . . तां वीक्ष्य रामाङ्गसङ्गां
स्वस्याः क स्यादितीत्थं हृदि कृतमनना भाष्यरत्नप्र.

## No. 4681. ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀṢYARATNAPRABHĀ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 104. Lines, 9 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains the first Pāda of the first Adhyāya.

Same work as the above.

## No. 4682. ब्रह्मसूत्रभाष्यव्याख्या—भाष्यरत्नप्रभा.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : BHĀṢYARATNAPRABHĀ.

Substance, palm-leaf. Size, 16¼ × 1⅜ inches. Pages, 96. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Taittirīyōpaniṣadvyākhyā 49*a*.

Incomplete.

Same work as the above.

## No. 4683. ब्रह्मसूत्रभाष्यव्याख्या—शारीरकन्यायनिर्णयः.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚĀRĪRAKANYĀYANIRṆAYAḤ.

Pages, 108. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 331.

The first Adhyāya incomplete.

A commentary on the Brahmasūtrabhāṣya of Śaṅkarācārya; by Ānandagiri.

**Beginning:**

अध्यस्तान्ध्यमपूर्वमर्थधिषणैर्ग्राह्यं पुमर्थास्पदं
लक्ष्यं लक्षणभेदतः श्रुतिगतं निर्धूतसाध्यार्थकम् ।
आम्नायान्तविभातविश्वविभवं सर्वाविरुद्धास्पदं
शक्तच(सत्यं)ज्ञानमनर्थसार्थविधुरं ब्रह्म प्रपद्ये सदा ॥

श्रुत्वाभक्तंविरो(श्रद्धाभक्ती पुरो)धाय विधायागमभावनाम् ।
श्रीमच्छारीरिके भाष्ये करिष्ये न्यायनिर्णयम् ॥

नित्याध्ययनविध्युपादापितवेदान्तवचोभिरापाततः प्रतिपन्नं शास्त्रारम्भौपयिकमनुबन्धजातं न्यायतो निर्णेतुं भगवान् बादरायणः सूत्रितवान्—अथातो ब्रह्मजिज्ञासेति । तेन मातृत्वादिबन्धस्याध्यासत्वं धर्ममीमांसया गतार्थत्वाभावो विशिष्टाधिकारिसम्भवो विषयादिसत्त्वं चेति चत्वारोऽर्थास्सूत्रिताः ।

* * * *

तदिदं हृदि निधाय वेदान्तमीमांसाशास्त्रं व्याख्यातुकामो भगवान् भाष्यकारश्शास्त्रारम्भार्थमाद्यसूत्रेण सूत्रितं विषयादि वदितुं विरोधिनो बन्धस्याध्यासत्वं लक्षणसम्भावनासद्भावप्रमाणैः सिसाधयिषुरादावध्यासमाक्षिपति—युष्मदस्मत्प्रत्ययगोचरयोरित्यादिना मिथ्येति भवितुं युक्तमित्यन्तेन भाष्येण ।

See under the next number for the end.

## No. 4684. ब्रह्मसूत्रभाष्यव्याख्या—शारीरकन्यायनिर्णयः.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚĀRĪRAKANYĀYANIRṆAYAḤ.

Substance, palm-leaf. Size, $19\frac{1}{4} \times 1\frac{3}{4}$ inches. Pages, 300. Lines, 12 on a page. Character, Grantha. Condition, injured. Appearance, old.

From the second Adhyāya to the end of the first Pāda of the fourth Adhyāya. The comment on the last Sūtra of the second Pāda incomplete.

Same work as the above.

See under the previous number for the beginning.

**End :**

न हि कालवादिनी श्रुतिः ; किन्त्वातिवाहिकदेवतार्थेत्यर्थः । काल एवात्र प्राधान्येनोच्यते नातिवाहिकी देवतेति स्मृतिमाश्रित्य शङ्कते— नन्विति । तदुत्तरत्वेन सूत्रमवतारयति—अत्रेति । स्मार्तमुपासनं प्रत्ययं कालभेदविनियोगः स्मार्तोऽभ्युपगम्यते प्रत्यासत्तेरिति व्याचष्टे—योगिन इति । योगी दहराद्युपासक एव किं न स्यात्तत्राह—स्मार्ते चेति । नित्यमग्निहोत्रादीश्वराराधनरूपेण.

## No. 4685. ब्रह्मसूत्रभाष्यव्याख्या—शारीरकन्यायनिर्णयः.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚĀRĪRAKANYĀYANIRṆAYAḤ.

Substance, palm-leaf. Size, $18 \times 1\frac{3}{4}$ inches. Pages, 200. Lines, 12 on a page. Character, Grantha. Condition, injured. Appearance, old.

Transcribed by Anantakṛṣṇa, son of Narasiṁhabhaṭṭa.

The first Adhyāya incomplete.

Same work as the above.

## No. 4686. ब्रह्मसूत्रभाष्यव्याख्या—शारीरकन्यायरक्षामणिः.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚĀRĪRAKANYĀYARAKṢĀMAṆIḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 168. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Breaks off in the course of the comment on the last Sūtra of the second Pāda of the first Adhyāya.

A commentary on the Brahmasūtrabhāṣya of Śaṅkarācārya; by Appayadīkṣita.

**Beginning :**

उद्घाट्य योगकलया हृदयाब्जकोशं
धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपं
श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ॥

यस्याहुरागमविदः परिपूर्णशक्ते-
रंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय-
नारायणीसहचराय नमश्शिवाय ॥

आसेतुबन्धतटमा च तुषारशैला-
दाचार्यदीक्षित इति प्रथिताभिधानम् ।
अद्वैतवित्सुखमहाम्बुधिमग्नभाव-
मस्मत्पितामहमशेषगुरुं प्रपद्ये ॥

यं ब्रह्म निश्चितधियः प्रवदन्ति साक्षात्
तद्दर्शनादखिलदर्शनपारभाजः ।

तं सर्ववेदसमशेषबुधाधिराजं
श्रीरङ्गराजमखिनं गुरुमानतोऽस्मि ॥

वेदविभागविधात्रे विमलाय ब्रह्मणे नमो विश्वदृशे ।
सकलधृतिहेतुपावनसूत्रसृजे सत्यवत्यभिव्यक्तिमते ॥

यन्नानाभाष्यशाखोदितफलवितातिः प्रौढनानारसाढ्या
यस्मिन्मूले निरूढं फलमधिकरसं स्वाद्वनारुह्य लभ्यम् ।

यस्य प्रेक्षेव देहद्वयतदनुगतप्रत्य(ग)र्थी विवेक्त्री
सूत्रात्मा पारिजातः सकलमभिमतं मह्यमर्थं स दद्यात् ॥

नानाभाष्यामृता सा सगुणफलगतिर्वैधविद्याविशेषैः
तद्देशावातपि(प्ति)रम्या सरिदिव सकला यत्र यात्यंशभूयम् ।

तस्मादानन्दसिन्धावतिमहति फले भाविविश्रान्तिमुद्रा
शास्त्रस्योद्घाटिता यैः प्रणमत हृदि तान् नित्यमाचार्यपादान् ॥

अधिगतभिदा पूर्वाचार्यानुपेत्य सहस्रधा
सरिदि(व)महीभागान् संप्राप्य शौरिपदोद्गता ।

जगति भगवत्पादश्रीमन्मुखाम्बुजनिर्गता
जननहरिणी सूक्तिर्ब्रह्माद्वयैकपरायणा ॥

एनां पुराणपदवीमनुसृत्य सत्यामत्यादरेण महितैरनुपाल्यमानाम् ।
शारीरकाभरणभावजुषां नयानां रक्षाकरं(रीं) मणिमनाविलमुल्लिखामि ॥

अमूं शारीरकन्यायकलापपरिकर्मिताम् ।
कुदृष्टिदोषहरणां कण्ठे कुरुत सन्मणिम् ॥

अथातो ब्रह्मजिज्ञासा—

अत्र शास्त्रारम्भोपयोगिब्रह्मात्मैक्यलक्षणविषयप्रयोजनविरोधिनः कर्तृ-

त्वादिबन्धस्य अध्यासात्मकत्वप्रदर्शनेन तदुभयोपपादनद्वारा शास्त्रारम्भ-स्समर्थ्यते ॥

**Colophon:**

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितस्य कृतौ शारीरकन्यायरक्षामणौ प्रथमस्याध्यायस्य प्रथमः पादः ॥

**End:**

आमनन्ति चैनमस्मिन्—

आमनन्ति चैनं परमेश्वरं अस्मिन् मूर्धचुबुकान्तराले सम्पत्त्यधिष्ठानत्वेन पूर्वसूत्रप्रकृते जाबालः . . . . . . . . .
तथापि शाखान्तरे वैश्वानरस्य प्रादेशमात्रत्वं यथोपपादितम्; तथैवच्छान्दोग्येऽपि तत् ग्रहीतुं युक्तमिति.

No. **4687.** **ब्रह्मसूत्रभाष्यम्.**

BRAHMASŪTRABHĀṢYAM.

Substance, paper. Size, $13\frac{3}{8} \times 8\frac{1}{4}$ inches. Pages, 335. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A commentary on the Brahmasūtras; by Bhāskarācārya.

**Beginning:**

जन्मबन्धविनिवृत्तिकारणं ब्रह्मसूत्रमिदमुद्बभौ यतः ।
श्रोतृचित्तकमलैकभास्करं बादरायणमृषिं नमामि तम् ॥

सूत्राभिप्रायसंवृत्त्या स्वाभिप्रायप्रकाशनात् ।
व्याख्यातं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये ॥

अथातो ब्रह्मजिज्ञासा । चतुर्ष्वेथशब्दप्रयोगो दृश्यते ; यथानन्तर्ये— भुक्त्वाथ व्रजति । यथा पूर्वं किञ्चिदुक्त्वा विकल्पान्तरं कर्तुमिच्छ-न्नाह—अथायमभिप्राय इति ।

*   *   *   *

यद्येवं कस्य तर्हि इदमानन्तर्यमुच्यते? नित्यानित्यवस्तुविवेकः, शमदमादिसाधनसम्पत्, इहामु(त्र फल)भोगविरागः, मुमुक्षुत्वं चेति एतत् पूर्ववृत्तम् । एतदानन्तर्यमथशब्देनोच्यते ।

See under the next number for the end.

## No. 4688. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, paper. Size, $9\frac{7}{8} \times 7\frac{5}{8}$ inches. Pages, 164. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

Same work as the above.

See under the previous number for the beginning.

**End :**

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् । ये नाम केचिदर्चिरादिमार्गेण कार्यब्रह्मलोकहिरण्यगर्भप्राप्त्या तदुपासकाः, ये च [ये] तत्सा(तं सा)-क्षात्परमात्मानं प्राप्तुं तदाराधनतत्पराः तेषां सर्वेषामनावृत्तिः कथमव-गम्यते? शब्दात् तयोर्ध्वमायन्नमृतत्वमेतीति । तेषामपु(न)रावृत्तिः तदे-तत्प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त इति इमं तद्ब्रह्मलोकमभि-सम्पद्यते न च पुनरावर्तन इति । वत्सरचक्रं सूर्यमण्डलं वैराजशरीरे तत्र सर्वलोकाः सर्वे वेदाः सर्वदेवाः सा(सं)भूताः । तथा हि मन्त्रवर्णे— प्रचारचक्रे परिवर्तमाने तरन्तीमं तृषिता भुवनानि विश्वेति । तदन्तरा-त्मानं प्रथमं प्राप्य ततः परमात्मानं प्रतिपद्य एकीभूय ब्रह्मगा मोदत इति ॥

**Colophon:**

इति शारीरकमीमांसाभाष्ये भास्कराचार्यप्रणीते चतुर्थोऽध्यायस्समाप्तः ॥

No. **4689.** ब्रह्मसूत्रवृत्तिः.

BRAHMASŪTRAVṚTTIḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 120. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A commentary on the Brahmasūtras by Dharmābhaṭṭa, son of Tirumalacārya and a disciple of Rāmacandrārya who was himself a disciple of Mukundāśrama.

This manuscript is stated to have been transcribed by Addaṅki Nāganna for Avarakalarāju on the eighth day of the dark fortnight of Mārgaśīrṣa in the year Akṣaya.

**Beginning:**

श्रीरामचरणद्वन्द्वमद्वन्द्वानन्दसाधनम् ।
नमामि यद्रजोयोगात्पाषाणोऽपि सुखं गतः ॥
श्रीरामभद्राश्रमपादपद्मं वन्दारुबृन्दारकवृक्षतुल्यम् ।
प्रणम्य सद्यस्सकलार्थसिद्ध्यै लिखामि पाराशरसूत्रवृत्तिम् ॥

नित्याध्ययनविधिनाधीतस्वाध्यायमाज्ञानवन्तं प्रतिपन्नं परमपुरुषार्थकाममैहिकामुष्मिकफलेषु विरक्तमुपलभमानः परमकारुणिको मुनिः सूत्रयामास —

"अथातो ब्रह्मजिज्ञासा" इति ॥

अत्राथशब्देन साधनचतुष्टयसम्पत्त्यानन्तर्यमुच्यते । तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति कर्मफलानामनित्यत्वम् ।

**End:**

ननु यदीश्वरैश्वर्येणातिशयेन सहितं विदुष ऐश्वर्यं सातिशयं तर्हि लौकिकैश्वर(केश्वरवद्)नित्यं स्यात्तथा च विदुषागावृत्तिः प्रसज्येतेत्याशङ्क्य दयासिन्धो(न्धु)र्भगवान् बादरायणस्समाधत्ते—

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ।

येऽर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तास्तेषामनावृत्तिरेव तेषां न पुनरावृत्तिरित्यादिक्रममुक्त्यभिधायकशब्दादित्यर्थः । निर्गुणब्रह्मविदान्त्वावृत्तिशङ्कैव नास्ति । यतस्सगुणविदामपि निर्गुणाश्रयणेनैवानावृत्तिः, नान्यथा । तस्माद्ब्रह्मविदां निरस्तानर्थव्रातस्वप्रभनिरतिशयानन्दात्मनावस्थितिरिति सिद्धम् । सूत्रावृत्तिश्शास्त्रसमाप्तिद्योतनार्था ॥

यस्सर्वैश्श्रुतिवन्दिवन्दिततनुर्मायात्मनिद्रान्तगः
सुप्तोऽस्मिन् भवपट्टणे परिमिते कल्पान्तकल्पान्तरे ।
यस्सर्वापरिपन्थिसाङ्गनयजप्रज्ञाप्रवाहान्तज-
प्रज्ञालभ्यसुखाकृतिः कृतिमिमां रामस्स गृह्णातु नः ॥

अत्राध्यायचतुष्टयार्थस्सूचितः ॥

विदुषां कण्ठभूषेयं मया वृत्तिः कृता प्रभो ।
व्यासवाङ्मणिसन्दब्धा प्रीतये तेऽस्तु सर्वदा ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमुकुन्दाश्रमश्रीचरणशिक्षितस्य श्रीमहोपाध्यायश्रीरामचन्द्रार्यप्रेमास्पदशिष्यस्य तिरुमलाचार्यतनूजस्य धर्माभट्टस्य कृतौ चतुर्था(ध्या)यस्य चतुर्थः पादः ॥

---

## No. 4690. ब्रह्मसूत्रवृत्तिः—ब्रह्मतत्त्वप्रकाशिका.

### BRAHMASŪTRAVṚITTIḤ : BRAHMATATTVA-PRAKĀŚIKĀ.

Pages, 284. Lines, 20 on a page.

Begins on fol. 4*a* of the MS. described under No. 4648.

Complete.

An independent commentary on the Brahmasūtras in accordance with the views of Śaṅkarācārya; by Sadāśivēndra-sarasvatī.

**Beginning:**

आम्नायान्तैकसंसिद्धमादिमध्यान्तवर्जितम् ।
आनन्दघनमापूर्णं किंचिज्ज्योतिरुपास्महे ॥

* * * *

श्रीमद्देशिकपादाब्जपरिचर्याबलादहम् ।
भाष्यानुगां ब्रह्मसूत्रवृत्तिं कुर्वे यथामति ॥

इह खलु भगवान् बादरायणः प्रेक्षावत्प्रवृत्त्यौपयिकमापाततस्त्रय्यन्तवचोभिः प्रतिपन्नमनुबन्धजातं न्यायतो निर्णेतुमिदमारचयाश्चकार— अथातो ब्रह्मजिज्ञासा । अत्राथशब्देन साधनचतुष्टयसम्पत्त्यानन्तर्यमुच्यते । अतश्शब्देन साधनचतुष्टयस्य सम्भावना । ब्रह्मजिज्ञासेत्यनेनाज्ञातत्वेन विषयत्वं ज्ञातत्वेन प्रयोजनत्वञ्च ब्रह्मण उक्तं भवति ।

**End:**

निर्गुणब्रह्मविदां तु आवृत्तिशङ्कैव नास्ति; यतस्सगुणविदामपि निर्गुणाश्रयणेनैवानावृत्तिर्नान्यथा । तस्माद्ब्रह्मविदां निरस्तसमस्तप्रपञ्चस्वप्रकाशचिदेकरसनिरतिशया(न)न्दात्मनावस्थितिरित्यतिशोभनम् । अनावृत्तिश्शब्दादिति सूत्रावृत्तिश्शास्त्रसमाप्तिद्योतनार्थः ॥

यज्ज्ञानाज्जीवतो मुक्तिरुत्क्रान्तिर्गतिरुत्तरा ।
ब्रह्मप्राप्तिः प्रत्यपादि तदस्मिन् ब्रह्म चिद्घनम् ॥

अस्मिन् पादे सप्ताधिकरणानि, सूत्राणि द्वाविंशतिः; अस्मिन्फलाध्याये अष्टत्रिंशदधिकरणानि, सूत्राणि अष्टसप्ततिः । अस्यां शारीरकमीमांसायामधिकरणानि एकाधिकनवत्युत्तरशतम्, सूत्राणि पञ्चपञ्चाशदधिकपञ्चशतम् ।

* * * *

जडः क्वाहं बालः क्व च गहनवेदान्तसरणिः
तथाप्याम्नायार्थे परमशिवयोगीन्द्रकृपया ।
विजानन्व्याख्यानं व्यरचयमहं वेदशिरसः
तदेतत् क्षन्तव्यं मयि सदयदृष्ट्या बुधजनैः ॥

**Colophon;**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीपरमशिवेन्द्रसरस्वतीपादाब्जसेवा-परायणेन श्रीसदाशिवेन्द्रसरस्वत्या विरचितायां ब्रह्मसूत्रवृत्तौ ब्रह्मतत्त्वप्रकाशिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्च फलाध्यायः । समाप्ता च शारीरकमीमांसा ॥

---

## No. 4691. ब्रह्मसूत्रवृत्तिः—ब्रह्मतत्त्वप्रकाशिका.

### BRAHMASŪTRAVṚTTIḤ : BRAHMATATTVA-PRAKĀŚIKĀ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 96. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

From the third Pāda of the third Adhyāya to the end of the third Pāda of the fourth Adhyāya.

Breaks off in the fourth Pāda of the fourth Adhyāya.

Same work as the above.

## No. 4692. ब्रह्मसूत्रभाष्यव्याख्या.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 184. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 7*a* The other work herein is Amṛtabindūpaniṣad 1*a*.

Only the comments on the first four Sūtras complete: the author of this commentary on the Brahma-sūtras is probably a disciple of a Rāmānanda, and it is in accordance with the views of Śaṅkarācārya.

**Beginning:**

वागीशाद्याःसुमनसः . . . तं नमामि गजाननम् ॥

शङ्कराश्लेषविलसदानन्दामृतनिर्भराम् ।
विश्वोत्तंसितपादाब्जां ब्रह्मविद्यां विभावये ॥

वेदान्तनिकुरुम्बेण तात्पर्येण प्रकाशितः ।
स्वात्मानन्दैकरस्येन कल्याणाय शिवोऽस्तु सः ॥

स्वानन्दाम्बुधिमग्नचित्तमनिशं निर्धूतमायामलं
कारुण्यार्जवशान्तिसौरभममुं देव्या गिरां सेवितुम् ।
रामानन्दमुनिं मुनीन्द्रनिकरैरासेवितं सर्वदा
चित्ते सङ्कलयामि वेदशिरसस्तत्त्वावबोधाप्तये ॥

अथातो ब्रह्मजिज्ञासा । अनेन सूत्रेण साधनचतुष्टयसम्पत्त्यनन्तरं ब्रह्म जिज्ञासितव्यमिति प्रतिपाद्यते । एतत्सूत्रावतारिकारूपेण युष्मदस्मत्प्रत्ययगोचरयोरित्यादिना सर्वे वेदान्ता आरभ्यन्त इत्यन्तेन भाष्येण कर्तृत्वादिबन्धस्याक्षेपसमाधानाभ्यां मिथ्यात्वं प्रतिपाद्यते ।

**End:**

ननु लौकिकवैदिकपदार्थानामनृतत्वे तज्ज्ञाने कथं प्रामाण्यबुद्धिरित्यत आह—देहात्मप्र(त्य)यइति । देहात्मज्ञानवदेव तत्र प्रामाण्यबुद्धिः न तु वस्तुगत्या; सा च आत्मनिश्चयात्मकबोधपर्यन्तमनुवर्तत इत्यर्थः ॥

रामानन्दपदाम्भोजपदं(जं प्लवं) कृत्वा मनोहरम् ।
चत्वारोऽप्यर्णवा एते समुत्तीर्णा यथासुखम् ॥

**Colophon:**

इति समन्वयसूत्रम् । समाप्ता चतुस्सूत्रिका ॥
ईक्षतेर्नाशब्दम् । वृत्तानुवादपूर्वकं सङ्गतिमाह.

## No. 4693. ब्रह्मसूत्रोपन्यासः.

## BRAHMASŪTRŌPANYĀSAḤ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{1}{4}$ inches. Pages, 392. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

An independent dissertation on the teaching of the Brahmasūtras in the light of certain commentaries thereon.

By Rāmēśvarabhāratī.

**Beginning:**

बोधानन्दघनाध्यक्षं तालमूषिकवाहनम् ।
जन्मादिविघ्नहर्तारं भजे निजगुरुं सदा ॥
विद्याशङ्करपादाब्जपरागाः पान्तु पावनाः ।
निस्तमस्कसदानन्दसाक्षात्करणहेतवः ॥
नमामि शुद्धविज्ञानमात्मभारतिसद्गुरुम् ।
यस्यावलोकनान्मूको वावदूकत्वमाप्नुयात् ॥
आचार्यभाष्यकृट्टीकातन्निबन्धनसागरात् ।
तदर्थरत्नान्युद्धृत्य सूत्रेषु ग्रथयाम्यहम् ॥

अथातो ब्रह्मजिज्ञासा—

इह खलु सूत्रे सर्वज्ञबादरायणप्रणीतत्वात् आनर्थक्यानुपपत्तेर्निरर्थकसिद्धबोधकत्वानुपपत्तेश्च शास्त्रे पुरुषं प्रत्युपयोगितया कर्तव्येति पदमध्याहर्तव्यम् ।

**End:**

अनुमानस्य क्रममुक्तिप्रतिपादकशब्दविरोधादनुत्थानमिति । सूत्राभ्यासश्शास्त्रपरिसमाप्तौ ॥

**Colophon:**

इति वैयासिकसूत्रोपन्यासे चतुर्थाध्यायस्य चतुर्थः पादः ॥ अध्यायश्च समाप्तः ॥

वैयासिकानां सूत्राणामुपन्यासः कृतो मया ।
अलसानां नृणामेतत्प्रतीतिर्जायतामिति ॥
टीकास्नेहविहीनापि व्याससूत्रार्थदीपिका ।
इयं रामेशभारत्याः कृतिर्विजयतां भुवि ॥

इति श्रीमत्परमहंसपरिव्राजकश्रीरामेश्वरभारतीविरचितो वैयासिकसूत्रोपन्यासः परिसमाप्तः ॥

श्रीमज्ज्ञानेन्द्रगुरूणां(रुराट् )पादपङ्कजषट्पदः ।
गोविन्देन्द्रयतिः प्रीत्यै व्यलिखद्विदुषां मुदा ॥

No. **4694.** ब्रह्मसूत्रोपन्यासः.

BRAHMASŪTRŌPANYĀSAḤ.

Substance, palm-leaf. Size, 13⅝ × 1¼ inches. Pages, 35. Lines, 9 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 16*a*. The other work herein is Vaiyāsikanyāyamālā 1*a*.

Similar to the above.

From the second Sūtra of the fourth Pāda of the fourth Adhyāya to the end.

**Beginning :**

सम्पद्याविर्भावः स्वेन शब्दात् । तृतीये पादे
गतिगन्तव्यगन्तारो नेतारः फलसिद्धये ।
विचारिताश्चतुर्थे तु परापरविदोः फले ॥

विचार्येते—

स एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इत्यत्र प्रागतो निष्पत्तौ निष्पत्तिकर्तृत्वप्रतिपत्तेः ।

**End:**

सूत्राभ्यासश्शास्त्रपरिसमाप्तिद्योतनार्थः ॥

वैयासिकानां सूत्राणामुपन्यासः कृतो मया ।
सर्वेषां विदुषां सम्यक् सूत्रार्थो जायतामिति ॥

टीकादिस्नेहहीनानां व्याससूत्रार्थबोधिनी ।
इयं रामेशभारत्याः कृतिर्विजयतां भुवि ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरभारतीविरचितायां वैयासिकसूत्रोपन्यासव्याख्यायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

## No. **4695.** भेदखण्डनम्.

BHĒDAKHAṆḌANAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 68*b* of the MS. described under No. 4559.

Incomplete.

A refutation of the dualistic view of the universe as held by the Naiyāyika and other schools.

**Beginning:**

चिदानन्दमयं सिद्धं रामब्रह्मेन्द्रयोगिनम् ।
वन्दे निरन्तरं श्रीमदखण्डानन्ददेशिकम् ॥

अद्वैतदीक्षागुरवे रामब्रह्मेन्द्रस्वामिने ।
नमो वेदान्तवेद्याय शङ्कराय नमो नमः ॥

* * * *

समायाद्ब्रह्मणो जातं यत्तस्य जगतस्सदा ।
नामरूपद्वयं मिथ्याकल्पितं रज्जुसर्पवत् ॥

जायते लीयते शश्वत्फेनादिस्तु यथा जले ।
तथा ब्रह्मण्युपादाने नामरूपात्मकं जगत् ॥

**End:**

मायाकोशविनिर्मुक्तस्स जातिर्यदि वर्जितः ।
लक्ष्यार्थस्तत्त्वयोरेकः पूर्णस्स्वात्मैव सर्वदा ॥
निष्प्रपञ्चो निराकारो निर्गुणस्स्वप्रकाशकः ।
एकोऽद्वयोऽव्ययोऽनन्तः पूर्णानन्दस्स्वयं सदा

## No. 4696. भेदधिक्कारः.

## BHĒDADHIKKĀRAḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{3}$ inches. Pages, 22. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1. The other work herein is Bhēdadhikkārasatkriyā 12*a*.

Complete.

Similar to the above.

By Nṛsiṁhāśrama, a disciple of Jagannāthāśrama.

**Beginning:**

वेदान्तवनसञ्चारि नीलाचलगुहाशयम् ।
ज्योतिर्विराजते ध्वस्तमायावरणवारणम् ॥
किं न त्वं नरसिंह एव यदि वा नाहं न नो चेत् कथं
बन्धो मय्यखिलेश्वरे त्वयि विभो किं नास्ति मत्तः परः ।
भूयादर्थवदात्म(बन्ध)हर इत्याद्यं वचोऽपौरुषं
न त्वं नातदहं त्वमेव नृहरे भूयासमात्मंस्त्वयि ॥
हृदयालयमालम्ब्य करुणारससुन्दरम् ।
गुरूणां चरणाम्भोजं कुर्वे भेदस्य धीकृ(धिक्कृ)तिम् ॥

अन्तःकरणातिरिक्तोऽहमिति प्रतीयमानो जीवः परस्मान्न भिद्यते चेतनत्वात् पदार्थत्वाद्वा ब्रह्मवत्, विपक्षे भेदग्राहकप्रमाणाभावात्, अभेदश्रुत्यप्रामाण्यप्रसङ्गाच्च नाप्रयोजकम् । तथा हि—

मानाभावादयुक्तेश्च न भिदेश्वरजीवयोः ।
जीवानामचितां चैव नात्मनो न परस्परम् ॥

**End :**

आस्तामन्यप्रमाणत्वमभेदे सर्ववस्तुनः ।
भेदप्रमाणमेवैतदद्वैतं साधयेत् स्फुटम् ॥

गुरुचरणसकाशादुद्धृतं निर्गतं तत्
विगुणमविगुणं वा वीक्षतां तत्क्षमात्मा ।

अपि विसृजति कश्चित्काचमालावमत्या
शतमखमणिमालां शारदाकाशनीलाम् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादशिष्य - श्रीनृसिंहाश्रमविरचितो भेदधिक्कारस्समाप्तः ॥

---

## No. 4697. भेदधिक्कारः.

## BHĒDADHIKKĀRAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 30. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Bhēdadhikkāra-satkriyā 16*a*.

Complete.

Same work as the above.

## No. 4698. भेदधिक्कारः.

## BHĒDADHIKKĀRAḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 20. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as the above.

## No. 4699. भेदधिक्कारसत्क्रिया.

## BHĒDADHIKKĀRASATKRIYĀ.

Pages, 112. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4613.

A commentary on the Bhēdadhikkāra of Nṛsiṁhāśrama; by his pupil Nārāyaṇāśrama.

Complete.

This manuscript is stated to have been completed on the 13th day of the bright half of the month Māgha in the year Naḷa.

**Beginning :**

मृषामायाशक्त्यावृतमहिमनि ब्रह्मणि परे
जगज्जालं जातं स्फुरति वियतीवोरुनगरम् ।
विरिञ्चश्रीशेशत्रिदशनरतिर्यग्गतभिदा
कुतोऽतो भूमाहं निरवधिसदानन्दघनचित् ॥
काशते कलितं यस्य पदं वैदिकमस्तकैः ।
भक्तमुक्त्यै समीहन्तं तं नृसिंहगुरुं भजे ॥
गम्भीरभावभारेण दुर्वहा गौरवी कृतिः ।
तथापि भेदधिक्कारसत्क्रियां श्रद्धयारभे ॥

यद्यपि श्रुतिस्मृतीतिहासपुराणागमैः क्रियासमभिव्याहारेण जगन्निदाने सर्वज्ञे परमात्मनि सजातीयादिसमस्तभेदो निन्दितो निषिद्धश्च, यद्यपि

चात्रभवद्भिर्बादरायणभगवत्पादादिभिः पूर्वाचार्यैरारम्भणाधिकरणन्यायतोऽपि भेदसत्ता निराकारि; तथापि केचित् स्वोत्प्रेक्षापरिकल्पितपरिभाषायुक्तिकलापाकुलीकृतान्तःकरणा भेदसत्तां सम्भावयन्तो न श्रुत्यादिसिद्धशुद्धाद्वितीयचिदात्मनि श्रद्धां बध्नन्ति । अतस्तन्मोहशान्तये समस्तभेददुर्निरूपत्वप्रकटनाय ग्रन्थमारभमाणस्तत्समाप्त्यादिफलकमीश्वरतत्त्वानुस्मरणं मङ्गळं मनसानुष्ठितं शिष्यशिक्षार्थं प्रकटयन् प्रकरणविषयादिकं च सूचयन् स्मृतं वस्तुस्वरूपं सलक्षणप्रमाणं निर्दिशति---वेदान्तेत्यादिना ।

*   *   *   *

यद्यपि स्वमते भेदमिथ्यात्वेनाद्वैतसिद्धौ श्रुतिरेव भगवती प्रमाणम्, तथापि न्यायमेव बहुमन्यमानं प्रति न्यायतस्तावत् जीवपरभेदमिथ्यात्वं साधयति---अन्तःकरणेति । अहमितिप्रतीयमानः अहमितिवर्तमानव्यवहारहेतुप्रतीतिगोचरो जीवपदाभिधेयो जीवः परस्मान्न भिद्यते अव्यक्तात्परो योऽसंसार्यात्मा नप्र(तत्प्र)तियोगिकभेदात्यन्ताभाववानित्यर्थः । तच्च स्वरूपेणैव स्वसंसृज्यमानाधिकरणनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमिति मतेनोक्तम्.

**End:**

अत्र विचाररहितानामनपेक्षामात्रेण वैगुण्यं न सम्भावनीयमित्यत्र दृष्टान्तमाहापीति । स्वच्छामिन्द्रनीलमणिमालां कश्चिदविचार्य काचमणिमालाभ्रान्त्या त्यजत्यपि नैतावता सा प्राज्ञैरुपेक्ष्यत इत्यर्थः ॥

वेदान्तबृन्दविपिने विततं विशुद्धमद्वैतमार्गमपवर्गपदाधिरोहम् ।
श्रीमद्गुरूक्तनयनुन्नसमस्तशङ्कमास्थाय यान्तु पदमुत्तममस्तदोषाः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यभगवन्नृसिंहाश्रमश्रीचरणप(रिच)रणनिरतनारायणाश्रमविरचिता भेदधिक्कारसत्क्रिया समाप्ता ॥

गजाननकटद्वन्द्वनिस्सृता मदनिर्झरी ।
प्रक्षाळयतु नः क्षिप्रं विघ्नसङ्घातकर्दमम् ॥
नळनामसंवत्सरे माघमासे शुक्लपक्षत्रयोदश्यां लिखिता समाप्ता ॥
भेदधिक्कारसत्क्रिया समाप्ता ॥

## No. 4700. भेदधिक्कारसत्क्रिया.

## BHĒDADHIKKĀRASATKRIYĀ.

Pages, 130. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 4697.

Incomplete.

Same work as the above.

## No. 4701. भेदधिक्कारसत्क्रिया.

## BHĒDADHIKKĀRASATKRIYĀ.

Pages, 96. Lines, 9 on a page.

Begins on fol. 12*a* of the MS. described under No. 4396.

Pratyakṣa complete, Anumāna incomplete.

Same work as the above.

## No. 4702. भेदधिक्कारसत्क्रियोज्ज्वला.

## BHĒDADHIKKĀRASATKRIYŌJJVALĀ.

Substance, paper. Size, 12 × 9¾ inches. Pages, 240. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

A commentary on the Bhēdadhikkārasatkriyā of Nārāyaṇāśrama.

This work consists of two volumes ; the first volume goes up to the end of page 240 ; the second volume which is described under the next number ends with page 447.

**Beginning:**

यत्रोत्पन्नं जगद्भाति मायया रज्जुसर्पवत् ।
स एवाहं विभुर्नित्यस्सच्चिदानन्दलक्षणः ॥
ब्रह्माण्डकाण्डा यत्कर्णनिनादे . . . . .
लक्ष्मीवक्षा नृहर्यक्षस्स मां रक्षत्वभीक्ष्णशः ॥
सिद्धानन्तगतिर्दिगन्तसृमरस्फाराखिलाम्नायस-
त्सिद्धान्तस्फुरणादिसम्भवयश . . . . . . . तः ।
अध्यानन्दविशुद्धचिद्घनबुधस्संसेवितस्सद्गुधैः
शुद्धानन्दगुरुर्विधुर्विजयते विध्वस्तमायातमाः ॥
श्रीशुद्धानन्द(योगीन्द्र)चरणांचरण(णाम्बुरुह)द्वयम् ।
नत्वा श्रीभेदधिक्कारसत्क्रियैषा प्रकाश्यते ॥

मृषेति । मायाया जगज्जालस्य वा विशेषणम् । अनावृ . . . . . . . . . . . . . . . . . . . . . णो जगदध्यासानि(धि)ष्ठानत्वं न सम्भवति । अध्यासेऽधिष्ठानविशेषाग्रहस्य हेतुत्वादित्याशङ्क्य मायाशक्त्यावृतमहिमनीत्युक्तम् । अनेन(जगदुपा)दानत्वं ब्रह्मणस्तटस्थलक्षणमुक्तम् । विरिञ्चेत्यतः प्रागन इत्यनुषज्यते । तस्यायमर्थः— स्वरूपेण मृषाभूतस्यैव जगतो . . . . . . . दिति भिदा भेदः कुत इत्याक्षेपो नास्तीत्यर्थः । अनेन प्रकरणावान्तरविषयो दर्शितः । अतः भेदसत्त्वाभावात् । भूमा त्रिविधपरिच्छेदशून्यः ॥

For the end, see under the next number.

## No. 4703. भेदधिक्कारसत्क्रियोज्ज्वला.

## BHEDADHIKKĀRASATKRIYOJJVALA.

Substance, paper. Size, 12 × $9\frac{3}{4}$ inches. Pages, 207. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

For the beginning, see under the previous number.

**End :**

विक्रियते विविधा क्रियत इति विकारः जन्मादिना . . . . कारयुक् । नाम प्रकाश्यम् । स्वरूपेणासदेव दृश्यम् । "नाम प्रकाश्य-सम्भाव्यक्रोधोपगमकुत्सने" इति निखण्डु(घण्टु)क्तेः । धेयं धार्यमाध । इति.

---

No. 4704. मध्वतन्त्रमुखमर्दनव्याख्या—व्यध्वविध्वंसनम्.

MADHVATANTRAMUKHAMARDANAVYĀKHYĀ : VYADHVAVIDHVAṀSANAM.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 128. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

A commentary by Appayadīkṣita on his Madhvatantramukhamardana, which is an unfavourable criticism of the Dvaita view of the Vēdānta religion and philosophy as held by Madhvācārya and his followers.

Complete.

**Beginning :**

उद्धाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयस्स मे दिशतु शाश्वतिकं मुकुन्दः ॥
मध्वतन्त्रमुखमर्दनं मया यत्कृतं प्रकरणं मिताक्षरम् ।
पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥

आनन्दतीर्थप्रवर्तितशारीरकशास्त्रप्रा(थमिकपञ्चा)धिकरणप्रक्रियां प्रायस्तन्मतमर्यादयैव दुषयितुं प्रकरणमिदमारभमाणः प्रारिप्सितप्रकरणनिर्विघ्नपरिसमाप्त्यादिप्रयोजनायादौ विशि(ष्टेष्टदेव)तानुसन्धानसङ्कीर्तनरूपं मङ्गलमाचरन्नेव प्रकरणारम्भं तावदाक्षिपति—

शिवं विष्णुं वा यद्यभिदधति शास्त्रस्य विषयं
तदिष्टं(ताव)न्नस्सगुणमपि तद्ब्रह्म भजताम् ।

विरोधो नातीव स्फुरति न हि निन्दानयविदां
न सूत्राणामर्थान्तरमपि भवद्वार्यमुचितम् ॥

वस्तुतो(नि)र्विशेषब्रह्मणि प्रतिष्ठापितस्यापि शारीरकमीमांसाशास्त्रस्य केचन शिवं वा विष्णुं वा विषयं वदन्ति चेत्तदिष्टमेव; यतस्तच्छिवरूपं विष्णुरूपं वा सगुणमपि ब्रह्मोपासीनानामस्माकमद्वैतवादिनामुपास्यस्वरूपगुणमहिमावधारणाय तत्प्रतिपादनप्रवृत्ततदीयशास्त्रस्य योजनं ग्राह्यम् ।

**End:**

(स्व)नाम ग्रन्थनाम च कीर्तयन् प्रकरणसमाप्तिं दर्शयति—
विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलि . . . . . . स्तनूजः ॥
सोऽयं मितपदमकरोन्महितार्थं मध्वशास्त्रमुखभङ्गम् ।
प्रीत्यै पुरामरातेः श्रीकामाक्षीसमेतस्य ॥

**Colophon:**

इति श्रीमद्भरद्वाजकुलज . . . . . . . . . श्रीमदद्वैतविद्याचार्यश्रीरङ्गराजाध्वरिवरसूनोः श्रीमदप्पयदीक्षितस्य कृति(षु मध्वतन्त्रमु)खमर्दनव्याख्यानं व्यध्वविध्वंसनं सम्पूर्णम् ॥

विद्यासु यद्व्यसनिता विविधा बुधानां
मार्गो बहु क्रियत एव महद्भिरेषः ।
चेतस्त्वथ . . . . . . मत्र करोति नास्थां
चन्द्रावतंसचरणस्मरणान्तराये ॥

लवलीशकटाक्षेण मध्वदर्शनदूषणम् ।
लिखितं पूर्णमभवदप्पाध्वरिविपश्चिता ॥
युवाख्ये वत्सरे प्राप्ते कटकं दिननायके ।
मध्वशास्त्रोपमर्दो हि लिखितः शि . . . . . ॥

## No. 4705. मनीषापञ्चकम्.

## MANĪṢĀPAÑCAKAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 62*a* of the MS. described under No. 2830.

Five stanzas by Śaṅkarācārya intended to teach to a rather critical Caṇḍāla on the banks of the Ganges that there is in reality no difference between man and man, and that the individual soul is identical with the Supreme Soul

Complete.

**Beginning:**

कदाचित् शङ्कराचार्यः काशीं प्रति पुरीं ययौ ।
तस्य ज्ञानपरीक्षार्थं कश्चिद्देवस्समागतः ॥

चण्डालरूपिणं दृष्ट्वा गच्छ गच्छेति चाब्रवीत् ।
इति ब्रुवन्तमाचार्यं स देवः पुनरब्रवीत् ॥

अन्नमयाद(न्नमयं त्वथ वा चैतन्यमेव चैतन्या)त् ।
यति(वर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ ग)च्छेति ॥

* * * *

जाग्रत्स्वप्नसुषुप्तिषु (स्फुटतरा या संविदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी ।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञा हि यस्यास्ति चेत्
चण्डालोऽस्तु स तु द्विजोस्तु गुरुरित्येषा) मनीषा मम ॥

**End:**

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः ।
यस्मिन्नित्यसुखाम्बुधौ गलि (त)धीर्ब्रह्मैव न ब्रह्मवित्
यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा मम ॥

## No. 4706. मनीषापञ्चकम्--मधुमञ्जरीसहितम्.

## MANĪṢĀPAÑCAKAM: WITH MADHUMAÑJARĪ.

Substance, palm-leaf. Size, $10\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 33. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same as the above, with a commentary by Gōpalabalayati.

**Beginning:**

श्रीमद्यतीन्द्रमानम्य जगन्नाथमुनिं गुरुम् ।
मनीषापञ्चकव्याख्या तन्यते मधुमञ्जरी ॥

तत्रादौ कथा निरूप्यते ।

कदाचित् शङ्कराचार्यः काशीं प्रति पुरीं ययौ ।

* * * *

अन्नमयादन्नमयम् अथवा चैतन्यमेव चैतन्यात् ।
यतिवर दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति ॥

अन्नेत्यस्यायमर्थः—अद्यते यज्ञैस्तदन्नम्, अत्ति च भूतानि यत्तदन्नम्, अद भक्षण इति धातोरन्नशब्दस्योत्पन्नत्वात् । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति श्रुतेश्च । तन्मयस्तत्प्रधानस्तद्विकारो वा स्थूलदेहोऽन्नमय इत्युच्यते ।

**End:**

सः प्रसिद्धो ब्रह्मविद्वरिष्ठः । सुरेन्द्रवन्दितपदः सुरा देवाः तेषामिन्द्रः स्वामी शतमखः तेन वन्दितं नमस्य(स्कृ)तं पदं पादो यस्य स तथा । नूनं सत्यम् अस्मिन्नर्थे न संशयः । एवं मम मनीषेति स्पष्टम् ॥

मनीषापञ्चकस्यैवं कृता टीका मनोहरा ।
गोपालबालयतिना मञ्जरी मधुसंज्ञिका ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्कराचार्यकृतमनीषापञ्चकस्य टीका सम्पूर्णा ॥

## No. 4707. मनीषापञ्चकम्—सव्याख्यानम्.

## MANĪṢĀPAÑCAKAM WITH COMMENTARY

Pages, 74. Lines, 12 on a page.

Begins on fol. 1*a* of the MS. described under No. 4633.

Incomplete.

The commentary here is a different one.

**Beginning:**

स्वप्रकाशचिदानन्दसदेकरसरूपिणे ।
नित्यशुद्धनिराभासकूटस्थाय नमो नमः ॥
आनन्दघनमद्वञ्च(न्द्वं) निर्विकारं निरञ्जनम् ।
भजेऽहं भगवत्पादं भजतामभयप्रदम् ॥
यत्कटाक्षवशादेव मुच्येऽहं भवबन्धनात् ।
तं वन्दे सच्चिदानन्दं श्रीगुरुं करुणानिधिम् ॥

इह खलु परमकारुणिकः भगवान् परमशिवः अनर्थमकरागारे संसारसागर(रे) निमग्नं लोकमुत्तितीर्षुः कदाचित् काशीं प्रति गच्छन्तमाचार्यं प्रति चण्डालवेषं धृत्वा जगाम । ततो जगाद भगवानाचार्यः— हे चण्डालाधम! इतो दूरं गच्छ गच्छेति । ततः चण्डालवेषमण्डितशिवः प्राह—

अन्नमया . . . . . . गच्छेति ॥

हे यतिवर । अत्र ब्रूहि अन्नमयाच्छरीरादन्नमयशरीरं गच्छ गच्छेति दूरीकर्तुं वाञ्छसि? अथवा चैतन्यादेव चैतन्यं दूरीकर्तुं वाञ्छसि? न तावदाद्यः उभयोश्शरीरयोरन्नकार्यत्वेनैकत्वात् । श्रूयते हि शरीरस्य अन्नकार्यत्वम्—स वा एष पुरुषोऽन्नरसमय इति ।

**End:**

निमिषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ।
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याश्शुकादयः ॥

इतीत्येतादृशस्स गुरुरिति मम मनीषेत्यन्वयः । उक्तार्थे आदर्तव्यतां दर्शयितुमाह—नूनमिति । इयता प्रबन्धेन यत्प्रातिपादितं तत्सर्वं निश्चितमेवेत्यर्थः । यन्निष्क्रियं निरंशं सूक्ष्ममलक्ष्यञ्च सच्चिदानन्दम्.

## No. 4708. महावाक्यरत्नावलिः.

## MAHĀVĀKYARATNĀVALIḤ.

Substance, paper. Size, $8\frac{7}{8} \times 5\frac{3}{8}$ inches. Pages, 51. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A collection of 1008 important passages selected from the Upaniṣads mainly in support of the Advaita view of the Vēdānta; by Rāmacandrēndra, a disciple of Vāsudēvēndrasarasvatī.

**Beginning:**

यो विध्यादिविदेहान्तमहावाक्यार्थविग्रहः ।
श्रीरामचन्द्ररूपाय तस्मै भूमात्मने नमः ॥

यः पूज्यो यतिभिः स्वधर्मनिरतैर्ध्यायन्ति यं योगिनो
येनात्तं निगमान्तवेद्यमनिशं यस्मै हविर्दीयते ।
यस्मात् स्थावरजङ्गमं समभवद्यस्यांशमात्रो वरो
यस्मिन् लीनमिदं प्रणौमि सततं तं वासुदेवं गुरुम् ॥

नत्वा श्रीवासुदेवेन्द्रपादपङ्केरुहद्वयम् ।
ग्रथ्यते वै महावाक्यरत्नावळिरियं मया ॥

अथ खल्वृग्वेदादिविभागेन वेदाश्चत्वारः; तत्रैकविंशतिशाखा ऋचः, नवाधिकशतशाखा यजुषः, सहस्रशाखास्साम्नः, पञ्चाशच्छाखा अथर्वणस्य, एकैकस्याश्शाखाया एकैकोपनिषत्, आहत्याशीतिसहितशताधिकसहस्रसङ्ख्याका उपनिषदः । तासु श्रीरामचन्द्रेण रामदूताय सारतरोपनिषदः

अष्टोत्तरशतसङ्ख्याका उपदिष्टाः । तथा च मुक्तिकोपनिषनि(न्नि)ष्ठाष्टोत्तरशतोपनिषन्नामश्लोका लिख्यन्ते ॥

"ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः ।
ऐतरेयं चच्छान्दोग्यं बृहदारण्यकं तथा ॥
ब्रह्मकैवल्यजाबालश्वेताश्वो हंस आरुणिः ।
गर्भो नारायणो हंसो बिन्दुनादशिरश्शिखा ॥
मैत्रायणी कौषितकी बृहज्जाबालतापनी ।
कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमन्त्रिका ॥
सर्वसारं निरालम्बं रहस्यं वज्रसूचिकम् ।
तेजोनादध्यानविद्यायोगतत्त्वात्मबोधकम् ॥
परिव्राट् त्रिशिखी सीता चूडा निर्वाणमण्डलम् ।
दक्षिणा शरभं स्कन्दं महानारायणाद्वयम् ॥
रहस्यं रामतपनं वासुदेवं च मुद्गलम् ।
शाण्डिल्यं पैङ्गलं भिक्षं महच्छारीरकं शिखा ॥
तुरीयातीतसन्न्यासपरिव्राजाक्षमालिका ।
अव्यक्तैकाक्षरं पूर्णा सूर्याक्ष्यध्यात्मकुण्डिका ॥
सावित्र्यात्मा पाशुपतं परं ब्रह्मावधूतकम् ।
त्रिपुरातपनं देवी त्रिपुरा कठभावना ॥
हृदयं कुण्डली भस्म रुद्राक्षगणदर्शनम् ।
तारसारमहावाक्यपञ्चब्रह्माग्निहोत्रकम् ॥
गोपालतपनं कृष्णं याज्ञवल्क्यं वराहकम् ।
शाट्यायनी हयग्रीवं दत्तात्रेयं च गारुडम् ॥
कलिजाबालिसौभाग्यरहस्यऋचमुक्तिका ।" इति

तत्र दशोपनिषद ऋग्वेदगताः । शुक्लकृष्णभेदेन यजुष एकपञ्चाशत् । तत्र शुक्लयजुष एकोनविंशतिः । कृष्णयजुषो द्वात्रिंशत् ।

साम्नष्षोडश । अथर्वणस्यैकत्रिंशत् । आहत्याष्टोत्तरशतम् । तत्र गौड-पादाचार्यैर्माण्डूक्योपनिषद्व्याख्याता । श्रीमच्छङ्करभगवत्पादाचार्यैर्दशो-पनिषदः पञ्च रुद्रा नृसिंहतापनी च । शङ्करानन्दैस्सदाशिवब्रह्मेन्द्रै-स्स्वयम्प्रकाशानन्दाद्यैश्च द्वात्रिंशो(शत उ)पनिषदः । विद्यारण्याचार्यैरष्टोत्तर-शतोपनिषदो व्याख्याताः । प्रकृते तु--

रामचन्द्रेणोपदिष्टे रामदूताय धीमते ।
ईशाद्यष्टोत्तरशतोपनिषद्यादसाम्पतौ ॥

निमज्ज्यात्र महावाक्यरत्नावळिरुदाहृता ।
विभाव्यते विभागेन सा त्रयोदशधा पुनः ॥

तत्रादौ विधिवाक्यानि बन्धमोक्षपराणि च ।
अरूपीद्वद्धे(विद्याहे)यवाक्यानि जगन्मिथ्यापराणि च ॥

तथोपदेशवाक्यानि जीवैशैक्यपराणि च ।
ब्रह्मविन्मननाख्यानि जीवन्मुक्तिपराणि च ॥

ब्रह्मानुभूतिरूपाणि तत्समाधिपराणि च ।
अष्टस्वरूपवाक्यानि फलवाक्यान्यनन्तरम् ॥

विदेहमुक्तिवाक्यानि लिख्यन्तेऽन्विष्य तत्क्रमात् ।
यस्स्वाश्रमाचाररतः परिव्राड्विजितेन्द्रियः ॥

सोऽधिकारी महावाक्यरत्नावळ्यां न चापरः ।
वाक्पूर्णसहनाप्यायं भद्रङ्कर्णेभिरेव च ॥

पञ्च शान्तीः पठित्वादौ पठेद्वाक्यान्यनन्तरम् ।

**End :**

ब्रह्मात्मैक्यकटीदेशो विद्वन्मनननाभिकः ।
जीवन्मुक्ताख्यदहरस्स्वानुभूतिकरद्वयः ॥

स्वसमाधिस्कन्धदेश(:)स्वस्वरूपाख्यकन्धरः ।
फलभूतमहावाक्यफालो वैदेहमस्तकः ॥

एवं विध्याद्यदेहान्तमहावाक्यकळेबरः ।
वस्तुतो निर्विशेषात्मा त्रिपान्नारायणोऽस्म्यहम् ॥
यन्महावाक्यसिद्धान्तं मुक्तचित्तैकगोचरम् ।
वासुदेवेन्द्रसंज्ञं तं नौमि सर्वात्मकं महः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रसरस्वतीचरणकमलमकरन्दद्दप्तस्वान्तरामचन्द्रेन्द्रग्रथितेशाद्यष्टोत्तरशतोपनिषत्सारसङ्ग्रहभूताष्टोत्तरसहस्रमहावाक्यरत्नावळिः परिपूर्णा ॥

ग्रन्थस्तु विंशत्याधिकसप्तशतम् ॥

---

## No. 4709. महावाक्यरत्नावळिः.

## MAHĀVĀKYARATNĀVALIḤ.

Pages, 35. Lines, 9 on a page.

Begins on fol. 14*a* of the MS. described under No. 4544.

Complete.

Same work as the above.

## No. 4710. महावाक्यविवरणम्.

## MAHĀVĀKYAVIVARAṆAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 5*a* of the MS. described under No. 4552.

Complete.

An investigation into the meaning of the Mahāvākyas, *i.e.*, of the more important passages of authority in the Vēdas and the Upaniṣads; by Vidyāraṇya as may be made out from the colophon of the MS. described under No. 4713.

**Beginning:**

यदज्ञानप्रभावेन दृश्यते सकलं जगत् ।
यज्ज्ञानाच्छ्रेय आप्नोति तस्मै ज्ञानात्मने नमः ॥

साधनचतुष्टयसम्पन्नस्य विधिवदुपपन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तमहावाक्यार्थं विचारयामः । वेदान्तमहावाक्यं नाम—

तत्त्वमसि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्म, प्रज्ञानं ब्रह्म, ब्रह्मैवेदं सर्वं यदयमात्मा, एष त आत्मान्तर्याम्यमृतः, स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवंवित्, प्रज्ञा प्रतिष्ठा, प्रज्ञानं ब्रह्म, विज्ञानमानन्दं ब्रह्म, सत्यं ज्ञानमनन्तं ब्रह्म—इत्येवमादिवाक्यानि ।

**End:**

"यथैवापि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।"
इत्यारभ्य "संशयात्मा विनश्यति" इत्येतत्पर्यन्तं
"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥"
इत्यादिश्रुतिस्मृतिसहस्रेभ्योऽयमर्थोऽवसीयते ॥
नमो ब्रह्मविद्भ्यो नमो ब्रह्मविद्भ्यो नमो ब्रह्मविद्भ्यः ।
ब्रह्मवि(द्यासमं)नास्ति न भूतं न भविष्यति ॥

**Colophon:**

इति महावाक्यविवरणं समाप्तम् ॥

## No. **4711.** महावाक्यविवरणम्.

MAHĀVĀKYAVIVARAṆAM.

Pages, 4. Lines, 16 on a page.

Begins on fol. 1*a* of the MS. described under No. 2118.

Complete.

Same work as the above.

## No **4712.** महावाक्यविवरणम्.

MAHĀVĀKYAVIVARAṆAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 4621.

Same work as the above.

## No. 4713. महावाक्यार्थविवरणम्.

## MAHĀVĀKYĀRTHAVIVARAṆAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 4620.

Same work as the above.

**Colophon:**

इति परमहंसपरिव्राजकाचार्यविद्यारण्यगुरुनिरूपितं महावाक्यार्थविवरणं सम्पूर्णम् ॥

## No. 4714. महावाक्यार्थविवरणम्.

## MAHĀVĀKYĀRTHAVIVARAṆAM.

Substance, paper. Size, 11⅝ × 4⅜ inches. Pages, 91. Lines, 7 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Incomplete.

Author not known.

Similar to the above.

**Beginning:**

अनामरूपाय निराश्रयाय वेदान्तगीताय गुणातिगाय ।
नमस्तुरीरा (या)य सदोदिताय कस्मै चिदानन्दसुखाय तस्मै ॥

अथातो महावाक्यार्थविवरणं कथयति । विवरणं नाम विचारः । समस्तविषयवासनाविनिर्मुक्तः स परमहंसः केवलनिर्विशेषः ब्रह्मचिन्मात्रेऽवतिष्ठति(ते) । स परमहंसः यत्र कुत्रापि तिष्ठति । किं करोति? केवलं द्वादशमहावाक्यार्थविचारं करोति । तन्महावाक्यं कीदृक्? तत्र उ(औ)पनिषदानि महावाक्यानि । आदौ तावत् ऋग्वेदस्य प्रज्ञानमानन्दं ब्रह्म, अहं ब्रह्मास्मीति यजुर्वेदस्य; तत्त्वमसीति सामवेदस्य; अयमात्मा ब्रह्मेति अथर्वणवेदस्य; अहं ब्रह्मास्मीति यत्परं ब्रह्म इति

श्रुतेः इत्यादि द्वादशमहावाक्यैर्ब्रह्मविचारः । तत्रादौ ऋग्वेदस्य प्रज्ञान-शब्दव्याख्यानं क्रियते । एकमेवाद्वितीयं ब्रह्मेति सिद्धान्तः ।

**End:**

सर्वगो ह्येष ईश्वरः क्रियाज्ञानात्मा सर्वं सर्वमयं सर्वे जीवाः सर्वामयाः सर्वावस्थासु तथाल्पाः स एव एष भूतानीन्द्रि.

No. **4715.** **महावाक्यार्थपञ्चीकरणम्.**

MAHĀVĀKYĀRTHAPAÑCĪKARAṆAM.

Pages, 6. Lines, 8 on a page.

Begins on fol. 164*a* of the MS. described under No. 745.

Complete.

A short work explaining analytically some of the Mahāvākyas; by Śaṅkarācārya.

**Beginning:**

नारायणम् . . . . . आनतोऽस्मि ॥

अथ महावाक्यार्थे प्रबोधप्रकारं व्याख्यास्यामः—

तत्त्वमसि सौम्य महावाक्यमिति प्रथमं शिष्यं प्रतिज्ञापयेद्गुरुः । तेन तत्त्वमसीति वाक्ये त्रीणि पदानि भवन्ति—तत्, त्वम्, असि—इति । तत्पदस्य द्वावर्थौ—वाच्यो लक्ष्यश्चेति । मायाशबलितं ब्रह्म वाच्यार्थः, मायानिर्मुक्तं सत्यज्ञानानन्दस्वरूपं लक्ष्यम् । त्वम्पदस्यापि द्वावर्थौ—वाच्यो लक्ष्यश्चेति । स्थूलसूक्ष्मतनुद्वयपरिवेष्टितचैतन्यं वाच्यार्थः, स्थूलसूक्ष्मतनुद्वयविनिर्मुक्तं प्रत्यक्चैतन्यं लक्ष्यम् ।

**End:**

ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ।
नाहं देही न संसारी केवलोऽहं सनातनः ॥

"एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन" इति श्रुतेः ॥

**Colophon:**

इति श्रीभगवत्पादपूज्यशिष्यश्रीमच्छङ्कराचार्यविरचितमहावाक्यार्थपञ्चीकरणं समाप्तम् ॥

---

## No. 4716. मायापञ्चकम्.

## MĀYĀPAÑCAKAM.

Pages, 2. Lines, 23 on a page.

Begins on fol. 2*b* of the MS. described under No. 1021.

Complete.

Five stanzas on the nature of Māyā and its results.

**Beginning:**

निरुपमनित्यनिरंशकेऽप्यखण्डे मयि चिति सर्वविकल्पनादिशून्ये ।
घटयति जगदीशजीवभेदं त्वघटितघटनापटीयसी माया ॥
सुखचिदखण्डबोधमद्वितीयं वियदनिलादिविनिर्मिते नियोज्ये ।
भ्रमयति भवसागरे नितान्तं त्वघटितघ . . . माया ॥

**End:**

विधिहरिहरभेदमप्यखण्डे बत विरचयति बुधानपि प्रकामम् ।
भ्रमयति हरिभर्गभेदभावादघटित . . . माया ॥

**Colophon:**

इति मायापञ्चकम् ॥

---

## No. 4717. मायाविवरणम्.

## MĀYĀVIVARAṆAM.

Pages, 35. Lines, 20 on a page.

Begins on fol. 64*a* of the MS. described under No. 1021.

A dissertation explaining the doctrine of Māyā; by Śaṅkarācārya.

Complete in 5 Varnakas.

१. अध्यारोपापवादनिरूपणम्.

२. अनुबन्धचतुष्टयनिरूपणम्.

३. प्रपञ्चविमर्शननिरूपणम्.

४. दुःखादिविचारनिरूपणम्.

५ कर्तृत्वकारयितृत्वविमर्शननिरूपणम्.

**Beginning:**

बालानामुपकाराय ममापि ज्ञानसिद्धये ।
तत्र श्रीबालगोपालकृष्णस्सन्निहितो भवेत् ॥

इह खलु धर्मार्थकाममोक्षाणां चतुर्विधपुरुषार्थानां मध्ये मोक्ष एव परमपुरुषार्थः; नित्यत्वात्, न च पुनरावर्तत इति श्रुतेः । इतरेषां त्रयाणां न तथात्वम्; अनित्यत्वात्, तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति श्रुतेः । स मोक्षश्च ब्रह्मज्ञानादेव सिध्यति ; तमेवं विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति, ब्रह्मविदाप्नोति परमित्यादिश्रुतिभ्यस्तद्ब्रह्म "अध्यारोपापवादाभ्यां ज्ञातव्यस्तत्त्वनिर्णयः" इति ; न कर्मणा न प्रजया न त्यागेन धनेन वेति श्रुतेः । तस्मान्मुमुक्षूणामध्यारोपापवादावऽवश्यं ज्ञातव्यौ । अत्राध्यारोपो नाम शुक्तिकायां रजतवत्, रज्जौ सर्पवत्, मरुमरीचिकायां जलवत्, स्थाणौ पुरुषवच्च, निष्प्रपञ्चात्मवस्तुनि प्रपञ्चारोपः । अयमध्यारोपः वस्त्वज्ञानादारोपः । तदज्ञानमेव अविद्या, तमः, मोहः, मूलप्रकृतिः, प्रधानम्, गुणसाम्यम्, अव्यक्तम्, माया, इति चोच्यते । मूलप्रकृतिर्नाम शुक्लकृष्णरक्ततन्तुसमुदायरूपरज्जुवत् सत्त्वरजस्तमोगुणसमुदायरूपा ; अस्याः प्रळयः, महासुषुप्तिरिति च, नाम । अस्यां मूलप्रकृतावनन्तकोटिजीवाः स्वस्वकर्मवासनाभिस्सह जतुपिण्डे स्वर्णरेणव इव सृष्टेः पूर्वं लीना वर्तन्ते ।

**End:**

इदानीं किं प्रकृतमिति चेत्—मयोक्तप्रकारेण विचार्य रागादिना प्रेरितं तत् त्रिविधकरण(णं)त्रिविधकर्म करोति ; प्रधानी(न)प्रेरितसेनया सम्पादितं जयं राजा अहं जितवानित्यारोपयति ; एवमात्मा रागद्वेषादि-निष्ठं प्रेरकत्वमज्ञानादात्मन्यभिमन्यते ; एवमात्मनः कर्तृत्वं कारयितृ-त्वञ्च नास्तीति यो दृढं निश्चिनोति, स एव मुक्तः, स एव कृतकृत्यः ॥

त्रिविधैरेव करणैः पुण्यं पापं च मिश्रकम् ।
क्रियते न मया कर्मेत्येवं बुद्धिर्विरच्यते ॥
रागादेरेव निर्वर्त्यं प्रेरकत्वं न मे क्वचित् ।
इति यस्य दृढा बुद्धिस्स मुक्तस्स च पण्डितः ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचिते मायाविवरणे कर्तृत्वविमर्शनं नाम पञ्चमवर्णकं समाप्तम् ॥

---

No. **4718.** लौकिकन्यायरत्नाकरः.

LAUKIKANYĀYARATNĀKARAḤ.

Substance, paper. Size, $10\frac{1}{8} \times 7\frac{5}{8}$ inches. Pages, 713. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

A work embodying the doctrines of the monistic Vēdānta, and composed so as to illustrate the various secular Nyāyas or wise rules and saws and adages.

By Raghunātha, son of Gullāvarāya of Sōmavaṁśavindarāya-family and a disciple of Rāmadayālu.

**Beginning:**

यस्माज्जातं निखिलभुवनं जीव्यते येन जातं
यस्मिन्नन्ते व्रजति विलयं सच्चिदानन्दरूपे ।

यस्य श्वासा निगमनिचया यश्च तन्मात्रमेयः
तं प्रत्यञ्चं शिशुशशिशिखं साम्बमूर्तिं नतोऽस्मि ॥

*　　*　　*　　*

गुरून्नत्वा सुतत्त्वज्ञान् दयालून् रामवत्सदा ।
लौकिकन्यायरत्नानामाकरस्तन्यते मया ॥
न्यायार्थं विषयश्चैवोदाहृतिश्च यथामति ।
वदिष्यामोऽत्र संक्षेपाद्विस्तरादपि कुत्रचित् ॥
प्रसङ्गादागतानान्तु न्यायानामत्र विस्मृते ।
अर्थमात्रं वदिष्यामः क्वचिदन्यामुदाहृतिम् ॥

*　　*　　*　　*

यथा चान्यनिबन्धेषु बहुष्वप्यन्यगोचरः ।
विचारो दृश्यते तद्वद्भवत्वत्रापि न क्षतिः ॥
ससैन्धवेऽपि मौद्गे हि सूपे मौद्गत्ववद्भुवम् ।
श्रुत्यन्तस्य निबन्धत्वं निबन्धस्यास्य गम्यताम् ॥
तत्तदीयैरनूबन्धैरिदं स्यादनुबन्धवत् ।
तदीयाः केऽनुबन्धास्स्युरिति चेत्त्वमवेहि तान् ॥

*　　*　　*　　*

ननु तेषां तात्त्विकत्वबाधेऽपि व्यावहारिकत्वं न बाध्यते । तावन्मात्रेण च कार्यकारित्वोपपत्तेर्नोपजीव्यविरोधः उपजीव्यस्य व्यावहारिकत्वस्य बाधात् । बाधितस्य च तात्त्विकस्यानुपजीव्यत्वादिति चेन्न ; पदार्थेषु तात्त्विकत्वव्यावहारिकत्वविभागस्य वैदिकबाधानिश्चयात्प्रागसिद्धेः ।

**End:**

एकस्मादीशाद्यत्कार्यं न तद्बहुभ्योऽप्यनीशेभ्य इति विवक्षायां शतमन्धानां न पश्यतीति न्यायः । मन्दादप्यकस्मान्महाकार्यजनिस्तु घुणाक्षरन्यायेन बोध्या । यथा तेन कृतं छिद्रमकस्मात्ककाराकृतिर्भवति तथा तदपि ज्ञेयम् । पूर्वार्धे न्यायाः . . . . . मिलिताः ॥

वेदेन्द्वाम्नायसंख्याकैर्लौकिकन्यायरत्नकैः ।
व्याप्तोऽब्धिः प्रीतयेऽयं स्यात्सोमसोमशिखामणेः ॥

* * * *

श्रीमन्नानकसद्गुणागवनजे वंशे लसन्मौक्तिकः
श्रीमद्रामदयालुशिष्यरघु[णा]नाथात्त(वाप्त)नाम्ना कृते ।
प्रीत्यै साम्बशिवस्य लोकविदितन्यायाख्यरत्नाकरे
पूर्णो मानिरूपणप्रचुरको भागस्पृशोऽप्युत्तरः ॥

**Colophon :**

इति श्रीसाधुवृन्दवन्दितपादारविन्दश्रीमद्रामदयालुशिष्येण सोमवंशीयविन्दरागकुलोत्तंसश्रीसेवीदेव्याश्रितपादारविन्दश्रीगुलाबरायसूनुना उदासीनावस्थेन रघुनाथवर्मणा विरचितं लौकिकन्यायरत्नाकराख्यं प्रकरणं सम्पूर्णम् ॥

---

## No. 4719. वाक्यवृत्तिः.

## VĀKYAVṚTTIḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4552.

Complete.

A short exposition by Śaṅkarācārya of the leading principles of Advaita-Vēdānta in the form of a discourse given by a preceptor to a pupil.

**Beginning :**

सर्गस्थितिप्रळयहेतुमचिन्त्यशक्तिं
विश्वेश्वरं विजितविश्वमनन्तमूर्तिम् ।
निर्मुक्तबन्धन(मपार)सुखाम्बुराशिं
श्रीवल्लभं विमलबोधघनं नमामि ॥

यस्य प्रसादादहमेव विष्णुर्मय्येव सर्वं परिकल्पितं च ।
इत्थं विजानामि सदात्मरूपं तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

तापत्रयार्कसन्तप्त(ः) कश्चिदुद्विग्नमानसः ।
शमादिसाधनैर्युक्त(ः) सद्गुरुं परिपृच्छति ॥
अनायासेन येनास्मान्मुच्येयं(ऽहं) भवबन्धनात् ।
तन्मे सङ्क्षिप्य भगवन् केवलं कृपया वद ॥
साध्वी ते वचनव्यक्तिः प्रतिभाति वदामि ते ।
इदं तदिति विस्पष्टं सावधानमतिः शृणु ॥
तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः ।
तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम् ॥

**End:**

प्रारब्धकर्मवेगेन जीवन्मुक्तो यथा भवेत् ।
कश्चित्कालमनारब्धकर्मबन्धस्य सङ्क्षये ॥
निरस्तातिशयानन्दं वैष्णवं परमं पदम् ।
पुनरावृत्तिरहितं कैवल्यं पदमश्नुते ॥

**Colophon:**

वाक्यवृत्तिस्समाप्ता ॥

---

No. **4720.** वाक्यवृत्तिः.

VĀKYAVṚTTIḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 114*a* of the MS. described under No. 4337.

Complete.

Same work as the above.

शोभकृद्वत्सरे श्रेष्ठ मकरे शुक्लपक्षयोः(के) ।
द्वादश्यामात्मबोधश्च(श्च)योगेन लिखितं(तो) मया ॥

## No. 4721. वाक्यवृत्तिः.

### VĀKYAVṚTTIḤ

**Pages,** 4. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 200.

By Śaṅkarācārya.

Wanting in the beginning.

Same work as the above.

## No. 4722. वाक्यवृत्तिः—वाक्यवृत्तिप्रकाशिकासहिता.

### VĀKYAVṚTTIḤ WITH VĀKYAVṚTTIPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 15 × 1⅜ inches. Pages, 100. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

This commentary is by Viśvēśvarapaṇḍita, a disciple of Mādhavaprājñaguru and is called Vākyavṛttiprakāśikā.

Complete.

**Beginning:**

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

ब्रह्माहमेतन्मयि भाति विश्वं श्रीमाधवप्राज्ञगुरोः प्रसादात् ।
अन्वर्थविश्वेश्वरपाण्डिताख्यस्तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥

परमकृपानिधिः श्रीमच्छङ्कराचार्यभगवत्पादः तापत्रयार्कसन्तप्तानाम-परिमितजननादिसंसाराध्वश्रमपरिपीडितानामात्मज्ञानशीकरमधुरजलाकाङ्क्षिणां विदूरशारीरकमीमांसाजलाशयगमनासमर्थानां वाक्यवृत्तिसंज्ञकोपदेश-प्रकरणप्रपापरिकल्पनेनान्तश्शीतलतां विगतक्लेशतां चापादयंस्तत्रादौ प्रक-रणश्रवणे प्रवृत्तानामधिकारिणामविघ्नेन ब्रह्मज्ञानप्राप्तिपर्यन्तसिद्ध्यै प्रक-

रणप्रतिपाद्याद्वितीयबोधस्मरणपूर्वकं नमस्कारस्यावश्यकर्तव्यतां द्योतयन्स्वयं नमस्कुरुते ।

(मू.)

सर्गस्थितिप्रळयहेतुमचिन्त्यशक्तिं विश्वेश्वरं विदितविश्वमनन्तमूर्तिम् ।
निर्मुक्तबन्धनमपारसुखाम्बुराशिं श्रीवल्लभं विमलबोधघनं नमामि ॥

(व्या.)

विमलबोधघनं नमामीत्यन्वयः । विगतो मलो यस्मादसौ विमलः । विमलश्चासौ बोधश्च विमलबोधः । स एव घनो मूर्ति(:) स्वरूपमिति यावत् । परमात्मनोऽविद्यारहिततया तदविद्यापरिकल्पितस्य घटादिदृश्यस्याभावे तदालम्बनरूपो मलो न विद्यते । अतो विमलः निर्विकल्पः अद्वितीयज्ञानमिति यावत् । अद्वितीयबोधस्य मनसोऽप्यविषयत्वात् कथं नमस्कारविषयत्वमित्यत आह—विश्वेश्वरमिति । अद्वितीयबोधस्यैव विश्वस्वामित्वेनावस्थानात् नमस्कारविषयत्वमुपपद्यत एवेत्यर्थः । एवं चेदद्वितीयबोधस्य विश्वस्वामित्वसम्पादनाय शरीरस्वीकार एव नोपपद्यत इत्यत आह—अचिन्त्यशक्तिमिति । शक्तिशब्देनात्र मायेत्यभिधीयते । सा च बोधात्मनो ब्रह्मणो भिन्नाभिन्नत्वादिरूपेण चिन्तितुं नार्हतीत्यचिन्त्या । अचिन्त्यत्वं मायायाः कथमिति चेदुच्यते । इयं तु बाधबाध्यत्वात्स्वप्नसदृशी भवति । युक्तिहीनप्रकाशत्वादस्या मायेति संज्ञा । इयमसती न भवति दृश्यत्वात् ; न हि शशविषाणादिकमसदृश्यते । सती च न भवति बाध्यमानत्वात् ।

**End :**

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥"

"ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥"

"तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।"

"ब्रह्म वेद ब्रह्मैव भवति" । "तरति शोकमात्मवित्" । "ब्रह्मविदाप्नोति परम्" । इत्यादिश्रुतिस्मृतिपुराणेभ्योऽयमर्थोऽध्यवसीयते ॥

**Colophon**:

इति श्रीमन्महायोगिमाधवप्राज्ञगुरुप्रसा(दासा)दितापरिमितानन्दज्ञानस्वरूपविश्वेश्वरपण्डितविरचितवाक्यवृत्तिप्रकाशिका समाप्ता ॥

## No. 4723. विवेकचूडामणिः.

## VIVĒKACŪḌĀMAṆIḤ.

Substance, palm-leaf. Size, 15¾ × 1¼ inches. Pages, 104. Lines, 4 on a page. Character, Telugu. Condition, fair. Appearance, old.

The latter portion is rather injured.

Complete.

This is a popular treatise in verse on the fundamental doctrines of Advaita-Vēdānta; by Śaṅkarācarya

**Beginning**:

सत्य(र्व)वेदान्तसिद्धान्तगोचरं तमगोचरम् ।
गोविन्दं परमानन्दं मद्गुरुं प्रणतोऽस्म्यहम् ॥

जन्तूनां नरजन्म दुर्लभमतः पुंस्त्वं ततो विप्रता
तस्माद्वैदिकधर्ममार्गनि(प)रता विद्वत्त्वमस्मात्परम् ।

आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थितिः
मुक्तिर्नो शतकोटिजन्मसु कृतै(ः) पुण्यैर्विना लभ्यते ॥

दुर्लभं त्रयमेवैतद्दैवानुग्रहहेतुकम् ।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः ॥

लब्ध्वा कथञ्चिन्नरजन्म दुर्लभं तत्रापि पुंस्त्वं श्रुतपारदर्शनम् ।
यस्त्वात्ममुक्त्यै न यतेत मूढधीः स आत्महा स्वं(स्वं)विनिहन्त्यसद्ग्रहात् ॥

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये ।
वस्तुसिद्धिर्विचारेण न किञ्चित् कर्मकोटिभिः ॥

सम्यग्विचारतस्सिद्धा रज्जुतत्त्वावधारणा ।
भ्रान्त्योदितमहासर्पभयदुःखविनाशिनी ॥

* * * *

साधनान्यत्र चत्वारि कथितानि मनीषिभिः ।
एषु सत्स्वेव सन्निष्ठा यदभावे न सिध्यति ॥

**End:**

इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥

(हितमिद)मुपदेशमाद्रियन्तां विहितनिरस्तसमस्तचित्तदोषाः ।
भवसुखविरताः प्रशान्तचित्ताः श्रुतिरसिका यतयो मुमुक्षवो (ये) ॥

संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथा-
खिन्नानां जलकाङ्क्षया मरुभुवि भ्रान्त्या परिभ्राम्यताम् ।
अत्यासन्नसुधाम्बुधिं (सुखकरं) ब्रह्माद्वयं दर्शय-
न्त्येषा शङ्करभारती विजयते निर्वाणसन्दायिनी ॥

**Colophon:**

इति श्रीमच्छङ्करभगवत्पादकृतो विवेकचूडामणिस्समाप्तः ॥

---

No. **4724.** विवेकचूडामणिः.

VIVEKACUḌÂMAṆIḤ.

Pages, 54. Lines, 5 on a page.

Begins on fol. 55*a* of the MS. described under No. 179.

Incomplete.

Same work as the above.

## No. 4725. विवेकसारः.
## VIVĒKASĀRAḤ.

Pages, 166. Lines, 9 on a page.

Begins on fol. 7*b* of the MS. described under No. 4628.

Complete in 12 Varṇakas.

An elaborate treatise on the essence of true knowledge as consisting in the realization of the oneness of the soul with the Brahman.

**Beginning :**

बोधानन्दकरं निरस्तसकलं कारुण्यपूर्णेक्षणं
मूढानामुपदेशकं च सततं पापात्मनां पापहम् ।
वैराग्यस्य हि रागिणां सुखकरं सम्पादकं सर्वदा
श्रीमद्देशिकवासुदेवयतिनं मूढात्मकोऽहं भजे ॥

* * * *

अनुग्रहार्थं मर्त्यानां बालानां मोक्षसाधकः ।
विवेकसारः श्रोतॄणां रच्यते वै यथामति ॥

अध्यारोपापवादाभ्यामात्मस्वरूपं ज्ञातव्यम्; अध्यारोपः क इत्युक्ते वस्तुन्यवस्तुन आरोपोऽध्यारोपः; तत्किमित्युक्ते दृष्टान्तपूर्वं निरूपयामः । स दृष्टान्तः को वेत्युक्ते वक्ष्यामः—

शुक्तौ रजताध्यारोपः, रज्जौ सर्पाध्यारोपः ।

**End :**

एतत्प्रकारेण विचार्य आत्मस्वरूपमहमिति यो जानाति, सः संसारात् मुक्तस्स्यात् । स एव कृतकृत्यः । स एव परिपूर्णब्रह्मेति सकलश्रुतिस्मृतीतिहासपुराणागमाभियुक्ताचार्यवचनानि घोषयन्ति । अस्मिन्नर्थे संशयो नास्ति । सिद्धम् ।

सङ्ग्रहश्च—

भूतभौतिकभावेषु स्वकार्येषु सदात्मना ।
व्यापी दृष्टस्ततो ह्यात्मा देशानास्य परिच्छतिः(च्छिदा) ॥

अदेहित्वादनादित्वादवाच्यत्वान्न विद्यते ।
वर्तमानगतागामिकालेभ्योऽस्य परिच्छति (च्छिदा) ॥
सर्वाभिन्नस्वरूपेण सर्वात्मत्वात्सदात्मनः ।
सर्वेभ्यो वस्तुजातेभ्यो(:) परिच्छित्तिर्न विद्यते ॥
न व्यापित्वाद्देशतोनो(ऽपि) नित्यत्वान्नापि कालतः ।
न वस्तुतोऽपि स(ा)र्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा ॥
अखण्डात्माहमेवायमित्येवं यो विजज्ञिवान् ।
स सर्वसंसृतेर्मुक्तो ब्रह्मानन्दं समश्नुते ॥
किमनेन बहूक्तेन प्रणीतौ द्वौ महात्मभिः ।
अविचाराद्धि संसारो विचारान्मोक्ष इतिमौ(त्यमू) ॥
प्रमादाद्वा यदज्ञानादिदं शास्त्रं मयेरितम् ।
तत् क्ष(ा)म्यन्तु समालोक्य पण्डितास्समदर्शिनः ॥

**Colophon:**

इति विवेकसारे द्वादशवर्णकं समाप्तम् ॥

## No. 4726. वेदान्तडिण्डिमः.

## VĒDĀNTADIṆḌIMAḤ.

Pages, 6. Lines, 22 on a page

Begins on fol. 22*b* of the MS. described under No. 1021.

Complete in 67 stanzas.

On the general principles of Advaita-Vēdānta. Each stanza ends with the word Vēdāntadiṇḍimaḥ and hence the work itself has come to be called Vēdāntadiṇḍima.

**Beginning:**

वेदान्तडिण्डिमास्तत्त्वमेकमुद्घोषयन्ति यत् ।
आस्तां पुरस्तात्तत्तेजो दक्षिणामूर्तिशब्दितम् ॥
आत्मानात्मपदार्थौ द्वौ भोक्तृभोग्यत्वलक्षणौ ।
ब्रह्मैवात्मा न देहादिरिति वेदान्तडिण्डिमः ॥

ज्ञानाज्ञानपदार्थौ द्वौ आत्मनो बन्धमुक्तिदौ ।
ज्ञानान्मुक्तिर्निबन्धोऽन्य इति वेदान्तडिण्डिमः ॥
ज्ञातृज्ञेयपदार्थौ द्वौ भास्यभासकलक्षणौ ।
ज्ञाता ब्रह्म जगज्ज्ञेयमिति वेदान्तडिण्डिमः ॥
सुखदुःखपदार्थौ द्वौ प्रियविप्रियकारकौ ।
सुखं ब्रह्म जगद्दुःखमिति वेदान्तडिण्डिमः ॥
समष्टिर्व्यष्टिरूपौ द्वौ पदार्थौ सर्वसम्मतौ ।
समष्टिरीश्वरो व्यष्टिर्जीवो वेदान्तडिण्डिमः ॥

**End :**

न काम्यप्रतिषिद्धाभिः क्रीडाभिर्मोक्षसाधनः(म्) ।
ईश्वरानुग्रहात्तस्मादिति वेदान्तडिण्डिमः ॥
अविज्ञाते जन्म नष्टं विज्ञाते जन्म सार्थकम् ।
ज्ञातुरात्मा न दूरे स्यादिति वेदान्तडिण्डिमः ॥
दशमत्वपरिज्ञाने नायासोऽस्ति यथा तथा ।
स्वस्य ब्रह्मात्मविज्ञानमिति वेदान्तडिण्डिमः ॥

**Colophon :**

इति आत्मानात्मविवेको वेदान्तडिण्डिमस्समाप्तः ॥

## No. 4727. वेदान्तपरिभाषा.
## VĒDĀNTAPARIBHĀṢĀ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 61. Lines, 7 on a page. Character, Telugu. Condition, fair. Appearance, not new.

Eight Paricchēdas.

An explanatory work on the various technical terms used in Vēdānta; by Dharmarājādhvarīndra, a disciple of Veṅkaṭanātha, a resident of the village of Volaṅguḍi. He is also the author of Tarkacūḍāmaṇi and Pañcapādikāṭīkā.

**Beginning :**

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥
यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः ।
तं नौमि नारसिंहाख्यं यतीन्द्रं परमं(गुरुम्) ॥
श्रीमद्वेङ्कटनाथाख्यान्विलङ्गाडिनिवासिनः ।
जगद्गुरूनहं वन्दे सर्वतन्त्रप्रवर्तकान् ॥
येन चिन्तामणौ टीका दशटीकाविभञ्जनी ।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥
टीका शशधरस्यापि बालव्युत्पत्तिदायिनी ।
पदयोजनया पञ्चपादिका व्याकृता तथा ॥
तेन बोधाय मन्दानां वेदान्तार्थावलम्बिनी ।
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥

इह खलु धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः; न स(च)पुनरावर्तत इति श्रुतेः तस्य नित्यत्वावगमात् । इतरेषां त्रयाणां प्रत्यक्षेण, तद्यथेह कर्मचितो लोकः क्षीयते । एवमे(वा)मुत्र पुण्यचितो लोकः क्षीयत इत्यादिश्रुत्या चानित्यत्वावगमात् । स च ब्रह्मज्ञानादिति ब्रह्म तज्ज्ञानं, तत्प्रमाणं च सप्रपञ्चं निरूप्यते । तत्र प्रमाकरणं प्रमाणम् । तत्र स्मृतिव्यावृत्त(ज्ञानत्वं) प्र(मा)त्वम् अनधिगताबाधितार्थविषयकज्ञानत्वं वा । स्मृतिसाधारणं तु अबाधितविषयकज्ञानत्वम्; नीरूपस्यापि कालस्येन्द्रियवेद्यत्वाभ्युपगमेन धारावाहिकबुद्धेरपि पूर्वपूर्वज्ञानाविषयतत्तत्क्षणविशेषविशिष्टविषयकत्वेन न तत्राव्याप्तिः । किञ्च सिद्धान्ते धारावाहिकबुद्धिस्थले न ज्ञानभेदः ।

**End :**

तदुक्तमाचार्यवाचस्पतिमिश्रैः—

उपासनायास्संसिद्धितोषितेश्वरचोदितम् ।
अधिकारं समाप्यैते प्रविशन्ति परं पदम् ॥ इति ॥

एतच्चैकमुक्तौ सर्वमुक्तिपक्षे नोपपद्यते । तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया । तदेवं ब्रह्मज्ञानान्मोक्षः, मोक्षश्चानर्थनिवृत्तिः, निरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम् ॥

**Colophon :**

इति धर्मराजाध्वरीन्द्रविरचितायां वेदान्तपरिभाषायामष्टमः परिच्छेदः ॥

## No. 4728. वेदान्तपरिभाषा.
## VĒDĀNTAPARIBHĀṢĀ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 108. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

## No. 4729. वेदान्तपरिभाषा.
## VĒDĀNTAPARIBHĀṢĀ.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 87. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above.

## No. 4730. वेदान्तपरिभाषा.
## VĒDĀNTAPARIBHĀṢĀ.

Substance, palm-leaf. Size, $18 \times 1\frac{1}{2}$ inches. Pages, 26. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Mantradīpikā 14*a*, Siddhitraya 22*a*.

Breaks off in the 5th Paricchēda.

Same work as the above.

## No. 4731. वेदान्तपरिभाषा.

## VĒDĀNTAPARIBHĀṢĀ.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 125. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above.

## No. 4732. वेदान्तपरिभाषा.

## VĒDĀNTAPARIBHĀṢĀ.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 58. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

Same work as the above.

## No. 4733. वेदान्तपरिभाषा.

## VĒDĀNTAPARIBHĀṢĀ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 10. Lines, 6 on a page. Character, Telugu. Condition, fair. Appearance, not new.

The first Pariccheda incomplete.

Same work as the above.

## No. 4734. वेदान्तपरिभाषा.

## VĒDĀNTAPARIBHĀṢĀ.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 57. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vēdāntaśikhāmaṇi (Vēdāntaparibhāṣāvyākhyā) 30*a*.

The transcription of this manuscript was completed by Vēnkaṭasubrahmaṇya on the third day of the Śuklapakṣa in the month of Caitra in the year Krōdhana.

Complete.

Same work as the above.

## No. 4735. वेदान्तपरिभाषा.

## VĒDĀNTAPARIBHĀṢĀ.

Pages, 38. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 4528.

Complete.

Same work as the above.

---

## No. 4736. वेदान्तपरिभाषा.

## VĒDĀNTAPARIBHĀṢĀ.

Pages, 37. Lines, 5 on a page.

Begins on fol. 82*a* of the MS. described under No. 179.

Incomplete.

Same work as the above.

## No. 4737. वेदान्तपरिभाषाप्रकाशिका.

## VĒDĀNTAPARIBHĀṢĀPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 116. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

A commentary on the Vēdāntaparibhāṣā of Dharmarājādhavarīndra ; by Pēttādīkṣita, son of Nārāyaṇadīkṣita.

**Beginning :**

ज्ञानं विशुद्धं परमात्ममूतं स्वयम्प्रकाशं जगदेकहेतुम् ।
आनन्दरूपं परमं परेशं वेदान्तवेद्यं तमहं प्रपद्ये ॥
यत्प्रसादप्लवेनैव शास्त्राब्धिमतरं सुखम् ।
तं धर्मराजाध्वरिणं वन्दे सर्वार्थसिद्ध(ये) ॥
(पेत्तादीक्षित)वर्येण परिभाषाप्रकाशिका ।
क्रियते विदुषां प्रीत्यै बालानां मतिदायिनी ॥

अत्र प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने दर्शयन् निर्विघ्नपरिसमाप्त(ये) इष्टदेवतां नमस्करोति—यदविद्येति । यस्याविद्या यदविद्या । अत्र षष्ठ्यर्थस्तु विवरणाचार्यमते आश्रयाश्रयिभावः, आचार्यवाचस्पत्य(ति)मिश्राणां मते विषयविषयिभावः । अविद्या नाम भावरूपाज्ञानमुत्तरत्र वक्ष्यते ।

* * * *

**Colophon:**

इति श्रीनारायणदीक्षितात्मजपेत्तादीक्षितवर्यकृतवेदान्तपरिभाषाप्रकाशिकायां प्रमाणनिरूपणं सम्पूर्णम् ॥

**End:**

द्वितीयं दूषयति—वृत्तिद्वयेति । अविद्यान्तःकरणवृत्त्योरेकत्र विषय(ये)चैतन्यप्रदेशे विद्यमानतया चैतन्यभेदापादकत्वादिति भावः । न त्वधिष्ठानवृत्तिरेवा.

## No. **4738.** वेदान्तपरिभाषाप्रकाशिका.

## VĒDĀNTAPARIBHĀṢĀPRAKĀŚIKĀ.

Substance, paper. Size, 8⅝ × 6⅞ inches. Pages, 143. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, new.

The first Paricchēda incomplete.

Same work as the above.

## No. **4739.** वेदान्तपरिभाषाव्याख्या—वेदान्तशिखामणिः.

## VĒDĀNTAPARIBHĀṢĀVYĀKHYĀ: VĒDĀNTAŚIKHĀMAṆIḤ.

Pages, 226. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 4734.

Complete.

This commentary on the Vēdāntaparibhāṣā is by Rāmakṛṣṇādhavarīndra, son of Dharmarājādhvarīndra, the author of the original work.

**Beginning:**

नैदाघभानुकिरणेष्विव वारिपूरः सर्वो विभाति यदबोधवशात्प्रपञ्चः ।
मालाफणीव च निमीलति यत्प्रबोधात् तद्ब्रह्म नौमि सुखमद्वयमात्मरूपम् ॥

आ सेतोरा सुमेरोरपि भुवि विदितान्धर्मराजाध्वरीन्द्रान्
वन्देऽहं तर्कचूडामणिमणिजननक्षीरधींस्तातपादान् ।
यत्कारुण्यान्मयाभूदधिगतमधिकं दुर्ग्रहं सूक्ष्मधीकैः
अप्यान्तं शास्त्रजातं जगति मखकृता रामकृष्णाह्वयेन ॥

वेदान्तपरिभाषाख्यां सोऽहं तातविनिर्मिताम् ।
व्याकरोमि कृतिं सर्वश्रुत्यन्तार्थप्रकाशिकाम् ॥

प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने निर्दिशन्निर्विघ्नपरिसमाप्तये मङ्गलमाचरितं शिष्याशिक्षायै ग्रन्थतो निबध्नाति—यदविद्येति । तं परमात्मानं नौमीति संबन्धः । जीवाभिन्नं ब्रह्म शास्त्रप्रमेयमिति सूचयितुमात्मशब्दः । नन्वेवं तस्यैव तमेव प्रति उत्कर्षापकर्षाभावात् नमस्कर्तृनमस्कार्यतानुपपत्तिरित्याशङ्क्य कल्पितभेदमादाय अविद्याप्रतिबिम्बितं कर्तृत्वादिविशिष्टमपकृष्टं रूपं नमस्कर्तृ; तद्व्यावृत्तं सर्वज्ञत्वादिविशिष्टमुत्कृष्टं रूपं नमस्कार्यमित्यभिप्रेत्याह—परमेति । ननु ब्रह्मणि लक्षणपुत्रा(प्रमा)णा(नाम)भावेन तस्यैवासिद्धेः कथं जीवब्रह्माभेदश्शास्त्रार्थ इति चेन्न तावत् प्रमाणाभावः; भूतभौतिकोत्पत्तेस्तत्र प्रमाणत्वात्, तथाहि—विवादविषयीभूतानि भूतभौतिकादीनि स्वोपादानापरोक्षज्ञानवत्प्रणीतानि कार्यत्वात् घटवत्; न च परिदृश्यमानपृथिव्यादौ प्रत्यक्षेण कार्यत्वसिद्धावपि अतीन्द्रियतया परमाण्वादिषु भागासिद्धो हेतुरिति वाच्यम्; तत्रापि पृथिवीत्वादिना कार्यत्वकल्पनात् । नचाप्रयोजकत्वम्; लाघवानुगृहीतेन प्रत्यक्षेण घटादौ कार्यत्वेनैव कर्तृजन्यत्वावगमात् ।

**End:**

तदुक्तमिति । तथाचैकमुक्तौ सर्वमुक्तिरित्यभ्युपगतावेतदधिकरणाविरोधो दुर्वार इत्य(भिप्रेत्याह---त)च्चेति । नन्वेकाविद्या(ग)तना(नाशक्त्यभ्युप)गन्तृमतेऽप्येकमुक्तौ सर्वमुक्तिरेव ; इयमावरणशक्तिर्निवर्त्या इयं नेत्यत्र नियामकाभावेन ब्रह्मसाक्षात्कारात् सर्वावरणशक्तिविशिष्टाविद्याविनाशावश्यम्भावादित्याशङ्क्य यथा शुक्तितत्त्वसाक्षात्कारात् फलबलेनैकावरणशक्तिविनाशः ; यथा वा सर्वज्ञानप्रागभावनिवृत्तिस्वरूपयोग्येन ज्ञानेन कस्यचिदेव प्रागभावस्य निवृत्तिरेवमन्यस्य प्रपञ्चोपलम्भानुरोधेन यस्य ब्रह्मज्ञानं तदीयानर्थहेत्वावरणशक्तेरेव नाशः नान्यदीयसंसारहेत्वावरणशक्तीनामिति व्यवस्थोपपद्यत इत्याह—तस्मादिति । परिच्छेदप्रतिपाद्यमर्थं निगमयति—(तदेवमिति) ॥

**Colophon:**

इति श्रीमद्धर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरीन्द्रविरचिते वेदान्तशिखामणावष्टमः परिच्छेदः ॥

---

## No. 4740. वेदान्तपरिभाषाव्याख्या—वेदान्तशिखामणिः.

## VĒDĀNTAPARIBHĀṢĀVYĀKHYĀ : VĒDĀNTAŚIKHĀMAṆIḤ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 146. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, new.

Begins on fol. 1*a*. The other work herein is Laghugaṇita (with commentary) 74*a*.

Breaks off in the 6th Paricchēda.

Same work as the above.

## No. 4741. वेदान्तपरिभाषाव्याख्या--वेदान्तशिखामणिः.

## VĒDĀNTAPARIBHĀṢĀVYĀKHYĀ : VĒDĀNTAŚIKHĀMAṆIḤ.

Substance, palm-leaf (Śrītāla). Size, $19\frac{3}{8} \times 1\frac{7}{8}$ inches. Pages, 216. Lines, 10 on a page. Character, Telugu. Condition, fair. Appearance, old.

Complete.

Same work as the above.

## No. 4742. वेदान्तपरिभाषाव्याख्या—वेदान्तशिखामणिः.

## VĒDĀNTAPARIBHĀṢĀVYĀKHYĀ : VĒDĀNTAŚIKHĀMAṆIḤ.

Substance, palm-leaf (Śrītāla). Size, $16\frac{3}{8} \times 1\frac{3}{4}$ inches. Pages, 359. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Same work as the above. However, there are these two stanzas at the end.

सुवर्णरचिताकारा कृतिरेका मया कृता ।
विदुषामस्तु वेदान्तशिखामणिरलङ्क्रिया ॥
अनेन मत्प्रबन्धेन वेदान्तार्थावलम्बिना ।
गुरुकारुण्यलब्धेन तारकं ब्रह्म तुष्यति ॥

## No. 4743. वेदान्तविषयः.

## VĒDĀNTAVIṢAYAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 24*a* of the MS. described under No. 2014.

Contains the second and the third Adhyāyas. The second Adhyāya treats about Ātmadarśana, the third about Advaitabōdha.

On the doctrines of Advaita-Vēdānta ; by Śaṅkarācārya.

The name of the work cannot be made out with certainty.

**Beginning:**

स्वात्मैकतत्त्वं परमं विशुद्धं सत्यं स्वभोगं गगनोपमोऽहम्।
चिदात्मबोधं विमलं विशुद्धं तत्तत्त्वबोधं स्वयमेव बोधम् ॥

सोऽहं देव इति श्रुतिर्नि(तौ नि)गदितोचि(तश्चि)द्बोध एको हरिः
पूर्णानन्दमनन्तमेवमखिलोस(लस्स)र्वात्मकोस(कस्स)र्वगः ।
अज्ञातश्शिवतत्त्वमूढभ्रामितो मृद्दारुचित्रे शिला-
व्योमाकारमखण्डविग्रहशिवोऽखण्डीकृतो राध्यते ॥

अखण्डं खण्डयन्मूढो मृच्छिलादारुचित्रितः ।
भावयेद्भिन्नबुद्धिश्चेदज्ञानः पातकी पुमान् ॥

क्व ब्रह्मा क्व शिवो विष्णुः क्व इन्द्रः क्व मुनीश्वराः ।
याविन्द(वन्न)विन्दते तत्त्वं तावद्भ्रान्तिविकल्पनाः ॥

* * * *

**Colophon:**

इति श्रीशङ्कराचार्यविरचिते देवतार्चनयोगो नाम प्रथमोऽध्यायः ॥

* * * *

इति श्रीशङ्कराचार्यविराचिते स्वात्मदर्शनयोगो नाम द्वितीयोऽध्यायः ॥

**End:**

शब्दे शास्त्रमते पुराणनिगमे तार्के मिमांसे तथा
वेदान्ते विमले विशुद्धसमते भेदे मते दूषके ।
शैवे शाक्तजयन्मते च विविधे कातिर्मते कार्मणे
सर्वे भेदभ्रमं च(त)मेव विविधे(धै)राराध्य एकोऽप्यहम्(?) ॥

**Colophon:**

इति श्रीशङ्कराचार्यविराचिते अद्वैतबोधो नाम तृतीयोऽध्यायः ॥

No. **4744.** वेदान्तविषयः—सव्याख्यः.

VEDĀNTAVIṢAYAḤ WITH COMMENTARY.

Pages, 10. Lines, 8 on a page.

Begins on fol. 23*a* of the MS. described under No. 534.

Similar to the above. Contains also a commentary.

As the beginning and the end are wanting it is difficult to make out with certainty the name of the work.

**Beginning:**

. . . . रिह जन्यतादात्म्यस्य कदाचिदपि निवृत्तिर्नास्ति । सहजत्वान्मोक्षपर्यन्तं देहप्रारम्भकर्मक्षयेऽहङ्कारस्य देहान्तरगामित्वात्कर्मजन्यनिवृत्ति(ः) स्यात् । भ्रान्तिजन्यस्य साक्षिणा सह तादात्म्यस्य प्रबोधाद्ब्रह्मज्ञाननाशे त . . . . स्याहङ्कारा . . . . . . विनाशे सति निवर्तते । तदा केवलब्रह्मैवानुभवरूपेणावतिष्ठते । ननु अनवरतमवस्थात्रयोपपन्नं स्वात्मनः कथं निर्विकारतेत्याशङ्क्याहङ्कारस्यावस्थात्रयमित्याशयेनाह—

अहङ्कारलये सुप्तौ भवेद्देहोऽप्यचेतनः ।
अहङ्कारविकासार्धस्स्वप्नस्सर्वस्तु जागरः ॥

सुप्तौ सुषुप्तिसमयेऽहङ्कारस्य स्वकारणे लये सति देहोऽप्यचेतन एव काष्ठादिसदृशो भवति । अहङ्कारस्यार्थविकासो यदा जायते तदा स्वप्नः । अत एव स्वप्नदृष्टजगद्देहादिपद(ा)र्थानां प्रतीतिकालमेव स्थित्या न ते व्यवहारयोग्याः । यदाहङ्कारस्य विकासो भवेत् तदा जागरप्रपञ्चः सर्वव्यवहारयोग्यो भवेत् । अतोऽहङ्कार एवात्मन्यवस्थात्रयकारणम् । तदभावे न किञ्चिदित्यर्थः ।

इतः परं सर्वं दृश्यजातं मनस्सङ्कल्पमात्रेणैव न तु वास्तवमिति दृष्टः ।

सृष्टिप्रकारमनुसृत्याह—

अन्तःकरणवृत्तिश्च चितिच्छायैक्यमागता ।
वासनाः कल्पयेत्स्वप्ने बोधेक्षैर्विषयान्बहिः ॥

**End:**

एवं पारमार्थिकव्यावहारिकप्रातिभासिकसौ(सं)ज्ञायाः जीवत्रैविध्यमुक्त्वा तत्र परिकल्पितयोरुभयोर्जीवयोर्मिथ्यात्वं दर्शयित्वा इदानीं तदेव सुखबोधार्थं जलदृष्टान्तेन स्पष्टं निरूपयति—

माधुर्यं द्रवशैत्यादि . . . धर्मान्त(स्त)रङ्गिके ।
अनुगम्याथ तन्निष्ठे फेनेत्य(ऽप्य)नुगता यथा ॥

माधुर्यद्रवशैत्यादयो जलधर्मास्तथैव जलं वायुना विक्षिप्तं तरङ्गाकारेण दृश्यते । एतस्मिन्नपि माधुर्यद्रवादयो दृश्य(न्ते).

## No. 4745. वेदान्तसङ्ग्रहः.

## VĒDĀNTASAṄGRAHAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 49*b* of the MS. described under No. 276.

Incomplete.

An epitome of the principles of Advaita-Vēdānta.

**Beginning:**

आराममस्य पश्यन्ति न तं पश्यन्ति केचन । अहरहर्ब्रह्मलोकं गच्छन्ति । ब्रह्मलोकं न विदन्ति ।

आयासस्तावदत्यल्पः फलमुक्तिरिहैव तु ।
तथापि परमाद्वैतं नाभिवाञ्छन्ति मानवाः ॥

अहो कष्टं न पश्यामः कं यामश्शरणं वयम्

इति श्रुतय आक्रोशन्ति ।

संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र सम्मतः ।
अखण्डैकरसं वस्तु वाक्यार्थो वि(दु)षां मतः ॥

इति यदुक्तं तत्र शङ्कते—ननु तार्किकमीमांसयोः वाक्यार्थस्य संसर्गविशिष्ट(त्वा)ङ्गाकारात् कथमखण्डैकरसत्वमित्युंच्यते चेन्न ।

**End:**

मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति ।
आत्मैव देवतास्सर्वा आत्मलाभान्न परं विद्यते इत्यादिश्रुतिसहस्रेभ्योऽयमर्थोऽवगम्यते । ओं तत्सत् ॥

## No. 4746. वेदान्तसारः.

## VEDĀNTASĀRAH.

Pages, 42. Lines, 11 on a page.

Begins on fol. 9*a* of the MS. described under No. 3088.

Contains what is considered by the author to be the essence of Vēdānta-philosophy; by Sadānanda.

Transcribed by Taḍakamalla Vēṅkanna, son of Śrīnivāsa-Pantulu and completed on Thursday, the fifth day of Jyēṣṭa Śukla in the year Pramādi.

**Beginning:**

अखण्डसच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥
अर्थतोऽप्यद्वयानन्दानतीतद्वैतभावनान् ।
गुरूनाराध्य वेदान्तसारं वक्ष्ये यथामति ॥

वेदान्तो नाम — उपनिषत्प्रमाणम्; तदुपकारीणि शारीरकसूत्रादीनि; अस्य वेदान्तप्रकरणत्वात् तदीयैरेवानुबन्धैः तद्वत्तासिद्धेर्न ते पृथगालोचनीयाः । अत्रानुबन्धो नाम—अधिकारिविषयसम्बन्धप्रयोजनानि । अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेन आपाततोऽधिगताखिलवेदार्थोऽ-

स्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरस्सरं नित्यनैमित्तिकप्रायश्चित्तोपासनेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तस्साधनचतुष्टयसम्पन्नः तावत् प्रमाताधिकारी । काम्यानि ज्योतिष्टोमादीनि स्वर्गादीष्टसाधनानि । निषिद्धानि नरकादी(न्यनि)ष्टसाधनानि ब्रह्महननादीनि ।

**End :**

परब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्यसंस्कारादीनां विनाशात्परं कैवल्यभावैकरसमखिलभेदप्रतिभारहितमखण्डं ब्रह्मावतिष्ठते । न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते । ब्रह्मैव सन् ब्रह्माप्येति इति श्रुतेः ॥

**Colophon :**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीसदानन्दकृतो वेदान्तसारं(रः)- समाप्तः ॥

## No. **4747.** वेदान्तसारः.

## VĒDĀNTASĀRAḤ.

Pages, 33. Lines, 6 on a page.

Begins on fol. 102*a* of the MS. described under No. 4628.

Incomplete.

Same work as the above.

---

## No. **4748.** वेदान्तसारसङ्ग्रहः.

## VĒDĀNTASĀRASAṄGRAHAḤ.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 5. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vēdāntasārasaṅgrahavyākhyāna (Ātmabōdhāmṛta) 3*a*.

Complete.

A brief summary of the essential principles of Advaita-Vēdānta.

By Śivarāmabhaṭṭa.

**Beginning:**

नत्वा हरिहरव्यासभाष्यकारादिदेशिकान् ।
बालबोधाय वेदान्तसारस्सङ्गृह्यते स्फुटम् ॥

इह कश्चित्पुरुषधौरेयः . . . . . . . . . . . . राधितपरमेश्वरानुग्रहपरिशुद्धान्तःकरणः स्वयमेव नित्यानित्यवस्तु विवेचयति—आत्मा नित्यः परमप्रे . . . . . . . . नन्दः, तद्व्यतिरिक्तं जगदनित्यं कृतकत्वात् यत्कृतकं तदनित्यमिति व्याप्तेः । तद्यथेह कर्मचितो लोकः क्षीय(ते) ।

**End:**

तत्रत्यानां तल्लोकनिवासिनां हिरण्यगर्भेण सह परममुक्तिः ।

ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति पर[म]म्पदम् ॥

इति सर्वमनवद्यम् ॥

हस्तामलक(वत्)ब्रह्म भासते गुर्वनुग्रहात् ।
यस्य तेन बुधेन्द्रेण कृतो वेदान्तसङ्ग्रहः ॥
मुमुक्ष्वाकाङ्क्षितो ग्रन्थश्शिवराममनीषिणा ।
कृतो वेदान्तसाराख्यः तेन तुष्यतु शङ्करः ॥
य इमं ग्रन्थमालोच्य प्रमेयं दधते हृदि ।
आविर्भूतं भवेद्ब्रह्म नित्यज्ञानसुखात्मकम् ॥

**Colophon:**

इति श्रीशिवरामभट्टाचार्यकृतवेदान्तसारसङ्ग्रहस्समाप्तः ॥

## No. 4749. वेदान्तसारसङ्ग्रहव्याख्यानम्—आत्मबोधामृतम्.

## VĒDĀNTASĀRASAṄGRAHAVYĀKHYĀNAM: ĀTMABŌDHĀMṚTAM.

Pages, 36. Lines, 7 on a page.

Begins on fol. 3*a* of the MS. described under No. 4748.

Complete.

A commentary by Śivarāmabhaṭṭa on his Vēdāntasārasaṅgraha.

The transcription of this manuscript is said to have been completed by Subramaṇyaśāstrin, son of Nainagaṇḍi Cangalarāyaśāstrin on Monday the 12th of the month Phālguna in the year Dundubhi.

**Beginning:**

हरिब्रह्ममहेशानव्यासशङ्करदेशिकान् ।
नत्वा स्वकृतवेदान्तसारव्याकृतिमारभे ॥

चिकीर्षितग्रन्थस्य निष्प्रत्यूहपरिपूरणाय स्वानुष्ठितमङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—नत्वेति । आदिपदेन आचार्यवाचस्पतिमिश्रविवरणाचार्यादयो वेदान्तशास्त्रप्रवर्तकास्स्वगुरवश्च कथ्यन्ते । बालशब्देन ग्रहणधारणपटुस्साधनचतुष्टयसम्पन्नो विशिष्टाधिकारी विवक्षितः । तस्यापातव्युत्पन्नस्यापरिशीलिततर्कादिरहस्यस्यात्यन्तविस्तृतभाष्यादिमूलशास्त्रेऽनधिकारात्तदर्थमिदं प्रकरणमावश्यकम् । तत्र साधनचतुष्टयं नाम - नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वं च ।

**End:**

तत्र हेतुं दर्शयति—हस्तेति ।

यावत्कीर्तिर्मनुष्यस्य लोके तिष्ठति शाश्वने(ती) ।
तावत्पुण्यकृतां लोकाननन्तान् पुरुषोऽश्नुते ॥

इति शास्त्रमनुसंदधानः स्वनाम प्रकटयन् स्वग्रन्थं मोक्षसुखप्रदं परमेश्वरायार्पयति—मुमुक्ष्विति ।

निर्मथ्य शास्त्रक्षीराब्धिं युक्तिमन्थादिना(द्रिणा)हृतम् ।
मयात्मज्ञानममृतं स्वीकुरुध्वं बुधोत्तमाः ॥

**Colophon:**

(शिव)रामभट्टाचार्यविरचितस्वकृतवेदान्तसारसङ्ग्रहव्याख्या आत्मबोधामृताख्या सामाप्ता ॥

---

## No. 4750. वैदिकसिद्धान्तसङ्ग्रहः.

## VAIDIKASIDDHĀNTASAṄGRAHAḤ.

Substance, palm-leaf. Size, $10\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 24. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, not new.

Begins on fol. 1*a*. The other work herein is Pāṣāṇapañcaka-vyākhyā 13*a*.

Incomplete.

An essay intended to show that Brahmā Viṣṇu and Śiva are really different manifestations of one and the same Brahman.

By Nṛsiṁhāśrama.

**Beginning:**

नत्वा गुरूणां पादाब्जं नृसिंहाख्यो यतिस्स्वयम् ।
सारं वैदिकसिद्धान्ते सङ्गृह्णाति यथामति ॥

इह खलु . . . . . वादिनो भवन्ति । विष्णोर्भिन्नश्शिव एव परमात्मा न विष्णुरिति केचित् । शिवाद्भिन्नो विष्णुरेव परमात्मा न शिव इत्यन्ये । यश्शिवस्स एव विष्णुस्स एव शिव इत्येकः ।

**End:**

यस्य मायागतं सत्त्वं शरीरं स्यात्तमोगुणः ।
संहाराय त्रिमूर्तीनां स रुद्रस्स्यान्न चापरः ॥
तथा यस्य तमस्साक्षाच्छरीरं सात्त्विको गुणः ।
पालनाय त्रिमूर्तीनां स विष्णुस्स्यान्न चापरः ॥

रजो यस्य शरीरं स्यात्तदेवोत्पादनाय च ।
त्रिमूर्तीनां तु स ब्रह्मा (सृष्टये) स्यान्न चापरः ॥ इति ॥

## No. 4751. वैयासिकन्यायमाला

## VAIYĀSIKANYĀYAMĀLĀ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 51. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

A summary of the Adhikaraṇas or topical subdivisions of the Vēdāntasūtras; by Bhāratītīrthamuni.

This is also called Adhikaraṇaratnamāla, Vaiyāsikanyāyamālā and Adhikaraṇamālikā.

**Beginning:**

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
वैयासिकी न्यायमाला श्लोकैस्सङ्गृह्यते स्फुटम् ॥

अथातो ब्रह्मजिज्ञासा ।

अविचार्यं विचार्यं वा ब्रह्माध्यासानिरूपणात् ।
असन्देहाफलत्वाभ्यां न विचारं तदर्हति ॥
अध्यासोऽहम्बुद्धिसिद्धोऽसङ्गं ब्रह्म श्रुतीरितम् ।
सन्देहान्मुक्तिभावाच्च विचार्यं ब्रह्म वेदतः ॥ इति ।

जन्माद्यस्य यतः ।

लक्षणं ब्रह्मणो नास्ति किं वास्ति न हि विद्यते ।
जन्मादेरन्यनिष्ठत्वात्सत्यादेश्चाप्रसिद्धितः ॥
ब्रह्मनिष्ठं कारणत्वं स्याल्लक्ष्म स्रग्भुजङ्गवत् ।
लौकिकान्येव सत्यादीन्यखण्डं लक्षयन्ति हि ॥

**End:**

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ।
जगत्स्रष्टृत्वमस्त्ये(षां) योगिनामथ नास्ति वा ।
अस्ति स्वाराज्यमाप्नोतीत्युक्त्यैश्वर्यानवग्रहात् ॥
सृष्टानां(व)प्रकृतत्वेन स्रष्टृता नास्ति योगिनाम् ।
स्वाराज्यमीशो भोगाय ददौ मुक्तिं (च विद्यया) ॥

**Colophon:**

(इति) श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिप्रणीतायां न्याय-
रत्नमालायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥
अध्यायश्च सम्पूर्णः ॥

## No. 4752. वैयासिकन्यायमाला.

### VAIYĀSIKANYĀYAMĀLĀ.

Pages, 34. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 4694.

The first two pages are wanting. Contains the first Adhyāya, the first Pāda of the third Adhyāya and 4th Pāda of the 4th Adhyāya.

Same work as the above; but this manuscript does not contain the Kārikās.

## No. 4753. वैयासिकन्यायमाला—सव्याख्या.

### VAIYĀSIKANYĀYAMĀLĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 17¼ × 1½ inches. Pages, 185. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above with a commentary by the author of original work.

**Beginning:**

(मू.)

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणम् ।
वैयासिकन्यायमाला श्लोकैस्सङ्गृह्यते स्फुटम् ॥

(व्या.)

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये प्रचयगमनाय शिष्टाचारपरिपालनाय च विशिष्टेष्टदेवतातत्त्वं गुरुमूर्त्युपाधियुक्तं नमस्कृत्य ग्रन्थं प्रतिजानीते—प्रणम्येति । व्यासेन प्रोक्ता वैयासिकी । वेदान्तवाक्यार्थनिर्णायकान्यधिकरणानि न्यायाः । तेषामनुक्रमेण ग्रथनं माला । यद्यप्येषा सूत्रभाष्यादिभिः प्रपञ्चिता, तथापि सूत्रादीनामतिप्राज्ञविषयत्वान्मन्दबुद्ध्यनुग्रहाय श्लोकैरेषा माला स्फुटं सङ्गृह्यते । तत्रैकैकमधिकरणं पञ्चावयवम् । विषयस्सन्देहः सङ्गतिः पूर्वपक्षः सिद्धान्तश्चेति पञ्चावयवास्तेषां सङ्ग्रहप्रकारं दर्शयति—एक इति ।

एको विषयसन्देहपूर्वपक्षावभासकः ।
श्लोकोऽपरस्तु सिद्धान्तवादी सङ्गतयः स्फुटाः ॥

**End:**

वियदादिजगत्सृष्टिप्रतिपादकेषु वाक्येषु सर्वत्र परमात्मैव स्रष्टृत्वेनावगम्यते, न क्वापि योगिनस्तथावगम्यन्ते ; अतो न तेषां जगत्स्रष्टृत्वम् ; अन्यथा अनेकेश्वरत्वे सति कश्चित्सिसृक्षति, कश्चित्सञ्जिहीर्षति चेति जगद्व्यवस्था न सिध्येत् । कथं तर्हि स्वाराज्यश्रुतिः ? ईश्वराधीनस्वाराज्याभिप्रायेणेति ब्रूमः । ईश्वरो ह्युपासनया तोषितस्तेषां भोगमात्रसिद्धये स्वाराज्यं मुक्तिं च तत्त्वविद्भ्यो ददौ । तस्माज्जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यमस्तीत्यशेषमतिविमलम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजका(चा)र्यश्रीभारतीतीर्थमुनिप्रणीतायां वैयासिकन्यायमालायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

समाप्तोऽयं चतुर्थोऽध्यायः ॥

आद्ये तु क्रमशो नयास्सुगणिता रुद्रर्षिकामैर्गजैः
कामेनेभकलावतारगणितास्तद्वद्द्वितीयेऽपि च ।
अङ्गैस्सिद्धवरैस्तृतीयसुनयाः षड्विंशपक्षैर्मुदा
मन्वेकाद(श)षड्वसुप्रगणनां याताश्चतुर्थेऽपि च ॥
अधिकरणसङ्ख्याव्यवस्थापकोऽयं श्लोकः ॥

---

No. **4754.** वैयासिकन्यायमाला—सव्याख्या.

VAIYĀSIKANYĀYAMĀLĀ WITH COMMENTARY.

**Pages**, 172. Lines, 8 on a page.

Begins on fol. 27*a* of the MS. described under No. 4651.

Complete.

Same work as the above.

No. **4755.** वैयासिकन्यायमाला—सव्याख्या.

VAIYĀSIKANYĀYAMĀLĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 15⅛ × 1⅝ inches. Pages, 238. **Lines**, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

---

No. **4756.** वैयासिकन्यायमाला—सव्याख्या.

VAIYĀSIKANYĀYAMĀLĀ WITH COMMENTARY.

Substance, palm-leaf (Śrītāla). Size, 14¼ × 2 inches. **Pages**, 14. Lines, 13 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 1*a*. The other works herein are—Bhāgavataślōka 8*a*, Rāghavāṣṭaka 9*a*, Gītagōvinda 10*a*, Mahānyāsa 16 and

24*a*, Śivasahasranāma 25*a*, Śivastōtra 32*b*, Kālāgnirudrōpaniṣad 34*a*, Mānasikapūjā 37*a*, Indrākṣīstōtra 38*a*, Śivakavaca 39*b*, Aparādhāṣṭaka 42*a*, Aruṇācalastava 42*b*, Brahmasūtrabhāṣya (of Śaṅkarācārya) 44*a*.

Contains only the first Pāda of the first Adhyāya.

Same work as the above.

## No. 4757. श्रुतिसारसमुच्चयः.

## ŚRUTISĀRASAMUCCAYAḤ.

Substance, palm-leaf (Śrītāla). Size, 17 × 2 inches. Pages, 16. Lines, 9 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Mānasōllāsa 9*a*, Kulārṇava 16*a*.

Jīvanmuktiprakaraṇa only complete.

A treatise on Advaita-Vēdānta by Brahmanirākārayōgīndra.

From the name of the work it may be inferred that it is a collection of what is considered by the author to be the essence of the teachings derivable from various Śrutis or scriptural sources of the Vēdānta philosophy.

**Beginning:**

. . . . मानितोऽमानितश्च यः ।
यस्सर्वभूताभयदस्तं देवा ब्राह्मणं विदुः ॥
वेदशास्त्रार्थतत्त्वज्ञं सत्याचारसमन्वितम् ।
निर्द्वन्द्वं निरहङ्कारं सर्वज्ञं गुरुमाश्रयेत् ॥
निरपेक्षं सदा शान्तं निर्वैरं समदर्शिनम् ।
सर्व . . . . . . . . . ॥
. . . . . . . . वर्जितम् ।
जितेन्द्रियं जितात्मानं सद्गुरुं समनुव्रजेत् ॥
केवलब्रह्मतत्त्वज्ञं पूर्णानन्दस्वरूपिणम् ।
सुबोधकं दयायुक्तं सद्गुरुं शरणं व्रजेत् ॥
संसारविषयेऽत्यर्थं विरक्तिं वक्ति सर्वतः ।
भक्तिमध्यात्मविषये सद्गुरुर्वाच . . . ॥

**End:**

. . . . वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥
बुद्धो बालकवत्क्रीडेत् कुशलो जडवच्चरेत् ।
वदेदुन्मत्तवद्विद्वान्नो चर्यां नैगमश्चरेत् ॥
इति जीवन्मुक्तप्रकरणमेकाविंशातितमम् ॥

**Colophon:**

इति श्रीमद्ब्रह्म . . . महायोगीन्द्रविरचितं(तः) श्रुतिसारसमुच्चयं(यः) समाप्तम्(ः) ॥

No. **4758.** संक्षेपशारीरकव्याख्या–तत्त्वबोधिनी.

SAṄKṢEPAŚĀRĪRAKAVYĀKHYĀ : TATTVABŌDHINĪ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 388. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Wants beginning.

A critical summary of Śaṅkarabhāṣya; by Nṛsiṁhāśrama-śrīcaraṇa, a disciple of Jagannātha-śrīcaraṇa.

**Beginning:**

. . . . प्रतीतिरिति वा । अतोऽपि निष्प्रयोजनत्वाद-पीत्यर्थः । निष्प्रयोजनस्यापि क्रियाशेषार्थत्वेन प्रामाण्यमस्ति । न चात्र तत्; अद्वितीयब्रह्मणस्तदयोग्यत्वादित्येतदपिशब्दस्सूचयति ।

**End:**

